RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI
(*Kendriya Sanskrit Vidyapeetha, Tirupati Series No.* 37)

VYADHIKARAṆAM
(Caturdaśalakṣaṇī)

59

OF

SRI GAṄGEṢOPĀDHYĀYA

with **DIDHITI** of Sri Raghunāthaśiromaṇi

AND

DIDHITI - PRAKĀŚIKĀ of Sri Gadādhara - Bhaṭṭācārya

9495





J413

KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1985

Rs 23=00

First Edition : 1911
Second Edition : 1930
Reprinted by Offset Process : 1985

Copy Rights Reserved

Price: *Rs.* [illegible]

Published for the
RASHTRIYA SANSKRIT SANSTHAN
MINISTRY OF EDUCATION
GOVERNMENT OF INDIA
NEW DELHI

By

Dr. N. S. RAMANUJA TATACHARYA
PRINCIPAL I/c
KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI

Printed by N.R. Vijayaraghavan by Offset Process at Udhaya Printers, Madras-600033.

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

(केन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला-संख्या ३७

श्रीगङ्गेशोपाध्यायविरचितं

व्यधिकरणम्
(चतुर्दशलक्षणी)

श्रीरघुनाथशिरोमणि विरचितया **दीधित्या**

श्रीगदाधरभट्टाचार्यकृतया **दीधितिप्रकाशिकया** च अलंकृतम्



केन्द्रीयसंस्कृतविद्यापीठम्

तिरुपतिः

१९८५

Rs 23

प्रथमं प्रकाशनम् . १९११

द्वितीयं प्रकाशनम् १९३०

पुनर्मुद्रणम् १९८५

सर्वेऽधिकाराः राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

शिक्षा मन्त्रालयान्तर्गत

नवदेहलीस्थ–राष्ट्रियसंस्कृतसंस्थानस्य कृते

तिरुपतिस्थ–केन्द्रीयसंस्कृतविद्यापीठस्य

प्राचार्येण डा. एन्. एस्. रामानुजताताचार्येण

प्रकाशितम्

उदयप्रिन्टर्स्, मद्रास् – ३३

इत्येतैः पुनर्मुद्रितं च

चतुर्दशलक्षणी

भूमिका

अनुमितिहेतुभूतव्याप्तिज्ञानविषयभूता व्याप्तिर्नाम का ? इत्याशङ्क्य अव्यभिचरितत्वमेव व्याप्तिः, तच्च साध्याभाववद्-वृत्तित्वादिरूपमिति तत्र केषांचित्समाधानं केवलान्वयिन्यभावादिति दूषितं पूर्वतने व्याप्तिपञ्चकग्रन्थे । 'इदं वाच्यं ज्ञेयत्वादित्यादौ केवलान्वयिवाच्यत्वसाध्यकसद्धेतौ वाच्यत्वरूपसाध्याभावस्याप्रसिद्धतया अव्याप्तिरिति तदाशयः ।

तदुपरि सौन्दडोपाध्यायाः इत्थमाक्षिपन्ति – अभावो द्विविधः समानाधिकरणधर्मावच्छिन्नप्रतियोगिताको व्यधिकरण-धर्मावच्छिन्नप्रतियोगिताकश्चेति । प्रतियोगिवृत्तिधर्मावच्छिन्न-प्रतियोगिताक आद्यः यथा घटो नास्तीति । प्रतियोग्यवृत्तिधर्मा-वच्छिन्नप्रतियोगिताको द्वितीयः यथा पटत्वेन घटो नास्तीति । इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वावच्छिन्नवाच्यत्वनिष्ठप्रति-योगिताकाभावस्याप्रसिद्धत्वेऽपि समवायित्वरूपव्यधिकरणधर्मव-च्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावः प्रसिध्यत्येव, तस्य केवला-न्वयित्वात्, अतो नाप्रसिद्धिनिबन्धना अव्याप्तिरिति ।

अत्र मणिकाराः – साध्याभाववद्वृत्तित्वरूपव्यभिचारशरीर-प्रविष्टसाध्याभावपदेन साध्यनिष्ठप्रतियोगिताकाभावमात्रविवक्षण उक्तरीत्या समवायित्वेन वाच्यत्वाभावमादाय तद्वति घटादौ ज्ञेय-त्वसत्त्वेन ज्ञेयत्वस्य व्यभिचारित्वापत्त्या साध्यतावच्छेदकावच्छिन्न-साध्यनिष्ठप्रतियोगिताकाभावस्यैव विवक्षणीयतया व्यभिचारा-भावरूपव्याप्तिशरीरेऽपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिताका-भाव एव विवक्षणीयः । अन्यथा वह्निमान् धूमादित्यादौ तत्तद्व-

ह्यचभावमादायाव्याप्त्यापत्तेः, व्याप्तेर्व्यभिचाराभावरूपतानुपपत्तेश्च। इत्थं च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्वीकारेऽपि न प्रकृतोपयोगः। समवायितया वाच्यत्वाभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वाभावात्, वाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य चाप्रसिद्धेरिति समादधिरे।

तदनु यथा व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकता स्यात् यथा च तमादाय इदं वाच्यं ज्ञेयत्वादित्यादौ समन्वयः स्यात् तथा अव्यभिचाररूपव्याप्तिलक्षणं परिष्कुर्म इति कैश्चित् लक्षणेषु परिष्कृत्योक्तेषु सत्सु 'प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः' इति ग्रन्थेन व्यधिकरणधर्मावच्छिन्नाभाव एवाप्रामाणिक इति मणिकारैः समाहितम्। एवं च 'प्रतियोग्यवृत्तिश्च' इति ग्रन्थावतरणिकाव्याजेन चतुर्दश लक्षणानि शङ्कितानि। अत एव चतुर्दशलक्षणीति ग्रन्थनाम प्रववृते।

तत्र दीधिकारीये द्वे लक्षणे स्वलक्षणपदव्यपदेश्ये, चक्रवर्तिनः त्रीणि लक्षणानि, प्रगल्भस्य लक्षणद्वयम्, विशारदस्य एकं लक्षणम्, मिश्रस्य त्रीणि लक्षणानि, दीधितिकारीयं कूटाघटितलक्षणं एकम्, वासुदेवसार्वभौमीयं कूटघटितलक्षणमेकम्, कूटघटितपुच्छलक्षणमेकं चेति चतुर्दश लक्षणानि। तानि क्रमशो यथा –

1) **प्रथमस्वलक्षणम्** – यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्।

2) **द्वितीयस्वलक्षणम्** – यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वम्।

3) **चक्रवर्तिनः प्रथमलक्षणम्** – व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगिताया अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

4) **चक्रवर्तिनः द्वितीयलक्षणम्** – हेतुसमानाधिकरणस्य व्याप्यवृत्तेः अभावस्य प्रतियोगितायां सामानाधिकरण्येनानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

5) **चक्रवर्तिनः तृतीयलक्षणम्** – हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्य अभावस्य प्रतियोगितायां सामानाधिकरण्येनानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः।

6) **प्रगल्भस्य प्रथमलक्षणम्** – साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वम् व्याप्यत्वम् ।

7) **प्रगल्भस्य द्वितीयलक्षणम्** – यत्समानधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं व्याप्यत्वम् ।

8) **विशारदलक्षणम्** – साध्याभाववति यदवृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिः ।

9) **मिश्रस्य प्रथमलक्षणम्** – यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणनिरूपितवृत्तित्वाभावाः तद्वत्त्वं व्याप्यत्वम् ।

10) **मिश्रस्य द्वितीयलक्षणम्** – यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम् ।

11) **मिश्रस्य तृतीयलक्षणम्** – यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम् ।

12) **शिरोमणेः कूटाघटितलक्षणम्** – वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः ।

13) **सार्वभौमस्य कूटघटितलक्षणम्** – वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वम् ।

14) **पुच्छलक्षणम्** – साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयः तद्वत्त्वं व्याप्तिः ।

अस्याः चतुर्दशलक्षण्याः शुद्धं मुद्रणं बहोः कालात् प्राक् काञ्चीपुर्यां सुदर्शनमुद्रणालयस्थापकैः महामहोपध्यायैः प्रतिवादिभयंकर–अनन्ताचार्यस्वामिभिः संपादितम् । परं तु बहुकालात् प्रागेव दुर्लभमिदं पुस्तकमिति छात्राः विद्वांसश्च नितरां क्लेशमनुभवन्ति । अस्य पुनर्मुद्रणं राष्ट्रियसंस्कृतसंस्थाननिदेशकैः अनुमतमिति तेभ्यः पण्डितलोकः अधमर्णः भवति । अतः तेभ्यः कृतज्ञतां निवेदयामि । पुनर्मुद्रणार्थमनुमतिं दत्तवद्भ्यः अनन्ताचार्यस्वामिपुत्रेभ्यः गाधिकृष्णमाचार्यस्वामिभ्यः सनमोवाकं कृतज्ञतां व्याहरामः । पुनर्मुद्रणं सम्यक्कृतवद्भ्यः उदयप्रिण्टर्स् अधिकारिभ्यः कृतज्ञो भवामि ।

तिरुपतिः

इति

एन्· एस्. रामानुजताताचार्यः

केन्द्रीयसंस्कृतविद्यापीठम्

श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

तत्त्वचिन्तामणौ

चतुर्दशलक्षणी ।

अथ – " इदं वाच्यं ज्ञेयत्वा " दित्यत्र समवायितया वाच्यत्वाभावो घटएव प्रसिद्धः

[दीधितिः ।]

समवायितये ति ।

[गदाधरीयम् ।]

अथ **समवायितये** ति मूलं व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगम एव सङ्गच्छते, तादृशाभावाभ्युपगमे सर्वत्र तादृशाभाववति हेतोर्वृत्तेरसम्भवः, साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सौन्दलमतमवलम्ब्य लक्षणकर्तुरीदृशाऽऽशङ्का न सङ्गच्छत इति चेत्?—

अत्रोपाध्यायानुयायिनः — केवलान्वयिनि साध्याभावाप्रसिद्धि-निबन्धनस्य दोषस्य उद्भावितत्वात् साध्याभावस्य कथंचित्प्रसिद्धत्वात् लक्षणस्य निर्दोषतेत्यभिमानेन इयमाशङ्का; तादृशाभिमानमेव निराकरिष्यत्ग्रे तर्हीति ग्रन्थेन, व्यधिकरणधर्मावच्छिन्नाभावोपगमेपि यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते, तथा व्याप्तिलक्षणेपि तादृशसाध्याभाव एव निवेश्यः, अन्यथा असम्भवस्य अतिव्याप्तेर्वा प्रसक्तेः व्याप्ते रव्यभिचाररूपताऽनुपपत्तेश्चेति पुन रग्र सिद्धिनिबन्धनाव्याप्तिः केवलान्वयिस्थल इति हि तदर्थः, नचैवं तत्तद्व-ह्नित्वावच्छिन्नाभावव्यावर्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेण साध्याभावस्य निवेशनीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्य अतादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का?, साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याशङ्का-बीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य तादृशाभावस्य च प्रसिद्धिसम्भवेन सौन्दल मतावलम्बनस्य निर्बीजत्वापातादिति वाच्यम्, महानसीयवह्नित्वा-द्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्याप्तस्वसमानाधिकरणधर्मनिष्ठा ऽवच्छेदताकप्रतियोगिताभिन्नप्रतियोगिताकाभाव एव निवेश्य इत्यभिमानेन आशङ्कासङ्गतेः, प्रमेयत्वादिना प्रमेयमात्रं यत्र साध्यतावच्छेदकम्, तत्र प्रमेयत्वादिविशिष्टप्रमेयापर्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धम्, स्वसमानाधिकरणवृत्तितादृशावच्छेदकतानिरूपकप्रतियोगिता भिन्नं च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामात्रमेव; यत्र यादृशं साध्यता वच्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्वसमानाधिकरणधर्मा-वच्छिन्नत्वोभयाभाववत्प्रतियोगितानिवेशाभिप्रायको वा अयं ग्रन्थ इत्याहुः।

नचैवं प्रमेयत्वावच्छिन्नसाध्यकस्थलेपि व्यधिकरणधर्मावच्छिन्नाभावमात्रमादायैव लक्षणसमन्वयसम्भवात् दीधितिकृतां तत्र गगनत्वघटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्याभावपर्यन्तानुसरणप्रयासो व्यर्थ इति वाच्यम् ; महानसीयवह्न्नित्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगिताकः साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मवृत्त्यवच्छेदकताकान्यप्रतियोगिताको वा ऽभावो निवेश्यः, तदभिप्रायेणैव तैस्तथाविधाभावानुसरणात् । नच घटत्वपटत्वोभयावच्छिन्नाभावप्रतियोगितावच्छेदकता साध्यवृत्तिधर्मनिष्ठैव, घटत्वपटत्वयोः प्रत्येकं साध्यनिष्ठत्वादिति कथमसौ लक्षणघटकः ? इति वाच्यम् ; "साध्यवृत्तिधर्मनिष्ठे" त्यनेन यत्पर्याप्तयधिकरणधर्मविशिष्टाधिकरणं साध्यवत् तत्त्वस्य विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावा ।

वस्तुतो वृत्तिमद्वृत्तयो यावन्त स्साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावा स्तद्वत्त्वमेव **साध्याभाववदवृत्तित्वमित्यस्यार्थ** इत्यभिप्रायकतया **अथे** त्यादिग्रन्थः सार्वभौमैर्व्याख्यातः; दीधितिकृतामपि तादृशग्रन्थस्य एतदभिप्रायकत्वमेवाऽनुमतम् . कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेप्यापाततः सम्भवदुक्तिकतयैव शङ्कितुरभिप्रायविषयत्वौचित्यात् व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य **प्रतियोग्यवृत्तिश्चे** त्याद्यवतारणमनुचितमित्यभिप्रेत्यैवचाग्रे तल्लक्षणमाक्षेप्यमिति न सन्दर्भविरोधः । **यत्समानाधिकरणा** इत्यादिलक्षणाभिप्रायकता चात्र न युज्यते, तादृशव्याप्तेस्साध्याभाववदवृत्तित्वरूपत्वाप्रसक्तेरुक्तलक्षणपरिष्कारासम्भवात् । व्यभिचारशरीरे च साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेन साध्याभाव-

वद्वृत्तित्वाभावस्य व्याप्तित्वे निराकृते च साध्याभाववद्वृत्तित्वपदार्थस्य व्याप्तित्वानभ्युपगमेपि न क्षतिरित्याशयेन यदित्यादिनिर्दोषलक्षणमव लम्ब्य **प्रतियोगी** त्यादेः स्वयमवतारणीयत्वात् । नच साध्याभाववद वृत्तित्वाभावस्य व्यभिचारत्वानभ्युपगमेपि साध्यतावच्छेदकसमनियत प्रतियोगिताकाभावकूटवद्वृत्तित्वस्य व्यभिचारत्वसम्भवादुक्तव्याप्तेरव्यभि चाररूपत्वमक्षतमिति वाच्यम् , तस्य व्यभिचारपदार्थत्वे **नचैव** मित्यादिदर्शितायाः ज्ञेयत्वे वाच्यत्वव्यभिचारित्वव्यवहारापत्तेर्दुर्वारत्वात् , तस्यापि व्यधिकरणधर्मावच्छिन्नतादृशाभाववद्वृत्तित्वेनोक्तलक्षणवत्त्वादिति सर्वमनाकुलम् ।

एवंच कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुधावनं ग्रन्थकृतां सफलम् , घटत्वावच्छिन्नपटत्वाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादिति ध्येयम् ।

ननु-- वाच्यत्वं पदशक्तिः, सा च तत्तत्पदबोद्धव्यत्वप्रकारिका भगवदिच्छैव, न तु पदार्थान्तरम् , अपसिद्धान्तत्वात् ; तथाच समवायित्वं सगवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु, उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्?. नच भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेः घटादिपदावाच्यत्वानुपपत्तिः,घटादाविव पटादावपि घटादिपदबोद्धव्यत्वप्रकारिकाया भगवदिच्छाया विषयतासम्बन्धेन सत्त्वात् तादिच्छाया एकत्वादिति वाच्यम्; यद्धर्म्यंशे यस्य प्रकारता तस्यैव धर्मिणो विशेष्यतासम्बन्धेन तद्धर्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेः घटादिपदबोध्यतया भगवदिच्छया अनवगाहनात् , तत्र विशेष्यतासम्बन्धेन तद्बोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः ।

नचैवं विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेषणांशे समवायित्वाभावात् तेन रूपेण विशिष्टाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिता

[दी] वाच्यत्वं यथा न समवायि, तथाऽग्रे वक्ष्यते;

कत्वमव्याहतमेवेति वाच्यम्, यतो विशिष्टाभावप्रतियोगिता न विशेषणान्तर्भावेण पर्याप्ता, अपि तु विशेष्यांशमात्रे, अवच्छिद्यते पुनरियं विशेषणेन, प्रतियोगितायां अव्यासज्यवृत्तित्वात्; तथाच विशेष्यवृत्तेः समवायित्वस्य कथं प्रतियोगिताव्यधिकरणत्वमिति । नच प्रतियोगितायां व्यासज्यवृत्तित्वानुपगमे सर्वत्र घटत्वेन घटपटोभयं नास्तीति प्रतीतिः कथमुपपद्यताम्?, घटादिमति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेन तद्विषयाभावादिति अभावविशेषीयप्रतियोगित्वमवश्यमेव व्यासज्यवृत्त्युपेयम्, तथा सति तत्र प्रतियोगितापर्याप्त्यधिकरणस्य उभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासम्भवात् यद्धर्मावच्छिन्ने प्रतियोगितायाः पर्याप्तिः प्रतियोगितावच्छेदकविशिष्टस्य तदवच्छिन्नस्यैव अभावविरोधितया न तादृशाभावस्य सार्वत्रिकत्वानुपपत्तिरिति वाच्यम्; प्रतियोगितायां अव्यासज्यवृत्तित्वेपि तत्रैकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनो घटत्वघटपटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात् तादृशाभावस्य विरुद्धघटत्व पटत्वाद्युभयावच्छिन्नाभाववत् केवलान्वयित्वोपपत्तेः । यद्यपि घटपटौ न स्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेण पर्याप्तम्, तथापि तत्र द्वित्वधर्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकता प्रतीयते, अत्र स्वातन्त्र्येणापीति भेदः. आस्तां वा उभयाभावप्रतियोगितायाः गत्यन्तराभावाद्वयासज्यवृत्तित्वम्, तथापि विशिष्टाभावप्रतियोगितायां स्तथात्व मप्रामाणिकमेव, दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेरित्यत आह- दण्डिनी वाच्यत्वं यथेति । तथाऽग्रे वक्ष्यत इति । अयमाशयः—

[दी] घटादिसमवायितयेत्यर्थ इत्यप्याहुः । प्रमेयसाध्यके च भावत्वेन

वाच्यत्वं शक्तिविषयत्वम् , न तु शक्तिः, धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापत्तेः; विषयत्वं च पदार्थान्तरमिति प्राचीननैयायिकैकदेशिसिद्धान्तः. तस्य च समवायो न सम्बन्धः, अपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेति एकदेशिमतानुयायितया मणिकारलिखनसङ्गतिरिति ।

घटादिसमवायितये ति । तथाच वाच्यत्वपदस्य भगवदिच्छापरत्वेपि नासङ्गतिरिति भावः । यथाश्रुतपरतयैवोपपत्तेः समवायिपदस्य विशेषपरतया व्याख्यानमनुचितमिति **आहु** रित्यनेनाऽस्वरसः सूचितः । ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धे स्सम्भवेपि प्रमेयत्वादिना प्रमेयसामान्यसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्वारैव, प्रमेयसामान्यावृत्तिधर्मस्याप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तस्यासम्भवादित्यत आह—**प्रमेयसाध्यकेचे** ति। **भावत्वेने** ति । **अभावनां भावाना** मित्युभयत्रैवा ऽभाव इत्यग्रिमस्य सम्बन्धः.अभावत्वभावत्वाभ्यां भावाभावयोरभावौ समनियततया अभिन्नाविति तत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यमित्येतादृशाभावोपि कूटघटनया परिष्करणीयसाध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटको भविष्यतीत्यभिप्रायः । नच यदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके च तादृशाभावाप्रसिद्धिः, निखिलव्यधिकरणधर्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगित्वात् , किञ्चिद्विशिष्टस्वाभावादेरपि वह्न्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकतेति वाच्यम् ,

[दी] अभावाना मभावत्वेन भावानां वह्नित्वेन निर्वहौ अवृत्तिमात्रवृत्ति·

समनैयत्यशरीरे व्यापकताया स्तदभावप्रतियोगितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात् ।

ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकता चेत्समनैयत्यशरीरे निवेश्यते ? तदा व्यधिकरणधर्मावच्छिन्नयोर्भावाभाववृत्तिप्रतियोगित्वयोर्द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतया नोक्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्यतः अभावान्तरमाह – **वह्नित्वेने** ति । **प्रमेयमात्रस्य अभाव** इत्यग्रेतनेनान्वयः । वह्नित्वेन प्रमेयं नास्तीति प्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात् प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भावः । यदि च– तत्र वह्निर्नास्तीति प्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते. युक्तंचैतत् ; अन्यथा प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे वह्निर्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगिताया वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्मावच्छिन्नवह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना वह्न्याद्यभावीयवह्निमात्रप्रतियोगितामादाय वह्निमान्प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेः इत्युच्यते?, तदा तादृशाभावस्य नोक्तरूपतेत्याशंक्याभावान्तरमनुसरति— **अवृत्तिमात्रे** ति । गगनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ **गगनभिन्नत्वादि**सामानाधिकरण्येन प्रतीयते, अवच्छेदकैक्ये असति बाधके प्रतियोगितायाअप्यैक्यस्वीकारात् गगनभिन्ननिष्ठप्रतियोगिताया गगनवृत्तित्वेपि गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽवृत्तित्वेन गग-

नत्वेन गगनभिन्नाभावस्य केवलान्वयित्वोपपत्तेः । वह्नित्वाद्यवच्छिन्न घटादिनिष्ठप्रतियोगितायाश्च वह्निनिष्ठतादृशप्रतियोगित्वाभेदे वह्न्यादिमति वह्नित्वादिना घटाद्यभावसत्त्वानुपपत्त्या उक्तरीत्या एकप्रतियोगितापत्त्यसम्भवः, एवंच गगनत्वावच्छिन्नैव प्रमेयत्वसमनियतप्रतियोगिता प्रसिध्यतीति भावः. उक्तविशेषलाभायैव अवृत्तिमात्रवृत्तित्वकीर्तनम् ।

नन्वेवमपि यत्र विषयितासम्बन्धेन प्रमेयसामान्यं साध्यं ईश्वर ज्ञानत्वादिक हेतुः तत्र सत्तावान् जातेरित्यादौ साध्याभावकूटवति हेतु तावच्छेदकसम्बन्धेन वृत्त्यप्रसिध्या अव्याप्तेर्वारणायोपादेयसाधनसामानाधिकरण्यरूपविशेषणाक्रान्तसाध्यतावच्छेदकसमनियत साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धिः, गगनादेरपि विषयितासम्बन्धेन ईश्वरज्ञानादि सम्बद्धत्वात्तादृशसम्बन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासम्भवादित्यतोऽभावान्तरमाह— **विरुद्धे** ति । येन सम्बन्धेन घटत्वपटत्वाद्योर्विरोधः, तत्सम्बन्धावच्छिन्नतदुभयनिष्ठ प्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थः । प्रतियोगितावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्व पटत्वाद्यवच्छिन्नप्रतियोगिनो ऽप्रसिध्या विरोधिविरहेणाभावस्य केवलान्वयितेत्यवधेयम् ।

इदमुपलक्षणम्—व्यधिकरणधर्मावच्छिन्नाभाववादिनां प्रतियोगितावच्छेदकतावच्छेदकरूपेणेव तादृशसम्बन्धेनाप्यवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात् समवायादिसम्बन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम् । अत्यन्ताभावस्येव अन्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्योपगमात् प्रमेयसामान्यस्य यत्र तादात्म्येन साध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा

[दी] सुलभः । ननु पारिभाषिकमेवाऽव्यभिचरितत्वम्, तथाहि;— यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-

---

प्रमेयसामान्यभेदो लक्षणघटकः, प्रतियोगितावच्छेदकावृत्तिसमवायित्वा द्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथेत्यवधेयम् ।

॥ इति व्यधिकरण धर्मावच्छिन्नाभावावतरणम् ॥

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचाराभाव रूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य घटकतया अप्रसिद्धि निबन्धनाऽव्याप्ते र्दुरुद्धरतयैव वादिनो निवृत्तेः व्यधिकरणधर्मावच्छिन्ना भावखण्डनपरग्रन्थानुत्थितिरित्यतः तादृशग्रन्थमवतारयति— **नन्वि** त्यादिना । **पारिभाषिक** मिति । तान्त्रिकसङ्केतरूपपरिभाषया व्याप्ति प्रतिपादकम्, न तु योगेनेत्यर्थः । **अव्यभिचरितत्वम्**— अव्यभि चरितत्वपदम् । अथवा **पारिभाषिकमव्यभिचरितत्वम्**—परिभाषया अ व्यभिचरितत्वपदप्रतिपाद्यम् ; व्याप्यत्वमिति शेषः, न तु योगेन तत्पद लभ्यमित्यर्थः, तथाच व्यभिचारघटकसाध्यतावच्छेदकावच्छिन्नसाध्या भावस्य व्याप्तिघटकत्वविरहेपि न क्षतिरिति भावः ।

य दिति । यत्पदं यद्धर्मावच्छिन्नपरम्, अग्रे तत्पदमपि तद्धर्मा वच्छिन्नपरम् ; स च धर्मो हेतुतावच्छेदकीभूतधूमत्वादिः; सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेष णाक्रान्तो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको घटत्वादिना वह्न्यभा वादिरेव, तस्य च प्रतियोगिसामानाधिकरण्यमावश्यकमिति लक्षणसमन्वयः ।

व्यभिचारिणि — व्यभिचारनिरूपकाधिकरणीभूतहेत्व धिकरणे साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तः साध्यतावच्छेदकाव च्छिन्नप्रतियोगिताकसाध्याभावादिरपि, तस्य च प्रतियोगिसामा-

२

नाधिकरण्याभावात्, तादृशाभावस्य प्रतियोग्यधिकरणे कालिकसम्बन्धेन वृत्तावपि विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगि सामानाधिकरण्यस्य विरहान्नातिव्याप्तिः; अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिकमादायाव्याप्ते र्वारणाय हेतुसामानाधिकरण्य मभावविशेषणम्, अभाववृत्तौ सम्बन्धभेदानिवेशेन वह्नि मान् धूमादित्यादौ वह्नित्वादिना वह्न्याद्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसमन्वयसम्भवात् न तत्राव्याप्ते र्वारणं तत्फलमिति ध्येयम् । अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नाऽऽत्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः, अतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकविशिष्टत्वनिवेशः । यद्यपि अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते. धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य धूमाद्यभावस्य प्रतियोगि सामानाधिकरण्यावश्यकत्वेपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगि सामानाधिकरण्यस्यैव विवक्षणीयतया अयोगोळकान्तर्भावेण तादृशाभावस्याऽतथात्वान्नातिव्याप्तिः, स्वविशिष्टहेत्वधिकरणे त्यत्र यत्पदेनैव हेतोरुपादेयतया तत्त्व मित्यत्र तत्पदेन तस्यैव परामर्शात् व्याप्तेर्हेतुनिष्ठत्वोपपत्तिरिति; तथापि कपिसंयोगाभाववान् जातित्वादित्यादौ साध्य समानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणा प्रसिद्धया सत्तावानात्मत्वादित्यादौ सत्ताधिकरणकाले कालिकसम्बन्धेन वर्तमानस्य सत्ताभावस्य तदप्रसिद्धया अव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तम् ।

यत्तु – अयमात्मा ज्ञानादित्यादौ आत्मत्वत्वादिना आत्मत्वादेरभावस्य लक्षणघटकत्वेपि नाव्याप्तिः, तस्यापि प्रतियोग्यधिकरणीभूते

[दी] प्रतियोगिताका यावन्तो ऽभावाः प्रतियोगिसमानाधिकरणाः तत्त्वम् । सर्वत्र वाच्यत्वाद्यभावस्य तथात्वा द्यावत्त्वोपादानम् ;

आत्मादावेकज्ञानविषयत्वस्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धेन वर्तमानतया प्रतियोगिसमानाधिकरणत्वादिति सामानाधिकरण्यान्तविशेषणमनर्थकमिति; तन्न; एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात् । नचैवमपि **यदभावो व्यभिचाराविरोधी** त्युपाधिलक्षणे इहोपाधिर्नेहोपाधिरिति प्रतीतिव्यवहारानुरोधेना ऽव्याप्यत्वस्य सम्बन्धताया **ग्रन्थकृतैव** स्वीकृतत्वात् तेन सम्बन्धेनैवात्मवृत्तेरात्मत्वाभावस्य प्रतियोगिसामानाधिकरण्यमक्षतमेवेति वाच्यम् ; अव्याप्यत्वादे स्सम्बन्धतायां विवादेन यदभावपदस्य यदव्याप्यत्वाद्यभावपरतामभ्युपगम्यापि ग्रन्थकृता तादृशलक्षणव्याख्यानात् तत्सम्बन्धताया अप्रामाणिकताभिप्रायेणैवाऽत्र **यत्समानाधिकरणा** इत्युपादानात् । यावत्पदासत्त्वे **साध्यतावच्छेदके** त्यादि विशेषणस्य व्यावृत्तिर्नसङ्गच्छते, यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवात् ; अतश्चरमोक्त्यापि तत्पदव्यावृत्तिं प्रथमतो दर्शयति— **सर्वत्रे** ति । **तथात्वात्**— प्रतियोगिसमानाधिकरणत्वात् । तथाच यावत्पदाऽदाने व्यभिचारिमात्र एव अतिव्याप्तिरिति भावः ।

यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्वत्र तादृशाभावस्य तथात्वकथनमसङ्गतम् , तथापि यावत्पदानुपादाने अतिव्याप्तिरेव, नाव्याप्तिः इत्येतत्सूचनाय **सर्वत्रे** त्युक्तम् । अथवा; **सर्वत्र**— सर्वाधिकरणावच्छेदेन. तथाच विवक्षणीयस्य स्वविशिष्टयावद्धर्त्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम् । ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगितांकत्वेनैवाभावो विशेषणीयः,

[दी] अतएव "भूतत्वमूर्तत्वोभयवान् मूर्तत्वा"दित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येपि भूतत्वमनोन्यत्वाद्यभावस्या ऽतथात्वात्

तद्व्याप्यत्वं च स्वव्यापकतत्कत्वम् ; अतो नानवस्था; वह्निमान् धूमा दित्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयसामानाधिकरण्यविरहेपि घटत्वादिना वह्न्याद्यभावमादा-यैव लक्षणसङ्गतिः, इत्थंच धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसम्भवः, तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघट कताविरहात् , एवं सति हेतुसमानाधिकरणत्वविशेषणमनर्थकमिति चेत्? तदपि. तर्हि त्यज्यतामित्याशङ्कापरिहाराय तथाविधाभावनिवेशनेपि यत्रा तिव्याप्तिस्तत्र **यावत्पदस्य** व्यावृत्तिमाह– **अतएवे** ति । **अतएव**— यावत्पदोपादानादेव । **द्वित्वावच्छिन्नाभावस्य** भूतत्वमूर्तत्वाभेयत्वावच्छि न्नाभावस्य । **प्रतियोगिसामानाधिकरण्येपि**— मनसि अभावविशिष्ट हेत्वधिकरणे मूर्तत्वरूपप्रतियोगिसामानाधिकरण्येपि । **तथाच** यावत्पदा नुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रति योगिसमानाधिकरणतया अतिव्याप्तिः स्यादिति भावः ।

यावत्पदसत्त्वे यादृशाभावमादायातिव्याप्तिवारणं तादृशाभावं दर्श यति – **भूतत्वमनोन्यत्वाभावस्ये** ति । भूतत्वाभावस्य मनोन्यत्वा भावस्यचेत्यर्थः । **अतथत्वात्** – प्रतियोग्यसमानाधिकरणत्वात् । याव-त्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यभावमादायाव्याप्तिस्या-दिति यथोक्तविशेषणस्यैवोपादेयतया तादृशाभावयोरपि लक्षणघटक-त्वादिति भावः । भूतत्वस्य बहिरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानां चालिनीन्यायेन उत्पत्तिकाला-

वच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेना ऽखण्डव्याप्यवृत्तिमनोभेदाभावानुधावनम् । उक्तरीत्या **अतएवे** त्यादि ग्रन्थावतारात् प्रथमतो वाच्यत्वाभावमादाय सर्वत्रैव व्यभिचारिण्यति व्याप्तेर्दर्शितत्वात् साध्याभावमादाय व्यभिचारिविशेषे अतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्काऽनवकाशः ।

केचित्तु-- यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्ये अतिव्याप्तिर्विश्राम्यतु, साध्याभावमादायापि क्वचिदति व्याप्तिस्स्यात्, सा च यावत्पदोपादानान्नभवतीत्यभिप्रायकतया न सन्दर्भ-विरुद्धमित्याहुः ।

परे तु– ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभाव निवेशेनैवोपपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगि-ताकयावदभावनिवेशनमफलम्, तादृशप्रतियोगिताकत्वविशेषणव्यावर्तनी-यस्य तत्तद्वह्न्याद्यभावस्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेनोक्तविशेषणे-नापि व्यावर्तनसम्भवात् अत आह– **अत एवे** ति । यत एव साध्यताव च्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वमुपात्तम्, न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे, तत एवेत्यर्थः । **भूतत्वे** ति । साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ भूतत्वाभावमनोन्यत्वाभावप्रतियोगिताया उभयत्वाव्यापकत्वेन उभयत्वावच्छिन्नाभावादेरेव लक्षणघटकतया अतिव्याप्तिस्स्यात्, यथोक्त विशेषणाक्रान्ताभावनिवेशे च भूतत्वमनोन्यत्वाद्यभावानामपि लक्षणघटक-तया नातिव्याप्तिरिति भावः । नच साध्यतावच्छेदकव्यापकप्रतियोगि ताकाभावनिवेशेपि हेतुसमानाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगिसा-वच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः, साध्यता-

[दी] नातिप्रसङ्गः । साधनसमानाधिकरणगोत्वाद्यभावस्य

वच्छेदकव्यापकतायाः लक्षणे निवेशे तादृशव्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्य निवेशासम्भवात् प्रतियोगितावच्छेदकसम्बन्धेन तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम्; प्रतियोगितावच्छेदक सम्बन्धेन तत्सामानाधिकरण्यनिवेशेपि वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणस्य वह्नित्वव्यापकप्रतियोगिताकस्य पर्वतभिन्न भेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं पर्वतान्तर्भावेण नास्तीत्यव्याप्तिप्रसङ्गापत्त्या तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासम्भवात् साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यमगत्या वाच्यम्, तथाच मनोभिन्नभेदस्य तेन सम्बन्धेन मूर्तत्वादि रूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तेः. साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्यमाणस्थलान्तरेप्यतिव्याप्तिरस्त्या दिति तु नास्मा (कमेव)कं दोष इत्यभिप्राय इति व्याचक्रुः;—

तँत्तु न समीचीनतया प्रतिभाति, साध्यतावच्छेदकेत्यादिविशेषण व्यावृत्तेः पश्चाद्वक्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदकावच्छिन्नेत्यादि विशेषणस्थले साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविशेषणं किन्नोपात्त मित्याकांक्षोदयात् आदावेव तादृशविशेषणपरित्यागबीजकथनस्या ऽसङ्गतत्वादिति ।

गोत्वाद्यभावस्ये ति । प्रतियोग्यसामानाधिकरण्यादित्यर्थकेना ऽतथात्वा दित्यनेनान्वयः; तथाच साध्यतावच्छेदकेत्याद्यनुपादाने असम्भव इति भावः । यद्यपि गोत्वाभावादेरपि पूर्वक्षणवृत्तित्वादिविशिष्ट स्वाभावरूपप्रतियोगिसामानाधिकरण्यं पर्वतादावप्यस्ति, तथापि व्यापकतायां लक्षणाघटकत्वे साध्यतावच्छेदकसम्बन्धेन भावरूपप्रतियोगि-

व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात्। नचैवं घटएव व्यभिचारः.साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं हि व्यभिचारः

तत्तत्साध्यव्यक्त्यभावस्य वा ऽतथात्वा त्साध्यतावच्छेदके त्यादि ।

सामानाधिकरण्यं धूमवान् वह्नेरित्यादौ धूमाभावादेः पूर्वक्षणवृत्तित्वादि विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तेर्वारणाया ऽवश्यं विवक्षणीयम्, तथाचायमसम्भव इति भावः । साध्यप्रतियोगिकाभाव निवेशेपि गोत्वाद्यभावमादायासम्भवस्य वारणसम्भवात् **तत्तत्साध्यव्यक्तय भावस्ये** ति । अस्य च "नानाव्यक्तिसाध्यके" इत्यादिः, तथाच साध्याभावनिवेशेपि वह्निमान् धूमादित्यादावव्याप्तिस्स्यादिति भावः । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वञ्च, साध्यतावच्छेदकावच्छिन्न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेकत्वम् । गुणकर्मान्यत्वविशिष्ट सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वा द्यभावीयप्रतियोगिताया न साध्यवन्निष्ठाभाप्रतियोगितानवच्छेदकत्वम्, सत्तावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्वात् अतो विशिष्ट सत्ताद्यभाव एव लक्षणघटकः. तस्य च गुणादौ सत्तादिरूपप्रतियोगि समानाधिकरणत्वादतिव्याप्तिः, अतः साध्यतावच्छेदकावच्छिन्नत्वोपादानम्. तथा च सति द्रव्यत्वाभावप्रतियोगितायां अपि विशिष्टसत्तात्वाद्यवच्छिन्न-वन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशाभावानां च गुणादावतथा-त्वान्नातिव्याप्तिः; यत्किंचिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च सत्तावान् जाते रित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वाभावादिक मादायाव्याप्तिर्बोध्या ।

साध्यवत्त्वं च साध्यतावच्छेदकसम्बन्धेन बोध्यम्. अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोळकान्यत्वाभावादिप्रतियोगितायाः कालिकविशेषणतात्रिषयितादिसम्बन्धेन धूमाधिकरणकालज्ञानादौ संयोगादिसम्बन्धेन स्वावच्छिन्नाभावसत्त्वात् न केनापि सम्बन्धेन व्यापकतावच्छेदकत्वमिति केवलान्वयिवाच्यत्वादिनिष्ठप्रतियोगितैव स्वरूपादिसम्बन्धघटितव्यापकतावच्छेदिका स्यादित्यतिव्याप्तिः । नच सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयविषयतासम्बन्धावच्छिन्नप्रतियोगितानवच्छेदिका या प्रमानिष्ठप्रतियोगिता तन्निरूपकप्रमाभावस्य च न वक्षणीय - साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन स्वविशिष्टयावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंयोगादिसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसम्बन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धस्यापि घटकतया तेन सम्बन्धेनाऽयोगोळकादौ प्रतियोगिनोऽसत्त्वादिति वाच्यम् ; यतो विषयताया विषयतात्वैनैव सम्बन्धता प्रामाणिकी, न तु तथाविधविशेष्यतात्वेनेति. परन्त्वेतादृशदिशा समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतावेवातिव्याप्तिवारणं सम्भवति, तत्र ज्ञानाभावस्य सम्बन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहादिति । नच सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावः तदीयसम्बन्धसामान्यावच्छिन्नप्रतियोगितायां धूमाद्यभावीयसम्बन्धसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकं संयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन धूमादेर्यकिञ्चित्सम्बन्धेन धूमादित्यभावसत्त्वेपि सम्बन्धत्वरूपव्यापकधर्मावच्छिन्न

प्रतियोगिताक तदभावसत्त्वात्; तथाच धूमाद्यभावस्यापि लक्षणघटक तया तस्य च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यत्वानिरू पितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटक संयोगत्वाद्यवच्छिन्नसंयोगादि सम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिरिति वाच्यम्; सम्ब न्धत्वेन सम्बन्धानां अभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावात् तेन रूपेण सम्बन्धानां व्यापकताघटकत्वासम्भवात् ।

वस्तुतस्तु प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वात-न्त्र्येण निवेशस्य प्रतिक्षेप्यत्वात् ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्ति रस्त्येव । वस्तुतस्तु संयोगसमवायादिसाधारणानुगतसम्बन्धत्वस्य कथ ञ्चित्सुवचत्वेपि तेन रूपेण संयोगादीनां सम्बन्धतया भानस्य निर्युक्तिक-तया व्यापकताशरीरे लाघवानुरोधात्साध्यप्रकारेणाधिकरणनिवेशे साध्य सम्बन्धोपि विशिष्य संसर्गतया निवेश्यः, तथाच विशिष्य साध्यता बच्छेदकसम्बन्धनिवेशनमावश्यकमिति ध्येयम् । यत्किंचित्सम्बन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विषयिता सम्बन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगित्वाया अपि व्यापकतावच्छेद-कतया तादृशाभावस्य लक्षणघटकत्वे तस्य च पर्वतादौ प्रतियोगिसामानाधि करण्यविरहादसम्भवो बोध्य इति साध्यतावच्छेदकसम्बन्ध एव संसर्गतया विशिष्य निवेश्यः. साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे सर्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया तादृशाभावाप्रति-योगिनो ऽप्रसिद्धिरित्यतोऽवच्छेदकगर्भता. तादृशाभावप्रतियोगितावच्छेद कत्वं च तादृशप्रतियोगितायां समानाधिकरणं सत् यदवच्छेदकं तदन्य त्वम्; अन्यथा व्यतिरेकिप्रतियोगितामात्रस्यैव व्यधिकरणधर्मतया साध्य वन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्वपटत्वोभयाद्यवच्छिन्नप्रति-

योगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिव्याप्ति प्रसङ्गात् ।

यत्तु– साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्व निवेशेनैव सर्वसामञ्जस्ये निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलम् ; वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्यभावप्रतियोगिनां वह्न्यादीनां चालिनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेपि घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात् , व्यभिचारिणि व्यभिचारनिरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारणसम्भवाच्च । नच साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यम् , व्यापकतावच्छेदघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नत्वस्याधिकस्य निवेशनीयतया एतन्मते तदनिवेशेन लाघवात् , तन्मते तदनिवेशे सर्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयितादिसम्बन्धेन स्वावच्छिन्नस्याभावः तत्प्रतियोगितावच्छेदकतया , व्यापकतावच्छेदकप्रतियोगिताया एवाप्रसिद्ध्यापत्तेः, भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसम्बन्धावच्छिन्नत्वस्यैतन्मते निवेशवत् भवन्मतेप्यभावप्रतियोगितायां तन्निवेशस्यावश्यकतया तदंशे साम्यादिति ;

तदसत् ;— यतोऽनवच्छेदकप्रतियोगिकत्वं अनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वम्, प्रतियोगितायां तन्निष्ठत्वं च स्वरूपसम्बन्धेन वाच्यम्, अन्यथा वह्निमान् धूमादित्यादावपि विषयतासम्बन्धेन साध्यव्यापके प्रमेयमित्याकारकविश्वविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावप्रतियोगिताया वृत्तेः तादृशाभावस्य लक्षणघटकत्वापातात् ; विषयिताया वृत्त्यनियामकतया एतद्दोषानवकाश इति चेत् ? एवमपि " एतद्बुद्धि-

मानेतद्धूमात् " " तद्रूपवान् तद्रसा " दित्यादौ जलत्वाद्यभावप्रतियोगि तायाः कालिकसम्बन्धेन साध्यव्यापकसाध्यतत्समानाधिकरणकर्मादौ वर्तमान तया लक्षणघटकत्वापातः,तथाच व्यापकनिरूपितवृत्तौ स्वरूपसम्बन्धावच्छि न्नत्वनिवेशस्यैतन्मतेप्यावश्यकतया न लाघवावकाशः, विपरीतमेव गौरवमाधेयत्वांशनिवेशाधिक्येनेति । नच व्यापकनिष्ठप्रतियोगिताकत्वेना ऽभावो न निवेशनीयः, येनोक्तगौरवं स्यात्; अपितु अनुयोगिता सम्बन्धेव व्यापकविशेषित एव, तत्र च व्यापकतावच्छेदकप्रतियोगि-ताकत्वेन अभावनिवेशापेक्षया लाघवमक्षतमेवेति वाच्यम्, प्रतियोगि विशेषणतापन्नधर्मावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगिताया अभावांशे प्रतियोगिसम्बन्धतया भाने पटादिमति घटत्वावच्छिन्नाभावविषयिण्या द्रव्यं नास्तीत्याकारकप्रतीतेरापत्तेः तदवच्छिन्ननिरूपितानुयोगिताया एव संसर्गतया भानोपगमात्; व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगिताया: सम्बन्धविधया निवेश र्नायतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्याभावस्य सम्बन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथंचित्प्रसिद्ध्या लक्षणसमन्वयेपि व्यभिचारिण्यतिव्याप्तिः, व्यभिचारनिरूपकाधिकरणेपि कस्यचित्साध्य व्यापकस्य वृत्तेः, व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपप-त्तेश्च । एवमनवच्छेदकपदेनाऽवच्छेदकतापर्याप्तिचनधिकरणत्वमवश्यं वाच्यम्, अन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्ट द्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वाल्लक्षणाघटकत्वापत्तेः, तथाच घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिः, वह्निमन्निष्ठ भेदप्रतियोगितावच्छेदकताया घटत्वविशिष्टपर्याप्ततया शुद्धघटस्य तत्प-र्याप्तिचनधिकरणत्वात् ।

अथ निरुक्तव्यापकतावच्छेदकताया निवेशे कपिसंयोगाभावादि साध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः, कपि संयोगाभावादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावे प्रतियोगित्वावच्छेदकत्वात् इत्यग्रिमग्रन्थविरोधः. नच व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्त्वात् साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम् , प्रकृतव्यापकतायां तादृश विशेषणप्रवेशस्य निष्प्रयोजनकत्वात् ।

अत्र केचित् ; — व्यापकतालक्षणे अभावे प्रतियोगिवैयधिकरण्य निवेशनमावश्यकम् , अन्यथा अभावे सम्बन्धसामान्येन साध्यवन्निष्ठ त्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रति योगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तिः यः स्वावच्छिन्नाभावः तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्याप कतावच्छेदकतया अतिव्याप्त्यापत्तेः. दैशिकविशेषणतासम्बन्धेन तन्नि ष्ठत्वनिवेशे अभावस्य तेन सम्बन्धेन वृत्तेरप्रामाणिकतया वह्निमान् धूमादित्यादौ पर्वतत्वाद्यभावनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकता पत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात् ; हेतुसामानाधि करण्यघटकाभावीयवृत्तावपि तादृशसम्बन्धावच्छिन्नत्वनिवेशे नानास्थाने तादृशसम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिकरण धर्मावच्छिन्नाभावीयप्रतियोगितावच्छेदकतावारणाय सामानाधिकरण्यप्रत्या सत्त्यवच्छिन्नत्वनिवेशेन च गौरवात् अभावे प्रतियोगिवैयधिकरण्यनिवेशन मेवोचितम् . व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरण तयैव तमादाय दोषासम्भवात् , एतन्मते अवच्छेदकतायां सामानाधि करण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानिवेशात् अभावीयवृत्तौ सम्बन्धभेदानिवे शाच्च लाघवम् । प्रतियोगिवैयधिकरण्यं च न प्रतियोगिसमानाधिकरण भिन्नत्वम् , तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगिसमानाधिकरणतया

अभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठप्रतियोगितायां अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादायाव्याप्तिप्रसक्तेः; किन्तु प्रतियोग्यनधिकरणवृत्तित्वम्, तथाच प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावेत्यभावान्तार्थनिष्कर्षः ।

अत्र च व्यापकताघटकत्वेन अभिमतो यः सम्बन्धः तेन प्रतियोग्यनधिकरणत्वं वाच्यम्; तेन कालपरिमाणादिसाध्यकस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः । कालः सर्ववान् कालपरिमाणादित्यादौ साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिध्या तादृशसम्बन्धस्य व्यापकताघटकत्वासम्भवेपि न क्षतिः, तत्र समवायादिसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात् । अथैवं दैशिकविशेषणतासम्बन्धस्य क्वापि व्यापकताघटकत्वं न स्यात्, सर्वस्यैवाभावस्य पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनस्तेन सम्बन्धेन साध्यवति वृत्तेः तेन सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः । नच तादृशसम्बन्धस्य व्यापकत्वाघटकत्वेपि क्षतिविरहः, सामान्यादिमात्रवृत्तिसाध्यकस्थलेपि विषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वादिप्रकारकप्रमाभावमादायैवोपपत्तिसम्भवादिति वाच्यम्; तादृशसम्बन्धस्याऽतथात्वे तेन सम्बन्धेन क्वापिसंयोगाभावादिसाध्यकप्रमेयत्वादिहेतुकस्थले तन्निष्ठक्वापिसंयोगाद्यात्मकाभावीयप्रतियोगिताया व्यापकतावच्छेदकतानुपपत्त्या अग्रिमग्रन्थासङ्गतितादवस्थ्यादिति चेन्न;— लाघवानुरोधेन येन येन सम्बन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वमिति वक्तव्यम्; इत्थंच क्वापिसंयोगाभावादिसाध्यकस्थले तन्निष्ठप्रतियोगितावच्छिन्नप्रतियोगिता नोक्त-

यादृशपदेनोपादातुं शक्यते, तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसम्भवात् ; किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव, दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य साध्यवति घटादौ सत्त्वात्. तदवच्छेदकत्वं च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादे दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वनिर्वाह ।/ समनियताभावैक्यमते घटाद्यभावानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूत साध्यवतो ऽप्रसिद्धिः, अतः प्रतियोगितावदनधिकरणत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशः । नच घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेपि तदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकतालक्षणसामञ्जस्यमिति वाच्यम् ; तादृशाभावानामभेदे घटो नास्तीत्याद्विगतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसम्भवात् घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात् . समनियताभावानामभेदानभ्युपगन्तृमतेपि साध्याभावादिप्रतियोगितया साध्यवदवृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकत्वापत्तिवारणाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशन मावश्यकम् । अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसम्बन्धघटितव्यापकतावच्छेदकतापत्तिः, संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छेदकविशिष्टाधिकरणाप्रसिद्धया यादृशप्रतियोगितेत्यत्र तादृशप्रतियोगितावच्छिन्नायाः प्रतियोगितायाः उपादातुमशक्यतया प्रतियोगित्वान्तरमुपादाय तत्रानवच्छेदकत्वान्तसत्त्वात् ; तथाच यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यासम्भवादसम्भवः । नच संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतयत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नतया संयोगादिना वह्न्यादि

रूपप्रतियोगिसामानाधिकरण्यसत्त्वान्नासम्भव इति वाच्यम्; एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशाभावानां संयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्वारत्वात्; मैवम्– व्यापकता घटकत्वेन अभिमतो यः सम्बन्धः तेन सम्बन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगिताया विशेषणीयत्वात् द्रव्यत्वादेः संयोगादिना अवृत्तितया उक्त दोषानवकाश इत्याहुः ।

वस्तुतस्तु– लघुरूपसमनियतगुरुधर्मस्य अनवच्छेदकत्वे घटाद्यभाव प्रतियोगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिः, तादृशप्रतियोगिताविशिष्टघटाद्यभावस्य प्रतियोगिताया लाघवेन घटत्वादेरेवावच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेदकत्वात् । नच प्रतियोगितायास्तदभावीयप्रतियोगितात्वेन अवच्छेदकतायां गौरवेपि स्वरूपतोऽवच्छेदकत्वे अविशेषः, प्रतियोगितायाः स्वरूपतो भानाभावेन तेन रूपेणावच्छेदकताया अप्यसम्भवादिति पारिभाषिकमवच्छेदकत्वं व्यापकतावच्छेदकताशरीरे निवेशनीयम्, तथाच साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं; फलतः साध्यवद्यत्किञ्चिद्व्यक्तिसम्बद्धस्वविशिष्टसामान्यकं यद्यत्त्वं तत्तदन्यत्वमेव व्यापकतावच्छेदकत्वम्, तथाच कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक प्रतियोगिताकत्वमनायासेनैव निर्वहति, यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगितात्वविशिष्टस्य सर्वत्रैव साध्यवति वृत्तेः तस्याः स्वपदेन उपादातुमशक्यत्वात् तादृशं स्वं धर्मान्तरमेव, तदन्यत्वं च तादृशप्रतियोगितायामक्षतमिति । असम्बद्धत्व शरीरे च व्यापकताघटकत्वेन अभिमतो यः सम्बन्धः स एव निवेशनीयः द्रव्यत्वादिनिष्ठप्रतियोगित्वं च संयोगादिसम्बन्धेन साध्यवदसम्बद्धस्वविशिष्टसामान्यकमेव, अतो न संयोगघटितव्यापकत्वावच्छेदकत्वं तस्येति नोक्तदोषावकाश इति दिक् ।

[दी] येन सम्बन्धेन हेतु स्तेनैवसम्बन्धेन तदधिकरणत्वं बोध्यम् ; तेन आत्मत्वे साध्ये समवायेन हेतोः ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्तमानस्य साध्याभावस्या ऽतथात्वेपि न क्षतिः ।

येन सम्बन्धेन हेतु रिति । व्याप्यतावच्छेदकत्वेनाभिमतो यः सम्बन्ध इत्यर्थः । **बोध्य** मित्यस्य "हेतुसामानाधिकरण्यघटक" मित्यादिः, **तेन** – तादृशसम्बन्धविवक्षणेन । **आत्मत्वे साध्य** इति । अयमात्मा ज्ञानादित्यादावित्यर्थः । **साध्याभावस्य** – साध्यतावच्छेदकावच्छिन्न साध्याभावस्य । **अतथात्वेपि** – स्वविशिष्टस्य हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्य अप्रसिद्ध्या विवक्षणीयप्रतियोगिसामानाधिकरण्यविरहेपि । **न क्षतिः**— नाव्याप्तिः । वह्निमान् धूमादित्यादौ धूमावयवादिवृत्तेर्वह्नि त्वाद्यवच्छिन्नाद्यभावस्य स्वविशिष्टं यद्धेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं सम्भवत्येव, तथाविध हेत्वधिकरणपर्वतादेः जन्यमात्रस्य कालोपाधितया कालिकसम्बन्धेन तादृशा भावविशिष्टत्वात् तदन्तर्भावेण तेन सम्बन्धेन तादृशप्रतियोगिसामानाधि करण्यस्यापि सत्त्वाच्च अभाववैशिष्ट्यादौ सम्बन्धविशेषानिवेशादित्यभि-प्रायेण नित्यमात्रवृत्तिहेतुकस्थलानुधावनम् ।

अथ वह्निव्यापकस्य चरमक्रियाभावस्य योऽभावः चरमक्रिया त्मकः तस्य कालिकसम्बन्धेन हेत्वधिकरणे महाकाले वर्तमानस्य न विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवः, तद्विशिष्टस्य हेतुतावच्छे-दकसंयोगेन धूमाधिकरणस्याप्रसिद्धेः , धूमाधिकरणपर्वतादेः तदसमान कालीनतया तत्र कालिकसम्बन्धेनापि तद्वैशिष्ट्यासम्भवादिति आत्मत्व साध्यकपर्यन्तानुधावनमफलम् । नच वृत्त्यनियामकसंयोगेन धूमसम्बन्धि परमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूप प्रतियोगिनोपि सत्त्वात् सम्भवत्येव विवक्षणीयप्रतियोगिसामानाधिकर-

ण्यम् , तादात्म्यसम्बन्धावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसम्बन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम् , अदशपरमाणौ कदापि धूमसंयोगो नासीत् तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसम्बन्धिन्यसत्त्वेन तमादायैवाव्याप्तिसम्भवादिति चेन्न; महाकालस्यैव वृत्त्यनियामकसंयोगसम्बन्धेन हेतुसम्बन्धितया तत्र कालिकसम्बन्धेन चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवात् , वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात् । नच तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थले अव्याप्तिरस्त्येवेति वाच्यम् ; तेन रूपेण सम्बन्धतायां मानाभावात् , कालस्यावृत्तितया कालधूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वाच्च ; वह्निमान् धूमादित्यादौ साध्याभावमादाय नाऽव्याप्तिसम्भवः, किन्तु चरमक्रियाद्यात्मकमभावमादायैवेत्यव्याप्तेः स्फुटतर प्रतिपत्त्यर्थं आत्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति ।

ननु ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक प्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः; नच तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव न काले प्रतियोगिसमानाधिकरणः, आत्मनोऽवृत्तितया काले कालिकसम्बन्धेनावृत्तेरिति वाच्यम्, आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात् । नित्यद्रव्याणां कालावृत्तित्वेपि "महाकाल भिन्नो द्रव्यत्वात्" "ईश्वरज्ञानभिन्नं गुणत्वात्" इत्यादावतिव्याप्तिः, वृत्तिमतामेव महाकालभेदेश्वरज्ञानभेदव्यापकतया तदभावानां यावतामेव महाकालेश्वरज्ञानादौ कालिकविशेषणत्वाविषयितासम्बन्धघटितप्रतियोगि-

[दी] एवं दळान्तरेपि सम्बन्धभेदनिबन्धनो दोषस्सम्बन्ध्यैक्यविवक्षया निरसनीयः ।

सामानाधिकरण्यसत्त्वादित्यत आह– **एवं दळान्तरेपी** ति । **दळान्तरे**-प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्तादळे । **सम्बन्धभेदनिबन्धनो दोषः**— कालिकादिसम्बन्धमादायातिव्याप्तिरूपः । **सम्बन्धैक्यविवक्षया**-व्यापकताघटकसम्बन्धप्रतियोगिमत्ताघटकसम्बन्धयोरैक्यविवक्षया । **तथाच** " ज्ञानवानात्ममहाकालान्यतरत्वात् " " महाकालभिन्नो द्रव्यत्वात् " इत्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपित-व्यापकताघटकसमवायदैशिकविशेषणतादिसम्बन्धेन ज्ञानाभावमहाकालभेदा-भावादिप्रतियोगिनां कालादाववृत्तेर्नातिव्याप्तिरिति भावः ।

अत्र च येन येन सम्बन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यता वच्छेदकावच्छिन्नव्यापकता, तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्य मभावस्य विवक्षणीयम् , अन्यथा " इदं नित्यज्ञानम्- नित्यत्वे सति सवि-षयकत्वा " दित्यादौ हेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयितासम्बन्धेनापि व्यापकतया तेन सम्बन्धेन हेत्वधि-करणेश्वरेच्छाकृत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः, येन येने त्युक्तौ च तथाविधसमवायादिसम्बन्धेन अतथात्वान्नातिव्याप्तिः । अत्र च साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपित स्वप्रतियोगित्वावच्छिन्नव्यापक-ताघटकसम्बन्धत्वेन तादृशसम्बन्धस्य प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशः, तथासत्यभावे साध्यतावच्छेदकावच्छिन्नव्यापकता वच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात् ; न हि तादृशविशेषणानुपा-दाने गोत्वाद्यभावमादाय असम्भवः सम्भवति, गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटक

दैशिकविशेषणतासम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात्, धूमवान् वह्नेरित्यादौ धूमाद्यभावस्य अयोगोळके पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्येपि यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविरहात्, घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियोगिसामानाधिकरण्येपि विशेष्यता सम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटावृत्तेर्घटत्वाभावादि प्रमाद्वारास्तादृशसम्बन्धेन अभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गततादृश सम्बन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्त्यनवकाशात्; अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपित यद्यत्सम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताका ये ये अभावाः तेन तेन सम्बन्धेन प्रतियोगिसमानाधिकरणा इत्येवं क्रमेणैव निवेशात् व्यापकताया एकदैव लक्षणे प्रवेश इति ।

यत्तु—साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशात् न ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिः, इत्थञ्च व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या, अत एव वह्निमान् धूमादित्यादौ घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिना वा द्रव्यत्वादेरभावस्य समवायादिसम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेपि न क्षतिरिति;

तन्न, तथासति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेतावतिव्याप्त्यापत्तेः, तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्य सत्त्वात् । यदि च महाकालान्यत्वविशिष्टोपि घटे महाकाले वर्तते, अन्यथा सिद्धान्तलक्षणे महाकालो घटवान् काल परिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य

प्रसिद्धतया उभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्र योजनकतापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते?, तदापि घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य साध्यतावच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चिद्विशिष्टस्वाभावात्मक-प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिरेतन्मते दुर्वारैव; नच तेन सम्बन्धेन भावरूपप्रतियोगिसामानाधिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यम्, तथासति अभावसाध्यकसद्धेतौ निरुक्तयावदभा-वान्तर्गतभावरूपसाध्याभावस्य भावरूपप्रतियोगिसामानाधिकरण्यासम्भवा-दव्याप्तेः, अभावपदस्य भावभिन्नाभावपरत्वे कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकाभावमादायाऽग्रे स्वविशिष्टपदव्यावृत्तिकथनस्याऽसाङ्गत्या पत्तेः; एवं साध्यतावच्छेदकसम्बन्धेन व्यापकत्वादिनिवेशे सर्वत्रेत्यादिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायाऽतिव्याप्तिप्रदर्शनस्य असाङ्गत्यापत्तेश्चेति ।

यत्तु— विशेषणताविशेषेण व्यापकता, तेनैव सम्बन्धेन प्रतियोगि सामानाधिकरण्यम्, सर्वत्र साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादायैव लक्षणसङ्गमनमतिव्याप्तिवारणञ्चेति; तदपि उक्तातिव्याप्तेरात्मत्वादिसाध्य-कस्थले साध्याभावमादाय हेतुतावच्छेदकसम्बन्धव्यावृत्तिप्रदर्शनविरोधाच्चा-नुपादेयमेव ।

केचित्तु—प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्य निवेशान्न प्रागुक्तातिव्याप्तिः, इत्थंच व्यापकतापि तेनैव सम्बन्धेन वाच्या, अतो वह्निमान् धूमादित्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदक प्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः; तादृशाभावानां साध्यतावच्छेदकसम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपित-

स्वप्रतियोगितावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकस्वप्रतियोगिसमानाधिकरणधर्मावच्छिन्नाभावेन निरुक्तयावदभावानन्तःपातित्वात् । नचैवं व्यधिकरणधर्मावच्छिन्नाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति वाच्यम्, संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात् तादृशाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वात्. अनुभवानादरे समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्य अवच्छेदकत्वासिद्धेः । अथ बाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वमावश्यकम्, अन्यथा एकैकविधघटाद्यभावज्ञानस्य संयोगसमवायादिरूपनिखिलसंसर्गावगाहिज्ञानप्रतिबन्धकत्वप्रसङ्गात् । नच संयोगादिसम्बन्धावच्छिन्नघटादिप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादिमत्ताविरोधी योऽभावः तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग इति वाच्यम्. वास्तवतादृशाभावज्ञानत्वादिना पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानविरोधित्वप्रसङ्गात्. तस्मात्तत्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनैव प्रतिबन्धकतायां वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां सम्बन्धस्यावच्छेदकतासिद्धिरिति चेत् ? तर्हि घटत्वादिविशिष्टपटाद्यवगाहिज्ञानघटत्वावच्छिन्नपटाद्यभावज्ञानयोरपि प्रतिबध्यप्रतिबन्धकभावसत्त्वात् तादृशप्रतिबध्यप्रतिबन्धकभावस्य सम्बन्धविशेषनियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः अपि सम्बन्धावच्छिन्नत्वावश्यकत्वात् । व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्य अप्रतिबन्धकत्वे बाधग्रन्थे लाघवोपनीतकाञ्चनमयत्वादिना वह्न्याद्यनुमितिविरोधितया काञ्चनमयत्वावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वाभासत्वोक्तेरसङ्गत्यापत्तेरित्यलमप्रस्तुतविचारेणेति वदन्ति ;

[दी] रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव;

तदपि न साधीयः; — निखिलाभावस्य किंचिद्विशिष्टस्वाभावनिष्ठ प्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यसत्त्वेन व्यभिचारिण्यतिव्याप्तेः । यावत्प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे च निखिलव्यधिकरणधर्मावच्छिन्नाभावानामैक्यमते निखिलसम्बन्धानामेवैकैकतादृशाभावप्रतियोगितावच्छेदकतया क्वचिदपि हेत्वधिकरणे संयोगविषयित्वादिरूपसकलसम्बन्धेन प्रतियोगिनो ऽवृत्तेरसम्भवापत्तेः, प्रकारान्तरानुसरणे च गौरवादिति ।

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वा ऽभावस्य निवेशे उभयत्वावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरुक्ता, न तु रूपसामान्याभावादिसाध्यके, प्राचीनमते विरुद्धे पृथिवीत्वादिहेतावित्यत्र किं बीजम्? तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपाद्यात्मकाभावस्य स्वध्वंसप्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेनातिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य स्वमते लक्ष्यत्वमेवोपपादयति— **रूपादी** ति । यथोक्तलक्षणेऽतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः, तत्र पृथिव्यन्यत्वाद्यभावस्यापि यावदन्तर्गततया तस्य पृथिव्यां पृथिवीभेदरूपप्रतियोगिसामानाधिकरण्यासम्भवेनातिव्याप्त्यनवकाशात् ।

यत्तु—उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन न पृथिव्यन्यत्वाभावस्य रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकतेत्यभिसन्धिपूर्विकां प्राचीनप्रवादमात्रेणासद्धेतुत्वाभिमानिनां तटस्थानां यथोक्तलक्षणे अतिव्याप्तिशङ्कां निराकरोति— **रूपादी** ति । **सद्धेतु रेवे** ति । यादृशरीत्या पृथिव्यन्यत्वाभावस्य लक्षणाघटकत्वोपपत्तिः

[दी] प्रळये परमाणौ उत्पत्तिकाले चाऽवयविनि तत्सत्त्वात् । नच प्रतियोगिवद्ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम् , मानाभावात् ।

तादृशरीत्या साध्यवति हेतुसत्तायां अप्यावश्यकतया सद्धेतुरेवेत्यर्थ इति व्याख्यातम् ; तदनुपादेयमेव, तादृशाशङ्कितुः पृथिव्यां रूपसामान्याभावसत्त्वे अविप्रतिपत्तावेवातिव्याप्तिशङ्कासम्भवेनाऽग्रे पृथिव्यां रूपसामान्याभावव्यवस्थापनौपयिकाकाङ्क्षानुत्पत्त्या तदसङ्गत्यापत्तेः ।

प्रळये – महाप्रळये । परमाणूनां नित्यतया तत्रोत्पत्तिकालावच्छेदेन रूपसामान्याभावासम्भव इति भावः । यद्यपि पाकाद्द्रव्यनाशोत्पत्तिकाले पूर्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरानुत्पादेन इदानीमपि परमाणौ रूपसामान्याभाव सम्भवः, तथापि अविनश्यदवस्थस्य रूपस्य रूपप्रतिबन्धकत्वे पूर्वरूपनाशोत्पत्तिक्षण एव पाकजरूपोत्पत्तिसम्भव इत्यभिप्रायेण प्रळयपर्यन्तानुधावनम् । **उत्पत्तिकाल** इति । **अवयविद्रव्यस्य** जन्यतया प्रळये असत्त्वात् तदवच्छेदेन तत्राभावसम्भव इति भावः । **तत्सत्त्वात्**— रूपादिसामान्याभावसत्त्वात् ।

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्यात्यन्ताभावात्मकतया रूपप्रागभाववदुत्पत्तिकालावच्छिन्नावयविनि रूपध्वंसवति प्रळयावच्छिन्न परमाणौ कथं रूपसामान्याभावसम्भवः ? ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वादित्याशङ्क्य निरस्यति— **नचे** ति । **प्रतियोगिव** दिति । यथा प्रतियोगिनः एककालावच्छिन्नैकदेशावृत्तित्वरूप स्वात्यन्ताभावविरोधिता तथा स्वध्वंसप्रागभावयोरपि स्वात्यन्ताभावविरोधितेति नेत्यर्थः । **मानाभावा** दिति । ननु रूपध्वंसप्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावः, घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुतरामसम्भवात् द्वितीय-

[दी] अत एव "अन्तरा श्यामे रक्तं रूपं नास्ती" ति प्रत्ययः। नचैष रक्तिमध्वंसाद्यवगाही, पूर्वापररक्तिमध्वंसप्रागभाववति मध्ये रक्तेपि तथा प्रत्ययप्रसङ्गात्।

यादिक्षणावच्छेदेन रूपस्यैव तत्रोत्पत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृशप्रत्यक्षासम्भवात् अनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमुद्भाव्य निरसितुमशक्यत्वाच्च **अनुमानञ्चाप्रयोजक**मिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमर्थायातमित्यत आह— **अत एवे** ति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभावादेव। **अन्तरा श्यामे**— पूर्वापरदशायां रक्ते मध्यदशायां श्याम इत्यर्थः। **रक्तं रूपं नास्तीति प्रत्यय** इति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्वरक्तध्वंसभाविरक्तप्रागभावयोः सत्त्वेनात्यन्ताभावावगाहिन्याः प्रमात्मकतादृशप्रतीतेरनुपपत्तिरिति भावः। **एषः**— रक्तं रूपं नास्तीति प्रत्ययः। **ध्वंसादी**त्यादिना प्रागभावपरिग्रहः। **पूर्वापरे** ति। यत्र घटादौ पाकादेक रक्तरूपनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरं च रक्तान्तरं ततस्तन्नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं रक्तान्तरमुत्पद्यते तत्र मध्यरक्तदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः, तत्रापि रक्तरूपध्वंसप्रागभावयोः सत्त्वादिति भावः। एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत् तादृशध्वंसप्रागभावावेव तादृशप्रतीतिविषयौ, अन्तरा रक्तसमानकालीनौ पूर्वापररक्तध्वंसप्रागभावौ च न तथाविधाविति नातिप्रसङ्ग इति निरस्तम्. तादृशध्वंसप्रागभावयोरेव रूपान्तरदशायां तादृशप्रतीतिनियामकतया, तयोरपि तथात्वस्वीकारस्य आवश्यकत्वात्; तत्र मध्यरक्तध्वंसप्रागभावयोः तथात्वस्वीकारे तु पूर्वापररक्तदशायां तादृशप्रत्ययापत्तेः।

अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंसादिरेव तादृशप्रतीतिविषयः, इत्थंच रक्तरूपदशायां लौकिकप्रत्यक्षात्मकस्तादृशप्रत्ययः आपाद्यते , अनुमित्यात्मको वा? आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षं प्रति प्रतिबन्धकत्वान्नापत्तिः, अन्यथा भवन्मतेपि रूपान्तरकालावच्छेदेन तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं धर्म्यन्तरघटितसन्निकर्षात्तद्वृत्तितया प्रत्यक्षापत्तेः, विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्याहेतुत्वात् . रक्तरूपग्रहप्रतिबन्धकदोषादिसत्त्वे च तादृशप्रत्यक्षस्येष्टत्वात् । नान्त्यः, तद्रूपावच्छिन्नव्याप्यवत्ताज्ञानादिसत्त्वे आनुमानिकतथाविधप्रत्ययस्येष्टत्वात् । नच तादृशप्रत्ययस्य प्रमात्वापत्तिः, भवन्मतेपि तथाविधात्यन्ताभावस्य तत्र सत्त्वात् तादृशप्रत्ययस्य प्रमात्वेनेष्टापत्तेः यदा च तत्र रक्तरूपं तत्कालावगाहिनः इदानीमत्र रक्तरूपं नास्तीति प्रत्ययस्य प्रमात्वम्पुनरशक्यापादनम्, तादृशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात् , यदा च न तत्र रक्तरूपं तत्कालावच्छेदेनैव च ध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात् तद्धर्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनरिष्टमेव. नच तद्धर्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते किं वा तत्कालावच्छेदेन तत्र धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकान्त्यताभावः कल्प्यत इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धे निष्प्रत्यूहतैवेति वाच्यम् , ध्वंसप्रागभावाधिकरणे अत्यन्ताभावाकल्पने ध्वंसादेरतिरिक्तात्यन्ताभावाकल्पनेन लाघवाद्रक्तरूपात्यन्ताभावस्यैतन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात् ;

मैवम् ; तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमे विशेषाभावानामेवाधिकरणविशेषावच्छेदेन सामान्यधर्मावच्छिन्नप्रतियोगिता-

कत्वसम्भवात् अतिरिक्तसामान्याभावासिद्धिप्रसङ्गः, एवमेकस्यैवाभावस्याधिकरणविशेषकालावंशेषवृत्तित्वावच्छेदेन घटत्वपटत्वादिरूपनिखिलधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवेनाभावभेदविलोपप्रसङ्गः, एवं रक्तानाधिकरणकालावच्छेदेन रक्तध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वोपगमे तत्समानाधिकरणतत्समनियतध्वंसान्तरस्य तत्समानाधिकरणैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पनमादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंस प्रागभावाधिकरणे अत्यन्ताभावकल्पनमेव न्याय्यम् ।

अथैतादृशयुक्तया रक्तध्वंसादिमति तदत्यन्ताभावसिद्धावपि रूप ध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्नाभावो निर्युक्तिक एवेति चेन्न, रूपोत्पत्तेर्द्वितीयक्षणे पुन स्तदधिकरणे सामान्यसामग्रीबलाद्रूपान्तरोत्पत्ति वारणाय रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम्, एवंच उत्पत्तिकाले पाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तदुत्तरं रूपानुत्पादप्रसङ्गः, रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पादश्च प्रागभावहेतुतया दुर्वारः, रूपत्वत्यपि पाकजभाविरूपप्रागभावसत्त्वात् । नचैवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिकः, यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्कालावच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैवोपपत्तेरिति वाच्यम्, दत्तोत्तरत्वात्।

इदंत्ववधेयम् ; उक्तयुक्तया उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि प्रळयकालावच्छेदेन परमाणौ तत्सत्त्वे मानाभावः, एवं रूपं प्रति रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते, स्पर्शोत्पत्त्यनुरोधेन अवश्यकल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरापत्तेः शक्यवारणत्वात्. वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय स्पर्शं प्रति रूपाभावहेतुताया वक्तुमशक्यत्वात् स्पर्शाभावहेतुताया आवश्यकत्वात् । नच रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद्रूपसत्त्वे

[दी] तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यम्; तेन गोत्वजन्यद्रव्यत्वप्रळयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्यवच्छेदेन तद्वति काले

स्पर्शनाशः तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्, एकजातीयस्यैव अग्निसंयोगस्य रूपरसगन्धस्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्यावश्यकत्वादिति । एवं ध्वंसप्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदधिकरणे कल्प्यते, अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवादेकैकेषु तद्धर्मावच्छिन्नबुद्धेषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनैवोपपत्तेरिति ध्येयम् ।

तत्सामानाधिकरण्यम् – प्रतियोगिसामानाधिकरण्यम् । स्वविशिष्टे ति । स्वम् - यत्राभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यं स एव । हेत्वधिकरणावच्छेदेन ति । हेतुतावच्छेदकसम्बन्धेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तत्सामान्यान्तर्भावेणेत्यर्थः. तेन वह्न्याद्यभावस्य धूमावयवावयवच्छेदेन द्रव्यं विशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य गुणावयवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेपि न क्षतिः. पर्वतादेः कालोपाधित्वानभ्युपगमे धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्योपपादयितु मशक्यतया धूमवान् वह्नेरित्यादावतिव्याप्तिप्रसक्तेः दर्शितविवक्षायाः स्थलान्तरे प्रयोजनमाह — तेन गोत्वे ति । तद्वति — गवादिमति । कालिकसम्बन्धेन गोत्वादिना गवादौ साध्ये प्रळयान्तर्भावेण व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकानां गोत्वाद्यवच्छिन्नाभावानां गवादिमति एतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले च प्रळयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमक्षतमेव । एवं दैशिकविशेषणतावैशेषेण गवादिव्यापक-

[दी] महाकाले वा वृत्तावपि "यदा गोत्वं तदा गोः" "यदा कालत्वं तदा जन्यद्रव्यं प्रलयावृत्तिवे" त्यादौ नातिप्रसङ्गः,

---

प्रळयान्यत्वादेरभावोपि तेन सम्बन्धेन प्रळयान्यत्वादिमति महाकाले कालिकसम्बन्धेन वर्तमानतया प्रतियोगिसमानाधिकरण एव, प्रतियोगि सामानाधिकरण्यघटकीभूताभाववृत्तौ सम्बन्धविशेषानिवेशात् इत्यतिव्याप्ति स्स्यात्, निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रळयान्त-र्भावेण तादृशाभावानां न प्रतियोगिसामानाधिकरण्यम्, प्रळये तत्प्रति योगिनो ऽवृत्तेरिति समुदायार्थः। गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरमध्वंसादिः तस्य गवादिमति खण्डकाले न प्रतियोगिसामा नाधिकरण्यम्, तत्र तस्यावृत्तेरित्यतो **महाकालेवे** त्युक्तम् । महाकाले च कालिकसम्बन्धेन वृत्तेस्तथात्वमक्षतमेव ।

गोसाध्यकस्थले साध्यव्यापकतावच्छेदकजन्यद्रव्यत्वप्रळयावृत्तित्वा-वच्छिन्नाभावमादायातिव्याप्तिवारणं न सम्भवतीति स्फुटीकरणाय तत्त द्रूपावच्छिन्नसाध्यकस्थले प्यतिव्याप्तिमाह – **यदा कालत्व** मित्यादिना । अथ एतादृशविवक्षापेक्षया लाघवात् प्रतियोगिसामानाधिकरण्यघटका भावीयवृत्तौ दैशिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वमेव निवेश्यताम्, तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रळयान्यत्वादेरभावस्य प्रति योगिसामानाधिकरण्यविरहेणातिव्याप्त्युद्धारस्य शक्यत्वात् । नचैवं वह्निमान् धूमादित्यादौ कालिकविशेषणतासम्बन्धेन हेत्वधिकरणवृत्तेः द्रव्यत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावा दव्याप्तिरिति वाच्यम्, हेतुसामानाधिकरण्यशरीरेपि अभावीयवृत्तौ दैशिक विशेषणताविशेषसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात् तावतापि लाघवा नपायात् । नच दैशिकविशेषणताविशेषेण प्रतियोगिसामानाधिकरण्य-

विवक्षणेपि उक्तस्थलेष्वतिव्याप्तिस्तदवस्थैव, प्रळयान्यत्वाभावस्य प्रळय मात्रवृत्तेरभावमात्राधिकरणकतया प्रळयात्मकाधिकरणस्वरूपत्वात् तस्य च प्रळयान्यत्वरूपप्रतियोग्यधिकरणपरमाण्वादौ दैशिकविशेषणतया वृत्ते रिति वाच्यम्, एवमपि प्रळयान्यकालत्वप्रकारकप्रमाविशेष्यत्वादेरभावस्य प्रळयातिरिक्तगगनादावपि वर्तमानस्य प्रळयानात्मकतया प्रतियोगि-सामानाधिकरण्यस्य दुरुपपादतया अतिव्याप्तिवचनवकाशात् ।

मैवम्, दैशिकविशेषणतया प्रतियोगिसामानाधिकरण्यनिवेशेपि दैशिकविशेषणतासम्बन्धेन प्रळयावृत्तिसाध्यके कालत्वादिहेतावतिव्याप्ति र्दुर्वारैव, तत्र प्रळयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यता वच्छेदकसम्बन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावीयप्रतियोगिता, व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रळयमात्रवृत्तितया प्रळयात्मकत्वान्निरुक्तरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतरसम्बन्धा वच्छिन्नाभावस्य प्रळयानात्मकत्वेपि प्रळयान्यवृतितया सुतरामेव प्रति योगिसमानाधिकरणत्वादिति निरुक्तविवक्षणमावश्यकम्, एतदभिप्रेत्यैव प्रळयावृत्तिसाध्यकानुधावनं ग्रन्थकृत इति ।

वस्तुतस्तु, प्रळयादिमात्रवृत्तेरभावस्य प्रळयाद्यनात्मकत्वेपि दर्शित स्थलेषूक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यम्, प्रळयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपसम्बन्धेन प्रळयात्मकनानाध्वंसान्त-र्गतयात्किञ्चिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनोऽधिकरणे ध्वंसान्तरे स्वस्य प्रतियोगिसमानाधिकरणत्वात्. यत्किञ्चिद्ध्वंसान्यत्वाभावस्य य-त्किंचिद्ध्वंसमात्रवृत्तेस्तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे असत्त्वेपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरण ध्वंसावच्छेदेन स्वाधिकरणेपि सत्त्वेन तत्रैव तत्प्रतियोगिसमानाधि-करणत्वात् प्रळयान्यविषयकत्वोपलक्षितप्रमाया विषयतासम्बन्धेन केवला-

[दी] हेतुमति प्रळये तत्सामानाधिकरण्याभावात् । "स्वविशिष्टे" ति विशेषणात् " कपिसंयोगाभाववान् मेयत्वा " दित्यादौ संयोगात्मकसाध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेपि नाव्याप्तिः ।

न्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः; प्रळयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रळये प्रसिद्धावपि प्रळये तदन्यविषयकनित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रळयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकान्याप्यवृत्तित्वेन प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेस्तादृशाभावमादायातिव्याप्तिवारणसम्भवात् ; उक्तविवक्षणे तु प्रळये प्रळयाविषयकप्रमाभावस्य विषयतया प्रतियोगिसमानाधिकरणत्वविरहादतिव्याप्तिवारणसम्भवः, एवमुक्तरीत्या घटत्वाभाववान् मेयत्वादित्यादावपि व्यावृत्तिर्बोध्या ।

हेतुमति प्रळय इति । हेतुमत्सामान्यान्तर्गतप्रळयान्तर्भावेणेत्यर्थः । **तत्सामानाधिकरण्याभावात्** – गवादिरूपप्रतियोगिसामानाधिकरण्याभावात् । अत्र **गवादेरभावस्ये** त्यनुषज्यते । हेतुमति स्ववैशिष्ट्यनिवेशन फलमाह – **स्वविशिष्टे** ती ति । साम्प्रदायिकैर्द्रव्ये संयोगसामान्याभावानभ्युपगमात् सद्धेतुत्वार्थं कपिसंयोगाभावपर्यन्तानुधावनम् । **सकलहेत्वधिकरणावृत्तित्वेपी** ति । नित्यगुणादौ केनापि सम्बन्धेन कपिसंयोगासत्त्वादिति भावः, एतेन हेत्वधिकरणसामान्यान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितम् । **नाव्याप्ति** रिति । नित्यगुणादेः स्वविशिष्टत्वाभावात्तदन्तर्भावेण अतथात्वेपि स्वविशिष्टहेत्वधिकरणान्तर्भावेण तथात्वस्याक्षतत्वात् । अत्र व्यापकताघटकाभावे उक्तयुक्त्या प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया साध्यवद्यत्किंचिद्यक्तयसम्बद्ध स्वविशिष्टसामान्याभावत्वरूपव्यापकतावच्छेदकत्वस्य निवेशनीयतया वा

कपिसंयोगाभावादिनिष्ठप्रतियोगितायाऽपि व्यापकतावच्छेदकता-निर्वाह इत्याभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादायाव्याप्तिराशङ्किता, अन्यथापुनः सत्तावान् जातेरित्यादौ काले कालिकसम्बन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नाभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहात् प्रसक्ताव्याप्तेर्वारणाय स्वविशिष्टे ति विशेषणमावश्यकमिति. आदिपदग्राह्यमपि तादृशस्थलमेवेत्यपि बोध्यम् ।

अत्र तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तो ऽभावाः यद्धेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेण [यत्र कुत्रचित्तु] तत्तत्प्रतियोगिसामानाधिकरण्यकाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावा यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकाः तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितं च व्यधिकरणधर्मावच्छिन्नाभावघटितं लघुलक्षणं सम्भवतीति बोध्यम् ॥

इति प्रथमस्वलक्षणम् ।

अथ द्वितीयस्वलक्षणम् ।

ननु धूमवान् वह्नेरित्यादौ अतिव्याप्तिः, धूमाभावादेरपि अयोगोळकादौ गोत्वाभावरूपप्रतियोगिसमानाधिकरणत्वात् ; गोत्वाद्यभावस्य तत्प्रतियोगित्वं च धूमाभावे जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीति प्रतीति नियामकाभावस्याभावाधिकरणकाभावप्रतियोगिकाभावतया अधिकरणीभूत धूमाभावस्वरूपत्वात् जलवृत्तित्वविशिष्टगोत्वाभावस्य शुद्धविशेष्यानातिरिक्तत्वादित्याशङ्क्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्त

[दी] जलादिवृत्तित्व विशिष्टगोत्वाद्यभावस्याभावो जलत्वाद्यभाव एव; न तु धूमाद्यभावः, जलह्रदादावपि तदभावप्रत्ययप्रसङ्गात् ।

जलाभावस्वरूपतां प्रदर्शयन् तत्स्वरूपतां प्रतिक्षिपति– **जले** त्यादिना । नच धूमाभावस्य प्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसंयोग सम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहात् कथमतिव्याप्तिशङ्केति वाच्यम्. जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्याप्युक्तयुक्त्या धूमाभावस्वरूपतासम्भवात् संयोगसम्बन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्य सत्त्वात् । नचैवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि, तस्यैव प्रतियोगितावच्छेदक जलवृत्तित्ववैशिष्ट्याक्रान्तत्वात्. तस्य च धूमाभावविशिष्टसकल वह्निमति वृत्तौ मानाभावान्नातिव्याप्तिप्रसक्तिः; यदि च जलवृत्तित्ववैशिष्ट्य मन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभावत्वावच्छिन्न एव विशेषणम् , न तु अन्यतरत्वावच्छिन्ने विशेषणतया प्रतियोगितावच्छेदकमिति जलावृत्ति द्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते?, तदा तादृशाभावस्य विशिष्टाभावा नात्मकतया अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरण धूमाभावाद्यधिकरणकत्वानुपपत्तिरिति वाच्यम् , जलवृत्तिद्रव्यं धूमाभाव विशिष्ट यादृशहेत्वधिकरणे नियमतो वर्तते, तादृशव्यभिचारिहेतुकस्थल एव धूमाभावात्मकनिरुक्त विशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यगादायाऽति व्याप्तिमाशङ्क्य **जलादिवृत्तित्वे** त्यादि ग्रन्थस्यावतारणीयत्वात् । नचैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचितइति **विशिष्टगोत्वा द्यभावस्याभाव** इति ग्रन्थासङ्गतिर्दुर्वारैवेति वाच्यम् , तादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतर-त्वावच्छिन्नप्रतियोगिताकाभावपरत्वात् । नचैवमप्ययोगोळकभेदाभावस्या योगोळकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभाव स्वरूपताविरहात् तस्य प्रतियोगिसामानाधिकरण्यं न घटत इत्यतिव्या-

प्यप्रसक्तिः, साध्यतावच्छेदकसम्बन्धेन व्यापकताया लक्षणघटकत्वं प्रागेव दूषितम्, अतो नायोगोळकभेदाभावस्य लक्षणघटकत्वसम्भव इति वाच्यम्, अयोगोळकभेदाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसम्भवात् । नचैवं भूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्ति - तादवस्थ्यमिति वाच्यम्, तादृशप्रतियोगिनः स्वप्रतियोगिनिष्ठव्यापकता-घटक यावत्सम्बन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् घटत्वा भाववान् मेयत्वादित्यादावपि घटत्वाभावादिप्रकारकप्रमाभावस्य यावद्व्या पकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्य विरहेणातिव्याप्त्यनवकाशात् । नचैवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्या न्यतराभावस्य धूमाभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्य सम्भवेपि धूमादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गत विशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्याभावात् धूमवान् वह्ने रित्यादावतिव्याप्त्यप्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपो न युक्त इति वाच्यम्, तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमादि प्रकारकप्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमा न्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगि त्वेन तयैव समं विशेष्यतासम्बन्धेन तादृशाभावस्य सामानाधिकरण्य सत्त्वादतिव्याप्तिप्रसक्तेरिति । नन्वेवमपि धूमवान् वह्नेरित्यादावतिव्याप्ति र्दुर्वारैव, उक्ताभावस्य जलत्वाद्यभावस्वरूपत्वे तु तुल्ययुक्त्या धूमवद् वृत्तित्वविशिष्टतादृशाभावस्य धूमाभावस्वरूपत्वेन द्रव्यसामान्यस्य तत्प्रति योगित्वानपायात्; एवं धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभाव समनियतत्वेन तत्तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात् । यदि च धूमत्वादिना प्रमेयं नास्तीत्यादिप्रतीतौ धूममात्रस्यैव प्रतियो-

गित्वग्रहः, न प्रमेयान्तरस्य, अथवा प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता निवेशनीया, एवञ्च तादृशप्रतियोगिताको हेतुसमानाधिकरणाभावो ग्राह्यः, यावत्प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वावच्छिन्नैव, तादृशधर्मानवच्छिन्ना च धूमादिमात्रवृत्तिधूमाभावीयप्रतियोगितैव, तदाश्रयसामानाधिकरण्यञ्च नायोगोळकाद्यन्तर्भावेनेति मन्यते?, तदापि धूमाभावस्य वह्निधूमोभयत्वावच्छिन्नाभावसमनियततया तदवच्छिन्नत्वेन वह्नेरपि तदभावप्रतियोगितया, अयोगोळकान्यत्वाभावस्य अयोगोळकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेनाकाशाभावस्यापि तत्प्रतियोगितया, धूमवत्त्वप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया द्रव्यत्वादिप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन, धूमभेदस्य धूमत्वसदुभयत्वावच्छिन्नाभावसमनियतत्वेन सन्मात्रस्यैव तत्प्रतियोगितया, हेतुसमानाधिकरणतादृशाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिभिः सामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिः ।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तत्तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्? तर्हि तादृशी या या प्रतियोगिता तदाश्रयसामानाधिकरण्यं यत्र क्वचिद्यावद्यदधिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्ये अभावे यावत्त्वस्य तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यस्य विशेषणस्य हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः; एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नप्रतियोगिताकं साध्याभावमादाय लक्षणसमन्वयसम्भवात् व्यधिकरणधर्मावच्छिन्नाभावस्याऽप्रामाणिकत्वेपि क्षतिविरहेण एतादृशव्याप्तिलक्षणशङ्कायां **प्रतियोग्यवृत्तीश्चे** त्यादिना तादृशाभावखण्डन-

[द्वी] यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावतां भावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्.

स्याऽसङ्गत्यापत्तिः; अतो लक्षणान्तरमाह — **यत्समानाधिकरणानामिति** । अत्रापि यत्तत्पदयोः पूर्ववत् यत्तद्धर्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव, तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः । अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः, तथाच धूमाद्यभावानां वह्निधूमोभयत्वावच्छिन्नप्रतियोगिताश्रय वह्न्यादिसामानाधिकरण्यसत्त्वेपि प्रतियोगिताबच्छेदकीभूत तादृशोभयत्वावच्छिन्न सामानाधिकरण्याभावान्नातिव्याप्तिः । एवं तादृशाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाभावस्वरूपत्वेपि तादृशाभावप्रतियोगितावच्छेदकधूमवद्वृत्तित्वविशिष्टत्वावच्छिन्नेन समं तादृशाभावस्य स्वविशिष्टहेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः. द्रव्यत्वेन धूमो नास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते, अपि तु धूमत्वादेरेव, द्रव्यत्वादेस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासत इत्युपेयते, अतः तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणेप्यतिव्याप्तेः दुर्वारता इत्याशङ्काया नावकाशः ।

एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावस्तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तम् ; वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्ट्यस्यैव प्रतियोगितावच्छेदकत्वावगाहनोपगमात् ; अन्यथा धूमवद्वृत्तित्वविशिष्टवह्निमति धूमशून्ये वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात् . अस्तु वा तत्र तादृशवैशिष्ट्यसहितस्यैव वह्नित्वस्य तथात्वम् , तावतापि न क्षतिः, प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकता पर्याप्त्यधिकरणार्थकत्वात् ।

अथैवमपि घटभिन्नत्वेन धूमघटान्यतरन्नास्तीत्यत्र घटधूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानम् , धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः; नापि घटभिन्नत्वसहितस्य तस्य; गौरवात्; किन्तु घटभिन्नत्वमात्रस्यैव, एवंच तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम् , एवं भेदत्वेन अयोगोळकभेदघटात्यन्ताभावान्यतराभावस्यायोगोळकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमप्ययोगोळकभेदाभावप्रतियोगितावच्छेदकम् , एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्वधूमत्वान्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगितावच्छेदकम् , तादृशधर्मावच्छिन्नानाञ्च अयोगोळकादावपि सत्त्वादतिव्याप्तिस्तदवस्थैवेति चेत् ? तर्हि **प्रतियोगितावच्छेदके** त्यनेन प्रतियोगितायाः न्यूनवृत्तिभिन्नं सत् यदवच्छेदकं तदेव विवक्षणीयम् , न्यूनवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वम् , तद्भिन्नत्वञ्च व्यधिकरणधर्मसाधारणम् ; घटधूमान्यतरादिनिष्ठप्रतियोगितायाः न्यूनवृत्त्येव घटभिन्नत्वादिकम्. नच वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन

वह्नित्वावच्छिन्नप्रतियोगिता या प्रतीयते, वह्निर्नास्तीत्यत्रापि वह्निवृत्तितया सैव प्रतीयत इत्युपेयते, एकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात् ; तथाच कालिकादिसम्बन्धेन हेतुसमानाधिकरणवह्नित्वावच्छिन्न वह्न्याद्यभावप्रतियोगितायां न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्ध्या अव्याप्तिरिति वाच्यम्, वह्निनत्वेन प्रमेयं नास्तीति प्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगिता भासते नान्यस्येत्यभ्युपगमात् तादृशाभावप्रतियोगितायां प्रमेयसामान्यवृत्तित्वस्यैवासिद्धेः ।

अथवा प्रतियोगितावच्छेदकपदं प्रतियोगितायां अनतिरिक्तवृत्ति सत् यदवच्छेदकं तत्परम्, अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कान्यत्व तत्सामानाधिकरण्योभयाभाववत्त्वम्, तथात्वं च व्यधिकरणधर्मसाधारण मपि, घटधूमान्यतरादिनिष्ठप्रतियोगितायाश्च अतिरिक्तवृत्त्येव घटभिन्न-त्वादिकम्, तादृशप्रतियोगितायां यावद्घटभिन्नादिसाधारण्याप्रसक्तेः. वह्नि त्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वेपि तदनतिरिक्तवृत्त्यव च्छेदकं वह्नित्वादिकमेव, स्वव्यापकतत्कान्यत्वस्याऽवृत्तौ प्रमित्वादिति नानुपपत्तिगन्धोपीति * [प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नाया यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं विवक्षितम्, न्यूनवृत्तित्वं च सामानाधिकरण्य घटितमिति व्यधिकरणधर्मपरिग्रहः.]तत्प्रतियोगितासमानाधिकरणं सन् तत्प्र तियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं यत् तदन्यप्रतियोगितावच्छेदकं वा निवेश्यम् । एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटा भावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वधिकरणावच्छेदेन वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसम्भवेपि वह्निघटोभयत्वावच्छिन्ना भावस्यापि तथाविधतया तस्य प्रतियोगितावच्छेदकावच्छिन्नसामाना-धिकरण्याभावेन असम्भव इत्यतो व्यापकतावच्छेदकरूपावच्छिन्नप्रति

* कुण्डलितग्रन्थः क्वचित्कः मात्यावश्यकश्च ।

योगिताकत्वमुक्तम् ; अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूप वच्छिन्नाभावस्याऽप्रसिद्ध्या ऽसम्भवः अयमात्मा ज्ञानादित्यादौ केवलान्वयिसाध्यकेचाव्याप्तिर्वा भवतीत्यभिप्रायकतया **प्रतियोग्यवृत्तिश्चे** त्यादि ग्रन्थसङ्गतिः. नच अयमात्मा ज्ञानादित्यादौ पूर्वक्षणवृत्तित्वविशिष्टात्मत्वत्वादेरात्मत्वादिव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य उत्तर क्षणावच्छेदेन हेतुसमानाधिकरणतया "इदं वाच्यम् ज्ञेयत्वा" दित्यादावपि एतत्क्षणान्यवृत्तित्वविशिष्टवाच्यत्वत्वादेः विषयतासम्बन्धेन जन्य ज्ञानत्वविश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादे स्साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्यैतत्क्षणावच्छेदेन प्रळयावच्छेदेन च हेतुसमानाधिकरण तया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि न तादृशाभावाप्रसिद्धिरिति वाच्यम् , प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव निवेशनीयतया निरुक्तधर्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्माणां व्यापकतावच्छेदकत्वासम्भवात् । नच साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किं न निवेश्यते? प्रमेयसाध्यकस्थले संयोगसमवायादिरूप व्यधिकरणसम्बन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम् , तथा सति लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः ।

अत्र च ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ अतिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन व्यापकत्वं तेनैव सम्बन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् , महाकालान्यत्वविशिष्टघटादिसाध्यकस्थले कालत्वादेर्व्यभिचारित्वेपि तत्र हेतुसमानाधिकरणस्य महाकालन्यत्व विशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावेनातिव्या-

शिसम्भवात् । तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले तादृशसम्बन्धेन साध्यं प्रति तादृशसम्बन्धेन व्यापकतायामवच्छेदकीभूतो यः प्रमेयत्वादिरूप केवलान्वयिधर्मः तदवच्छिन्नस्य संयोगसमवायिविषयितादिसम्बन्धावच्छिन्ना भावमादायैव लक्षणसमन्वयसम्भवात् अभावप्रतियोगितायां साध्यता वच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात् ; तन्निवेशेपि व्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छेदकतां प्रमेयत्वादिभेदमादाय लक्षणसमन्वयसम्भवात् । " समवायितया वाच्यत्ववद्भेदोपि द्रष्टव्य " इति मिश्रोक्त्या तादृशभेदस्यापि सौन्दलसम्मतत्वादिति केचित् तदसत्; घटत्वाभाववान् मेयत्वादित्यादौ पूर्वोक्तदिशाऽतिव्याप्तेः । स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपि न सत् ; तथा सति " इदं वाच्यं ज्ञेयत्वा " दित्यादौ विषयतासंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि लक्षणसामञ्जस्यात् **प्रतियोग्यवृत्तिश्चे** त्यादिग्रन्थासङ्गतेः । एतेन– विषयतासम्बन्धेन व्यापकता, तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयम् , साध्यवत्त्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसङ्गमनमतिव्याप्ति निरासश्चेति निरस्तम्; **ज्ञेयत्वत्वादिना वाच्यत्वादीनामभाव** इत्येतादृशग्रन्थासङ्गतेश्च ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासम्बन्धेनाव्यापकत्वात् ! किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन व्यापकत्वम् , तेनैव प्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यं विवक्षणीयम् . व्यभिचारिणि साध्याभावस्य विशेषणताविशेषेण किंचिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्येपि तदवच्छिन्नभावसामानाधिकरण्याभावात् नाति

व्याप्तिः, किंचिद्विशिष्टस्य स्वस्य योऽभावः सामानाधिकरण्यसम्बन्धेन तद्विशिष्टस्य अभावश्च विशिष्टस्वसमनियतोपि स्वस्मादतिरिक्त एव, अभावमात्रप्रतियोगिताकाभावस्यैव तदभावप्रतियोगिस्वरूपतायाः सिद्धान्तसिद्धत्वात् ; अतो धूमाद्यभावस्य सामानाधिकरण्यसम्बन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वावच्छिन्नभावसामानाधिकरण्येपि न क्षतिः ।

(वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वमनिवेश्य प्रतियोगितावच्छेदके अभावावृत्तित्वमेव निवेश्यम्, तादृशविशिष्टत्वंचाभावसाधारणमिति ।)

यावदभावाना मित्यत्राप्यभावपदं भावभिन्नपरम् , अतः कालिकादिसम्बन्धेन हेतुसमानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकह्रदत्वाद्यभावत्वावच्छिन्नप्रतियोगिताकस्य ह्रदत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासम्भवेपि न क्षतिः; नच ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियततया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नभावसामानाधिकरण्यमस्त्येवेति वाच्यम् , तस्य भावतया भिन्नत्वात् । एवञ्च सति कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगात्मकाभावस्य लक्षणाघटकत्वेपि विवक्षणीय "स्वविशिष्टे" त्यस्य सार्थकता पूर्वोक्तदिशाऽवसेया ।

नच भावभिन्नाभावविवक्षणेपि अयमात्मा ज्ञानादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वाद्यवच्छिन्नप्रतियोगिताकस्य आकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासम्भवाल्लक्षणसमन्वयासम्भव इति वाच्यम् , आकाशाभावीय

तादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेराकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहेण तदवच्छिन्नाभावस्य लक्षणाघटकत्वात् ; अस्तु वा व्यापकतावच्छेदकरूपांश एव भाववृत्तित्व विशेषणम् , इदं वाच्यं ज्ञेयत्वादित्यादौ च व्यधिकरणसम्बन्धावच्छिन्न प्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगिता वच्छेदकसम्बन्धघटितव्यापकतावच्छेदकम् , अतस्तादृशाभावस्य न लक्षण घटकतेति नोक्त प्रतियोग्यवृत्तित्वे त्यादिग्रन्था ऽसङ्गति रिति ।

नच प्रतियोगितावच्छेदकसम्बन्धेन व्यापकताविवक्षणेपि इदं वाच्यं ज्ञेयत्वादित्यादौ विषयितादिसम्बन्धेन वाच्यत्वत्वादिमतो ज्ञानादेर्यः स्वरूपसम्बन्धेन अभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्ध घटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकत - या हेतुसमानाधिकरणतया स्वरूपसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न वाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युप गमेऽपि तमादायैव लक्षलसामञ्जस्यमिति तादृशग्रन्थासङ्गतितादवस्थ्य- मिति वाच्यम् , धूमवान् वह्नेरित्यादौ संयोगादिसम्बन्धावच्छिन्नप्रति योगिताकधूमाद्यभावस्य कालिकसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिना संयोगेन – समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य अयोगोळकावृत्तिजाति त्वाद्यवच्छिन्नाभावस्य कालिकादिसम्बन्धेन तादृशजातित्वादिविशिष्टायो- गोळकीयरूपादिना समं समवायेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिता कस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालिकादिसम्बन्धेन तादृश विषयत्वत्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगितावशेषसम्बन्धेन तादृश विषयत्वत्वादिविशिष्टतादृशविषयत्वाद्यभावेन च समं स्वरूपसम्बन्धेन विष- यतासम्बन्धावच्छिन्नप्रतियोगिताक धूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयिता सम्बन्धेन कालिकसम्बन्धेन वा तादृशप्रमात्वादिविशिष्टं यदयोगोळकादि

नच वाच्यत्वाभावस्तादृशो घट इति चेत्, तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिः, तथाचाप्रसिद्धिः। प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः

ज्ञेयत्वत्वादिना वाच्यत्वादीनामभाव सुलभ एव; शेषं दर्शितदिशा ऽवसेयमित्यत आह– **प्रतियोग्यवृत्तिश्चे** ति।

विषयकज्ञानं तेन समं विषयतासम्बन्धेन सामानाधिकरण्यसत्त्वादतिव्याप्ति वारणाय प्रतियोगितावच्छेदकत्वघटकसम्बन्धेनैव प्रतियोगितावच्छेदक विशिष्टत्वस्य विवक्षणीयतया वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन द्रव्यत्वत्वादिमतः समवायादिसम्बन्धावच्छिन्नाभावस्य स्वप्रतियोगिता वच्छेदकसमवायादिसम्बन्धघटित द्रव्यत्वादिनिष्ठव्यापकतायां स्वरूपसम्बन्धेन अवच्छेदकीभूतो यो द्रव्यत्वत्वादिः तदवच्छिन्नप्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकत्वघटकविषयितादिसम्बन्धेन प्रतियोगितावच्छेदक विशिष्टज्ञानादिना समं हेत्वधिकरणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न सम्भवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयत्वेन इदं वाच्यं ज्ञेयत्वादित्यादौ दर्शितभावानां लक्षणाघटकत्वादिति दिक्।

नन्वत्र लक्षणे समवायित्वादिना वाच्यत्वाद्यभावीयसमवायित्वादि रूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वात् वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता, तथाच तत्र तादृशाभाव एव दुर्लभ इत्यत आह– **ज्ञेयत्वत्वादिने** ति। **वाच्यत्वादीनामित्यादि** पदात् घटादेरपि परिग्रहः। **शेष** मिति। स्वविशिष्टयावद्

9475
MAHARAJENDRA SANSKRIT

स्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविवक्षणं हेतुसामानाधिकरण्यादिशरीरे सम्बन्धविशेषनिवेशेन तत्प्रयोजनञ्चेत्यर्थः । अत्र च निरुक्ताभावेषु स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवेशयितुमुचितम्, सद्धेतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेर्लक्षणसमन्वयसम्भवात्; वह्निमान् धूमादित्यादौ कालिकादिसम्बन्धेन हेतुसमानाधिकरणस्य रूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशेन वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसम्बन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेपि क्षतिविरहात्. कपिसंयोगाभावान् मेयत्वादित्यादौ कपिसंयोगादेरुक्तरीत्या व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्याभावेनाऽभावे भावभिन्नत्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेपि न क्षतिः । धूमवान् वह्नेरित्यादौ धूमाद्यभावस्य प्रतियोगिवृत्तित्वेपि अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाद्यभावस्य भावप्रतियोगिकतया अयोगोलकस्वाद्यतिरिक्तस्य प्रतियोग्यवृत्तित्वान्नातिव्याप्तिरित्यवधेयम् ॥

इति द्वितीयस्वलक्षणम् ।

(1) अभावे भावभिन्नत्वविशेषणसत्त्वात् अयमपि लक्षणघटक इति सूचनायैतदुक्तम् ।
अतएवायोगोलकान्यत्वाभावो वेक्षणम् । अन्यथा अयोगोलकान्यत्वे अयोगोलकान्यत्वस्वरूपप्रतियोगिसत्त्वेन तस्यापि प्रतियोग्यवृत्तित्वात् तदुपेक्षणायोगात् ।

[दी] केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य

अथ चक्रवर्तिलक्षणम्।

———*———

चक्रवर्तिलक्षणमाह— **केचित्त्वि** ति। सद्धेतौ साध्यवृत्तिघटत्वादिना साध्याभाव एव लक्षणघटकः, तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वाल्लक्षणसमन्वयः; व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वान्नातिव्याप्तिः। कपिसंयोगी एतत्त्वादित्यादावव्याप्तेर्वारणाय **व्याप्यवृत्ते** रिति। व्याप्यवृत्तित्वं च निरवच्छिन्नवृत्तिकत्वम्, नत्ववच्छिन्नवृत्तिकान्यत्वम्; कपिसंयोगी सत्त्वादित्यादौ कपिसंयोगाभावादेः द्रव्ये अवच्छिन्नवृत्तिकतया तदन्यत्वाभावात् घटत्वादिना साध्याभावस्यैव लक्षणघटकतया अतिव्याप्त्यापत्तेः; निरुक्तव्याप्यवृत्तित्वविशिष्टस्य च हेत्वधिकरणवृत्तित्वं बोध्यम्, अन्यथा कपिसंयोगी एतत्त्वादित्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य द्रव्ये हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादायाव्याप्तेर्वारणासम्भवात्। हेत्वधिकरणनिरूपितनिरवच्छिन्नाधेयतावत्त्वं हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणताकत्वं वा दळद्वयपर्यवसितार्थः।

केचित्तु-- "व्याप्यवृत्तेः हेतुसमानाधिकरणसाध्याभावस्ये"ति समुदायस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः, हेत्वधिकरणे व्याप्यवृत्तित्वं च हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितायाः सामानाधिकरण्येन अनवच्छेदकं यदभावनिष्ठं तद्व्यक्तित्वं तत्त्वम्। नच विशिष्टसत्तावान् जातेरित्यादौ गुणादिनिष्ठसत्त्वादिरूपाभावप्रतियोगितायां विशिष्टसत्ताभावनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वात् विशिष्टसत्त्वाद्यभावस्य व्याप्यवृत्तित्वानुपपत्तिः, यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतु-

मतः तत्त्वमिति विवक्षणे व्यधिकरणधर्मावच्छिन्नाभावस्य असङ्ग्रह प्रसङ्गः, तदभावाप्रसिद्धेरिति वाच्यम्, यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतानवच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात्, गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययेन विशिष्टसत्ताभावत्वावच्छिन्ननिरूपितानुयोगितावैशेष्टायाः सत्ताया गुणादिवृत्तितानभ्युपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तितानिर्वाहादित्याहुः ।

ननु संयोगिभिन्नं प्रमेयत्वादित्यत्रातिव्याप्तिः, संयोगिभेदाभावस्य तद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्य अव्याप्यवृत्तित्वेन लक्षण घटकत्वाभावात्, व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमनादिति चेन्न, संयोगिभेदस्य व्याप्यवृत्तित्वेन तस्य द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदसमनियततया तदभिन्नत्वेन तद्भेदप्रतियोगितावच्छेदक द्रव्यत्वादिकमपि संयोगिभेदाभावः; तस्य हेत्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यनवकाशात् ; एवं द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ व्याप्यवृत्तेः सत्तादिरूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्यव्याप्तिरित्यपि नाशङ्कनीयम्, सत्तादिसत्त्वेपि द्रव्यादौ द्रव्यान्यत्वविशिष्ट सत्ताभावो नास्तीत्यादिप्रत्ययानुदयात् विशिष्टनिरूपिताधिकरणतावैशेष्य स्यैव विशिष्टाभावाभावत्वोपगमात् विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावसमनियततया तदभिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात् ।

परे तु— संयोगत्वेन संयोगनिरूपिताया अधिकरणतायाः किञ्चिदवच्छिन्नत्वेपि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव, द्रव्ये संयोगिभेदस्याप्रत्ययात् अवच्छेदकमनन्तर्भाव्यैव तदभाव-

त्वावच्छिन्नवत्ताप्रतीतेः; एवं द्रव्यादौ सत्तात्वाद्यवच्छिन्नसत्ताद्यधिकरणता-सत्त्वेपि द्रव्यान्यत्वविशिष्टसत्तात्वादिनैव तदवच्छिन्नप्रतियोगिताकाभावा भावत्वेनापि न वृत्तिः, तत्र विशिष्टाभावो नास्तीत्यप्रत्ययात्. तथाच साध्यनिष्ठयादृशप्रतियोगिताकाभावत्वावच्छिन्ननिरूपिता ऽनवच्छिन्नाधिकरण त्ता हेत्वधिकरणवृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यमिति न कश्चिद्दोष इत्याहुः ।

अथात्र हेत्वधिकरणवृत्तित्वं यदि येन केनचित्सम्बन्धेन?, तदा कालिकादिसम्बन्धेन धूमाधिकरणवृत्तिवह्निनित्यावच्छिन्नवह्न्यभावादिकमा-दायाव्याप्तिः; यदि च कालिकसम्बन्धेन काले वह्न्यभावादेः वृत्तिर्वह्न्य नधिकरणदेशावच्छिन्नैवेति नासौ हेत्वधिकरणे निरवच्छिन्नवृत्तिक इति मन्यते?, तदापि सत्तावान् जातेरित्यादौ हेतुमति ज्ञानादौ विषयिता सम्बन्धेन वर्तमानं साध्याभावमादायाव्याप्तिर्दुर्वारैव, दैशिकविशेषणता सम्बन्धेन हेत्वधिकरणवृत्तित्वनिवेशने च घटत्वाभावादिसाध्यके व्यभि चारिण्यतिव्याप्तिः, तत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य भाव रूपसाध्याभावस्य तेन सम्बन्धेनावृत्तेः, व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् ; एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशा भावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः, दैशिकविशेषणतया हेतु समानाधिकरणस्याकाशाभावस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदके सत्त्वात् , कालिकसम्बन्धेनाकाशाभावरूपप्रतियोगिसत्ताया एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीति प्रत्ययानिया मकत्वादाकाशाभावस्यैव तादृशसाध्याभावरूपत्वे बाधकविरहादिति चेन्न, स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकं ज्ञानं विरोधि, तादृशसम्बन्धेन हेत्वधिकरणवृत्तिर्योऽभावः तदीयतादृश प्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात् । आकाशाभावस्य दैशिक विशेषणतासम्बन्धश्च न दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयः,

अपि तु कालिकसम्बन्ध एव, स च तेन सम्बन्धेन आत्मनि न वर्तते, अत आकाशाभावीय साध्यनिष्ठप्रतियोगितायां "यादृशप्रतियोगिते" त्यनेन उपादानासम्भवः, अपि तु व्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव, तादृशाभावज्ञानस्य दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्मप्रकारेण साध्यावगाहिनं भ्रमं प्रति विरोधित्वात् । सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासम्बन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया उक्तदोषतादवस्थ्यमिति "यादृशप्रतियोगिताश्रये" त्युक्तम्; प्रतियोगिताश्रयवत्ताज्ञानं च तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकं ग्राह्यम्, तेन आकाशत्वेन तादृशसाध्यवत्ताज्ञानं प्रति दैशिकविशेषणतासम्बन्धेन आकाशाभावप्रकारकज्ञानस्य विरोधित्वेपि न क्षतिः । एवञ्च प्रतियोगिताश्रयावगाहित्व निवेशे प्रयोजनाभावात् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रति प्रतिबन्धकमित्येव वक्तव्यम्; साध्यवत्ताज्ञानविरोधित्वं वा एतल्लक्षणे निवेशनीयम्; नच आकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यात् साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञान विरोधित्वपर्यन्तनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्यापि व्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वे न साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञाना विरोधितया तादृशसाध्याभावाप्रसिद्धिरिति वाच्यम् घटत्वादिविशिष्टवह्निमानित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारकतायां "अधिकंतिवि" त्यादिन्यायेन अक्षतत्वात् । नच तन्मात्रावच्छिन्नप्रकारकताकत्वमवश्यं निवेश्यम्, अन्यथा आकाशत्वनिरुक्तसाध्यतावच्छेदकोभयरूपेण साध्यज्ञानं प्रति दैशिकविशेषणतया आकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यमिति कथं व्यधिकरणधर्मावच्छिन्नाभावसंग्रह इति वाच्यम्, प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेपि व्यधिकरणधर्मावच्छिन्नाभावासङ्ग्रहात्, तदवच्छिन्नप्रकारतामात्रनिवेशे उक्तस्थले आकाशा-

[दी] साध्याभावस्य प्रतियोगितायामनवच्छेदकं

भावीय दैशिकविशेषणतावारणासम्भवात् . द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासम्बन्धावच्छिन्न प्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन सम्बन्धेन स्वप्रकारकज्ञानं विरोधीति विवक्षणवत् एतल्लक्षणे साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधितानिवेशेन प्रतीकारसम्भवात्, आकाशत्वादेः आकाशाभावाभावत्वादिरूपप्रतियोगितावच्छेदकातिरिक्ततया तदवच्छिन्नप्रकारताकज्ञानविरोधितामादाय दोषाभावात् । हेतुसमानाधिकरणस्य व्याप्यवृत्तेर्वह्नित्वादिमा घटाद्यभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेदकम्, अतः साध्याभावस्येति ।

यद्यपि वह्नित्वेन घटाभावादेः घटत्वेन बह्व्यभावाद्यभिन्नतया तादृशाभावोपि साध्याभाव एव, तथापि प्रतियोगितावच्छेदकभेदेन अभावभेदमतेनेदं लक्षणम्, समनियताभावानामैक्याभिप्रायेणचाऽग्रिमलक्षणम् । अथवा हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशान्न दोषः, वह्नित्वादिना घटाद्यभावस्य घटत्वादिना बह्व्याद्यभावाभिन्नत्वेपि तदीयघटादिनिष्ठप्रतियोगितायां व्यधिकरणवह्नित्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात् । प्रतियोगिता साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन निवेशनीया, तेन सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नासम्भवः. व्यधिकरणधर्मावच्छिन्नप्रतियोगितायां अपि सम्बन्धावच्छिन्नत्वं व्यवस्थापितमेव । प्रतियोगितावच्छेदकत्वं च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं ग्राह्यम्, तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणस्य विषयितया गुणत्वादिमतः समवायेनाभावस्य या ज्ञानादिनिष्ठप्रतियोगिता तदवच्छेदकत्वेपि साध्यतावच्छेदकस्य न क्षतिः; सर्वत्र द्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायैवैतल्लक्षणसमन्वयसम्भवात् ५

[दी] . हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा

व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि क्षतिविरहेण व्यधिकरण धर्मावच्छिन्नाभावखण्डनं मूलकृतो ऽकिञ्चित्करम् , अतो लक्षणान्तरमाह— **हेतुसमानाधिकरणस्ये ति** । अत्र च व्यधिकरणधर्मावच्छिन्नाभावस्या ऽप्रामाणिकत्वे व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादाय व्याप्तेर्वारणाद्योपात्तस्य **सामानाधिकरण्येने** त्यस्य वैयर्थ्यात्लक्षणासाम-ञ्जस्यमिति तादृशाभावखण्डनं सङ्गच्छते । अत्रापि **हेतुसमानाधि-करणस्य व्याप्यवृत्ते** रित्यस्य पूर्वोक्त एव पर्यवसितार्थः, व्यावृत्त्या-दिकमपि पूर्वोक्तमेव । कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशा-भावाभाववान् आत्मत्वादित्यादौ अव्याप्तिवारणाय पूर्वोक्तरीत्यनुसरणे गौरवात् व्याप्यवृत्तित्वं परित्यज्य प्रतियोगिव्यधिकरणत्वेनाभावं विशेष यति — **प्रतियोगिव्यधिकरणस्यवे** ति । पूर्वोक्तलक्षणे साध्याभावस्य विशिष्योपादानात् तस्य च हेत्वधिकरणे साध्यरूपप्रतियोगिसामानाधि-करण्यमावश्यकमेव एकव्यक्तिसाध्यके, अत स्तत्र प्रतियोगिव्यधिकरण साध्याभावाप्रसिद्ध्या अव्याप्तिरिति तन्नोक्तम् ; प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वम् , संयोगी सत्त्वादित्यादौ संयोगाद्यभाव-स्यातथात्वात् तादृशाभावान्तरमादायातिव्याप्तेः; किन्तु प्रतियोग्यनधि-करणवृत्तित्वम् ; एवञ्च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तीति दळ द्रव्यपर्यवसितार्थः । प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नत्वम् , अतः समवायेन ज्ञानादिसाध्यकद्रव्यत्वादि हेतौ नातिव्याप्तिः, इत्थंच प्रतियोगिता न सम्बन्धविशेषावच्छिन्नत्वेन विशेषणीया, विशेषणताविशेषेणाभावसाध्यके सर्वस्यैवाभावस्य तेन सम्बन्धेन किंचिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगि-

[दी] अभावस्य प्रतियोगितायां सामानाधिकरण्येना ऽनवच्छेदकं वा यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः;

व्यधिकरणाभावाप्रसिद्धिः,अतो "यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमत स्तादृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्य" मिति सिद्धान्तलक्षणे वक्ष्यमाणरीत्या निष्कर्षणीयम् ।

अथ विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिर्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वाच्यतया वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगिताया लक्षणघटकत्वासम्भवः, तदवच्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात् ; तथाच **सामानाधिकरण्येने** त्यनर्थकम् । अत्र केचित् ; यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्यार्थं विवक्षणीयम् , दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात् उभयानधिकरणत्वं हेतुमतोऽप्रसिद्धमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारकतया **सामानाधिकरण्येने** त्यस्य सार्थकता; न च वह्नित्वेन घटाद्यभावप्रतियोगिता यावद्वह्निभिन्नवृत्तिरेकैव स्वीक्रियते, न तु घटादिरूपप्रतियोगिभेदेन भिन्ना, अभावस्य प्रतियोगितावच्छेदकस्यैक्यात् ; तथाच घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वं न तत्रेति न **सामानाधिकरण्येने** त्यस्य सार्थकतासम्भवः, प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठायाः वह्न्यादिसामान्याभावीयप्रतियोगितायाः पर्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति

पर्वतादौ सत्त्वात् वह्नित्वादेः तदवच्छेदकत्वमादायाव्याप्तिरिति वाच्यम् ; यतः प्रतियोगिभेदेन न प्रतियोगिताभेदः, अपित्ववच्छेदकभेदेनैव; एव मपि वह्निभिन्नवान् घटादित्वादौ वह्निभिन्नत्वेन वह्न्यभावीयप्रति योगिताया वह्निभिन्ने असम्भाविततया तदाश्रयानधिकरणत्वस्य वह्नि शून्ये हेतुमत्यक्षततया तादृशप्रतियोगितावच्छेदकत्वमादायाव्याप्तेर्वारक तया **सामानाधिकरण्येने** त्यस्य सार्थक्यम् ; महाकाले घटवान् काल परिमाणादित्वादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितैव तादृशी, महाकालस्य तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशू न्यत्वात् अथ वा वक्ष्यमाणरीत्या साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रति योगितावच्छेदकविशिष्टप्रतियोगिकत्वयादृशप्रतियोगिताश्रयप्रतियोगिकत्वहेत्व धिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वैतत्त्वित्वावच्छिन्नाभाव स्तदनवच्छेदक त्वमेव वाच्यम्, एवञ्च तत्रावृत्तिगगनाद्यभावप्रतियोगितैव तादृशी, एवञ्च वह्नित्वादिना घटाद्यभावप्रतियोगिता तादृशी, वह्नित्वविशिष्ट प्रतियोगिकत्वतदाश्रयवह्निभिन्नप्रतियोगिकत्वयोरेकस्मिन् सम्बन्धे अस त्त्वेन तादृशप्रतियोगितायां अपि तथात्वात्तद्वारकतयापि **सामानाधि करण्येने** त्यस्य सफलत्वमवसेयमित्याहुः ।

परे तु— अत्यन्ताभावस्येव अन्योन्याभावस्यापि प्रतियोग्यवृत्ति धर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नित्वविशिष्टाद्यवच्छिन्न जलादिमद्भेदोपि प्रामाणिकः, एवञ्च स्वावच्छेदकविशिष्टावच्छिन्नस्वाश्रय वन्निष्ठप्रतियोगिताकभेदवद्धेत्वधिकरणकं यत्प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेदकस्य निवेशनीयम्, एवञ्च वह्नित्वादिना जलाद्यभावीय प्रतियोगितापि तादृशं स्वम्, कथितभेदस्य तदवच्छेदकवह्नित्वादि विशिष्टावच्छिन्नतदाश्रय जलादिमन्निष्ठप्रतियोगिताकत्वात् ; अत स्तदवच्छे दकतामादाय दोषवारणाय **सामानाधिकरण्येने** ति । " संयोगी द्रव्य-

त्वात् " " वह्निमान् धूमात् " इत्यादौ संयोगत्ववह्नित्वाद्यवच्छिन्न संयोगवह्न्याद्यभावप्रतियोगितायाः गुणत्वद्रव्यत्वाद्यवच्छिन्नसंयोगिपर्वतभेदौ संयोगवह्न्याद्यवच्छिन्नघटादिभेदौचादाय तथात्ववारणायावच्छिन्नान्तनिष्टान्तयोरुपादानम् ; अथ वा यादृशप्रतियोगितावच्छेदकावच्छिन्नयादृश प्रतियोगिताश्रयवृत्तिप्रत्योगितावच्छेदकताकभेदवत्त्वं हेतुमतः तदनवच्छेदकत्वं विवक्षणीयम्, वह्नित्वावच्छिन्नघटाभावप्रतियोगिताप्येतादृशी, तादृशप्रतियोगितावच्छेदकवह्नित्वाद्यवच्छिन्नतादृशप्रतियोगितासमानाधिकरणप्रतियोगितावच्छेदकाकस्य वह्नित्वेन घटवान्नेति प्रतीतिविषयभेदस्य हेतुमति सत्त्वात् व्यधिकरणधर्मस्यात्यन्ताभावप्रतियोगितावच्छेदकत्ववदन्योन्याभावप्रतियोगितवच्छेदकतायामप्यवच्छेदकत्वात् ; अत एव " समवायितया वाच्यत्ववद्भेदोपि द्रष्टव्य " इति मिश्रैरभिहितम् ; इत्थंच तादृशप्रतियोगितावारणाय **सामानाधिकरण्येने** ति । हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वं घटत्वेन वह्निमद्भेदवत्त्वंचादाय वह्नित्वाद्यवच्छिन्न वह्निनिष्ठप्रतियोगितायाः तादृशत्ववारणाय प्रकृतप्रतियोगितासमानाधिकरणत्वतदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छेदकतायां निवेशनम् ; महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितादायैव लक्षणसमन्वयः, न तु गगनत्वपटत्वादिना घटाद्यभावीयप्रतियोगिताम्, गगनत्वपटत्वाद्यवच्छिन्नघटवृत्तिप्रतियोगितावच्छेदकताकभेदस्य हेत्वधिकरणमहाकाले सम्भवेपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः ; अथ वा तादृशप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छेद्यत्वाभावः, तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव विवक्षणीयम्; इत्थंच व्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायापि लक्षणसमन्वयस्तत्र सम्भवतीत्यवधेयम् । वह्नित्वेन वह्निधूमोभयं नास्तीत्येतादृशप्रतीतिविषयाभावस्य "वह्निमान् वह्नित्वेन वह्निधूमोभयवान्ने" ति

प्रतीतिसिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेपि तस्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तम्, तथा सति वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमत्यपि तादृशभावाप्रत्ययप्रसङ्गात्; किन्तु वह्नित्व तदुभयत्वयोरेव तत्पर्याप्तिः, अतस्तादृशप्रतियोगितायां समानाधिकरण तया अवच्छेदकत्वेपि वह्नित्वस्य न क्षतिः; यदि च तादृशाभाव प्रतियोगितावच्छेदकं वह्नित्वादिकमेव, न तु प्रतियोगिविशेषणतापन्नमुभयत्वम्, प्रतियोगिविशेषणतानापन्ने प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्विशेषणतापन्ने तदनवगाहनात्, अन्यथा वह्नित्वेन घटो नास्तीत्यादावपि घटत्ववह्नित्वाद्युभयावच्छेदकत्वपर्याप्त्यवगाहनौचित्यात् **सामानाधिकरण्येने** त्यस्य वैयर्थ्यापत्तेः, वह्नित्वेनोभयाभावप्रतियोगिता च व्याप्यवृत्तिः, अतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरिति मन्यते, तदा **सामानाधिकरण्येने** त्यस्य प्रतियोगितापर्याप्त्यधिकरण वृत्तित्वेनेत्यर्थ इत्याहुः ।

तदुभयमपि न युक्तम्, एवं सति घटत्वादिना साध्याभाव प्रतियोगिताया अपि निरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसम्भवेन प्रथम लक्षणे प्रतियोगिवैयधिकरण्यानभिधानस्य निर्बीजतया सन्दर्भविरोधापत्तेः

वस्तुतो यादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकयत्किंचिद्धर्मावच्छिन्नानधिकरणत्वं हेतुमतः तदनवच्छेदकत्वं साध्यतावच्छेदकस्य निवक्षणीयम्, कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकं कपिसंयोगत्वादिकमेव, तदवच्छिन्नानधिकरणत्वं च न हेतुमत इति न कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्तिः; घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनैव प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेयं नास्तीत्यादिज्ञाने भानात् प्रमेयत्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसम्भवात् घटत्वाद्यवच्छिन्नप्रतियोगि-

तायां यादृशप्रतियोगितेत्यनेनोपादानासम्भवात् तथाविधप्रतियोगितायाः अप्रसिद्धेः अतो यादृशप्रतियोगितेत्यादि बोध्यम्। दण्डमान् दण्डिसंयोगादिस्थादौ तत्तद्दण्डावच्छिन्नाधिकरणत्वमादाय दण्डिसामान्याभावस्य प्रतियोगिवैयधिकरण्येऽपि न क्षतिः, तत्तद्दण्डावच्छिन्नात्यन्ताभावप्रतियोगितावच्छेदकत्वमादाय दोषवारणाय तत्र परम्परासम्बन्धेन दण्डत्वादेः साध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वात्, तत्संयोगत्वावच्छिन्नवह्नित्वादिविशिष्टप्रतियोगिविषयकाभावभाने संयोगत्ववह्नित्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने मानाभावात् तत्संयोगत्वावच्छिन्नवह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः, संयोगत्ववह्नित्वावच्छिन्नप्रतियोगितायाः घटत्वावच्छिन्नत्वेन घटो नास्तीत्यभावबुद्धौ संसर्गतया भानोपगमे भ्रमनिरूपितत्वेन प्रकारता निवेशनीया, विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वान्नाति व्याप्तिः; वह्नित्वाद्यवच्छिन्नघटादिनिष्ठव्याधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितासम्बन्धावच्छिन्नप्रकारतानिरूपितवह्नित्वावच्छेदकघटत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् **सामानाधिकरण्येने**त्यस्य सार्थकता, एकमात्रवृत्ति साध्यकस्थले साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमत इति साध्यवृत्तितथाविधप्रतियोगितायां अप्रसिद्धया न पूर्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वं निवेशितम्, वह्नित्वादिना उभयाभावमादाय दोषस्तु पूर्ववदेव वारणीय इति।

अन्ये तु— यदि "घटत्वेन वह्निर्नास्ति" "वह्नित्वेन घटो नास्ती" त्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वं भासते, अन्यथा तादृशप्रतीतेः प्रतियोगिनिष्ठतत्तद्धर्माणां उपलक्षणतया भाने तद्विशिष्टवैशिष्ट्यानवगाहितया तान्निर्विकल्पकानन्तरमप्युत्पत्त्यापत्तेः; नच वह्नित्वघटत्वादेः

प्रतियोगितावच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तरं तादृशाभावबुद्धि-रिष्टैव, प्रतियोगितावच्छेदकतया यदवभासते तन्निर्विकल्पकानन्तरं अभाव प्रतीत्यनुपपत्तादिति वाच्यम्, वह्नित्वादिनिर्विकल्पकानन्तरं तथाविध प्रत्ययोपगमे विशेषाभावेन तदुत्तरं वह्नित्वाद्यंशे प्रतियोगितावच्छेद कत्वानवगाहि वह्निर्नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यय - स्यापि स्वीकारापत्तेः इत्युच्यते, तदा व्याप्यवृत्तितानिवेशपक्षे वह्नि त्वादेः व्याप्यवृत्तित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकत्वमा-दायासम्भवप्रसक्तिरित्याशङ्क्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार ; तदर्थः प्रतियोगितावच्छेदकत्वविशिष्टाधिकरणवृत्तित्वमेव, तथा सत्यपि हेतुमतो घटत्वादिविशिष्टाधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येऽपि तस्य सार्थक्यसम्भवात् । नच प्रतियोगितावच्छेदकविशिष्टाधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रति योगितावच्छेदकताकभेदवत्त्वम्, तथाच संयोगत्वाद्यवच्छिन्नघटादिमद्भेद मादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिः, भेदप्रतियोगि तावच्छेदकतायां प्रकृतप्रतियोगिसामानाधिकरण्यनिवेशने च "परे"त्वि- त्यादिना अभिहितद्वितीयकल्प एव पर्यवसानमिति घटत्वादिना वह्न्या द्यभावस्यापि प्रतियोगिवैयधिकरण्यापत्त्या वह्नित्वादेः तत्प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकतया ऽव्याप्तेरिति वाच्यम्, व्यधिकरणधर्मा वच्छिन्नप्रतियोगितावच्छेदकभेदानभ्युपगमेनैवोक्तापत्त्यसम्भवात् घटत्वेन पटवान्नेत्यादौ घटत्वाद्यवच्छिन्नपटात्यन्ताभावस्यैव विषयत्वोपगमात्, प्रति योगितावच्छेदकं सामानाधिकरण्येन यत्रावच्छेदकं तादृशप्रतियोगिता-वच्छेदकताक एव वा भेदो निवेश्यः, अथैवमपि घटत्वाद्यवच्छिन्नवह्न्या द्यभावस्य घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्व मादायाव्याप्तिर्दुर्वारैवेति चेन्न; सामानाधिकरण्येन प्रतियोगितायां यद् यच्छेदकं यत् तदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैव

[दी] एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते । हेतौ

निवेशनीयत्वात् । अत्र वह्नित्वादिना घटाद्यभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकम् ? तदा घटादिमति तादृशाभावाप्रसङ्ग इति वह्नित्वघटत्वाद्योरेव अवच्छेदकतापर्याप्तिरुपगन्तव्या, तथाचानवच्छेदकस्यावच्छेदकतापर्याप्त्यनधिकरणपरतया व्याप्येयत्वेव तादृशाभाव प्रतियोगितामादाय दोषाप्रसक्तेः सामानाधिकरण्येने त्यस्य वैयर्थ्य मशक्यवारणमेवेति चेन्न, प्रतियोगिविशेषणतापन्नतदनापन्नयोरवच्छेदकता वैलक्षण्येन -प्रत्येकमेवावच्छेदकतापर्याप्तेः पर्याप्तिविवक्षामात्रेण प्रतीकारा सम्भवात् सामानाधिकरण्येने त्यस्य सार्थक्यम् . तदपि प्रतियोगि विशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्याप्तिघटनाधिकरणत्व लाभायैव, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात्; अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्याप्तयोरप्यवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकतात्वेन अनुगतयोः समानाधिकरणधर्मव्यधिकरण धर्मद्वये पर्याप्त्यन्तरम् . तादृशानुगतरूपावच्छिन्नपर्याप्तयधिकरणधर्मावच्छिन्नस्यैवाभावविरोधितेति नानुपपत्तिः, एवञ्च हृदत्ववह्नित्वोभयावच्छिन्नवह्न्यभावमादाय पर्याप्तिनिवेशनव्यावृत्तिप्रदर्शनं समानाधिकरण धर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्व पक्षीयव्याप्यवृत्तित्वघटितलक्षणाभिप्रायेणेति वदन्ति ।

अव्यभिचारिसम्बन्धरूपता— अवयवशक्त्या अव्यभिचारि सम्बन्धपदप्रतिपाद्यता; तथाच पूर्ववन्नैव तत्पदस्य पारिभाषिकतेति भावः । ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारपदार्थस्य तच्छरीरे अनिवेशात्कथमेवमित्यत आह– हेता विति । यथा हेत्व-

न्वयिसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं व्यभिचारः तथा साध्यतावच्छेदकान्वयिनो हेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येन अवच्छेदकत्वस्यापि तथात्वादित्यर्थः । वह्निर्धूमस्य व्यभिचारीत्यत्राभाववद्वृत्तित्वं व्यभिचारपदार्थः. तदेकदेशेचाभावे षष्ठ्यर्थप्रतियोगितायाः निरूपकत्वसम्बन्धेन अन्वयः, प्रतियोगितायामाधेयता सम्बन्धेन धूमस्यावच्छिन्नत्वसम्बन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः, साध्यतावच्छेदकावच्छिन्न साध्यान्तर्भावेन न व्यभिचारपदार्थता, शक्त्यानन्त्यप्रसङ्गात् , साध्य वाचकपदवैयर्थ्यापाताच्च; एवं समानाधिकरणाभावप्रतियोगितायां सामानाधिकरण्येन अवच्छेदकत्वं व्यभिचारपदार्थः, सामानाधिकरण्ये च व्युत्पत्तिवैचित्र्यात् प्रथमान्तपदोपस्थाप्यस्यापि वह्नेर्निरूपकत्वेनान्वयः, वह्न्याद्यन्तर्भावेनैव वा शक्तिः, धूमपदं लक्षणया धूमत्वपरम् , आधेयत्वं षष्ठ्यर्थः, अन्वयश्चास्य अवच्छेदकत्वे; निरूपक मिनिप्रत्ययार्थः, तथाच धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपको वह्निरित्यन्वयबोधः । यद्यपि लाघवरूपविनिगमकसत्त्वादभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पनमुचितम् . तथापि ज्ञेयत्वं वाच्यत्व स्याव्यभिचारीति प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकम् , तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासम्भवात् , उक्तरूपस्य व्यभिचारपदार्थत्वे व्यभिचारस्याभावोऽव्यभिचारमित्यव्ययीभावाश्रयणात् ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचारपदार्थः, इनिप्रत्ययार्थो निरूपकम्, वाच्यत्व पदं वाच्यत्वत्वपरम् , षष्ठ्यर्थश्चाधेयत्वम् , तथाच वाच्यत्वत्वनिष्ठस्व समानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकं ज्ञेयत्वमित्यन्वयबोधः ।

अथैवमप्यव्यभिचारिसम्बन्धपदेन उक्तव्याप्तेः कथं लाभः ? नचा व्यभिचारिपदं तादृशप्रतियोगितानवच्छेदकत्वाश्रयपरम् , सम्बन्धश्च

[दी] साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदकहेतुनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् । अवच्छेदकत्वंचेह तत्पर्याप्त्यधिकरणत्वम्,

---

तदाश्रयसामानाधिकरण्यमिति तल्लाभ इति वाच्यम्, वह्नित्वं धूमा व्यभिचारीति प्रयोगाभावात् उक्तधर्मबोधकाव्यभिचारपदसमभिव्याहृत मत्वर्थीयस्याश्रयत्वाबोधकत्वात् अव्यभिचारिपदार्भान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकताया व्युत्पत्तिसिद्धत्वात् ; साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वे "हेतुसमानाधिकरणे" त्यादिव्याप्तिबोधस्याशक्यत्वाच्चेति चेन्न, "अव्यभिचारिसम्बन्ध" इत्यस्याव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यमित्यर्थः, एवञ्च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्यवसितम् , उक्तलक्षणस्याप्यत्रैवार्थे तात्पर्यम् , न तु यथाश्रुतविशेष्यविशेषणभावे, तदापन्नस्य अव्यभिचारि सम्बन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया दुर्वारत्वात् ; नच यद्रूपावच्छिन्नस्य यस्य व्याप्तित्वं तदन्यरूपेण तस्याव्यभिचारिसम्बन्ध पदार्थत्वेपि न क्षतिरिति वाच्यम् , एवं सति साध्याभाववद्वृत्तित्व मात्रस्य व्यभिचारपदार्थत्वेपि व्यतिरेकिसाध्यकोक्तव्याप्तेरव्यभिचारिसम्बन्धरूपतोपपत्तेरुक्तधर्मस्य व्यभिचारपदार्थत्वव्यवस्थापनाया अनुपयुक्तत्वात्; उक्तलक्षणेपि साध्यसामानाधिकरण्यमन्तर्भाव्याव्यभिचारिसम्बन्धरूपतायाः व्यवस्थापयितुं शक्यत्वात्; साध्यसामानाधिकरण्यानन्तर्भावेपि प्रतियोगि समानाधिकरणस्वसमानाधिकरणतादृशयावदभावकत्वरूपपर्यवसितपूर्वलक्ष - णार्थस्याव्यभिचारिसम्बन्धरूपतासम्भवात् । **अवच्छेदकत्व** मिति । अवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्यविषयावच्छेदकत्वमित्यर्थः । **तत्पर्याप्त्यधिकरणत्वम्** – पर्याप्तिसम्बन्धेनावच्छेदकतावत्त्वम् , तथाच

[दी] तेन विशिष्टवह्न्यभावस्य ह्रदत्वघटित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्य न क्षतिः.

पर्याप्तिसम्बन्धेन अवच्छेदकत्वावच्छिन्नस्य भेदो नवच्छेदकपदेन विवक्षित इति भावः । **विशिष्टवह्न्यभावस्य प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्ये त्यन्वयः** । महानसीयत्वादिविशिष्टवह्न्यभावप्रतियोगितायां महानसीयत्वसहितस्य वह्नित्वस्यावच्छेदकत्वेपि आश्रयत्वसम्बन्धेनावच्छेदकतावदन्यत्वस्य वह्नित्वे दुर्लभत्वादिति भावः । प्रतियोगिविशेषणतापन्नधर्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं दर्शयित्वा प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयत इति नियमानभ्युपगन्तुर्व्यधिकरणधर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मसहित प्रतियोगिवृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताको ऽभावोस्तीति व्युत्पादनाय तादृशाभावमादायापि दूषणं दर्शयति - **ह्रदत्वे** ति । उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः । **न क्षति** रिति । अवच्छेद्याश्रयविशेषणभावापन्नेषु तदनापन्नेषु च नानाधर्मेषु पर्याप्तं यदवच्छेदकत्वं पर्याप्तिसम्बन्धेन तदवच्छिन्नभेदस्य तत्पर्याप्त्यनवच्छेदकप्रत्येकधर्ममात्रवृत्तिधर्मावच्छेदेन सत्त्वाद्वह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य पटत्वाद्यवच्छिन्ने घटपटोभयत्वाद्यवच्छिन्नभेदवन्निष्प्रत्यूहत्वादिति भावः । नच वह्निनिष्ठह्रदत्व वह्नित्वोभयावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येन यदवच्छेदकत्वं तद्वह्नित्वमात्रे पर्याप्तम् , ह्रदत्वस्य व्यधिकरणतयैव अवच्छेदकत्वादिति कथं वह्नित्वस्य तादृशावच्छेदकत्वावच्छिन्नान्यत्वनिर्वाह इति वाच्यम् , यत **स्सामानाधिकरण्येन अनवच्छेदक** मित्यस्य तत्प्रयोगितासमानाधिकरणवृत्तियत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटवत्त्व

[दी] सत्त्ववति च गुणादौ संयोगाद्यभावोपि व्याप्य वृत्तिः, वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम्;

मर्थः, इत्थंच द्रव्यत्वबहित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्यप्येकमेवावच्छेदकत्वमुभयपर्याप्तम्, तदवच्छिन्नभेदो बहुनित्वे अव्याहत एवेति ।

ननु संयोगादिसाध्यकसद्धेतावव्याप्तिवारणाय तदभावव्यावर्तक व्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूपव्यभिचारिहेतावति व्याप्तिप्रसङ्गः, अभावान्तरस्यैव लक्षणघटकत्वादित्याशङ्कां व्यभिचारि हेतुकस्थले संयोगाद्यभावस्य लक्षणघटकत्वप्रदर्शनेन परिहरति— **सत्त्ववती** ति । **व्याप्यवृत्ति** रित्युपलक्षणम्; प्रतियोगिव्यधिकरणश्चेत्यपि बोध्यम् । अयं भावः;— व्याप्यवृत्तित्वमत्र नावच्छिन्नवृत्तिकान्यत्वम्, न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभावः, प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, किंत्वनवच्छिन्नवृत्तिकत्वम्, स्वाधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वा व्याप्यवृत्तित्वम्, प्रतियोग्यनधिकरणवृत्तित्वञ्च प्रतियोगिवैयधिकरण्यं संयोगाद्यभावसाधारणम्, हेत्वधिकरणे तथात्वस्य विवक्षितत्वात्; सद्धेतुस्थले न तादृशाभावस्य लक्षणघटकता, तत्र गुणादेर्हेत्वनधिकरणत्वात्; सत्त्वादिहेतुकस्थले तु तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगिव्यधिकरणश्च साध्याभावो लक्षणघटक एवेति । **वक्ष्यमाण** मिति । "सिद्धान्तलक्षण" इत्यादिः । **तदवच्छेदकत्वम्**— प्रतियोगितावच्छेदकत्वम् । **इहापि**— एतल्लक्षणेपि । **बोध्यम्**— विवक्षणीयम्; अन्यथा लघुरूपसमानियत गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तेरिति भावः । तथा च संयो-

गादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेपि न क्षतिः, व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्त्यप्रसक्तेरिति यथाश्रुता शयो ऽवगम्यते, स च न सङ्गच्छते, सत्तावान् जातेरित्यादौ (सत्ा त्वस्य) हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनति रिक्तवृत्तिताया स्सत्तात्वसाधारणतया अव्याप्तेर्वारणाय स्वविशिष्टसम्बन्धि निष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणी यतया तद्घटकाभावे व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादि साध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादे र्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वनिवेशनवैयर्थ्यात् । नच स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्या व्याप्यवृत्तितापक्षे संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावीय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धिः तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेना भावानां केवलान्वयित्वादिति स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्व विशेषणस्य आवश्यकतेति वाच्यम्, संयोगाद्यभावव्यावर्तकस्यावच्छिन्न वृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य निवेशने संयोगेन साध्यतायां हेतुसमा नाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावो गुणादीनामेव व्याप्य वृत्तिः, न तु द्रव्यस्येति तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्ब न्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धितादवस्थ्यात् प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य एक सम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विशेषणत्वपक्ष स्यैव अवलम्बनीयतया व्याप्यवृत्तित्वविशेषणवैयर्थ्यस्य दुरुद्धरत्वात्

[दी] भवति च गुणत्वगुणावृत्तित्व द्रव्यमात्रसमवेतत्वाद्यव च्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यन- तिरिक्तवृत्त्येव संयोगत्वमित्याहुः । साध्यतावच्छेदकविशिष्ट साध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरण-

---

त्तस्माद्वक्ष्यमाणंवेति ग्रन्थस्याभावे व्याप्यवृत्तित्वविशेषणं न देयमेव, तददानेपि संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभा- षिकावच्छेदकत्वविरहेण अव्याप्त्यप्रसक्तेरित्याशयः ।

तत्र च पारिभाषिकावच्छेदकत्वशरीरनिविष्टस्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकम्, अन्यथा तुल्ययुक्त्या सत्तादिहेतुकेपि संयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्वाहादिति हेतुमन्निष्ठाभावेपि तद्विशेषणमावश्यकम्, अन्यथा ऽव्याप्तेरित्याशङ्कां सत्तादिहेतुकस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाः पारिभाषिकावच्छेदकत्वंसंयोगत्वादौ प्रदर्श्य वारयति—**भवतिचे** ति । गुणत्वाद्यवच्छिन्नाभावानां व्याप्य- वृत्तित्वाभिधानं तु संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेद- कत्वसूचनाय. जन्यद्रव्येप्युत्पत्तिकालावच्छेदेन गुणत्वाद्यवच्छिन्नाभावस्य नवीनैरुपगमा त्तन्मते गुणत्वस्य संयोगत्वंविशिष्टसम्बन्धिनिष्ठाभावीय प्रतियोगितानवच्छेदकत्वं न सम्भवतीति गुणवृत्तित्वानुधावनम्, संयोगी गुणान्यत्वे सांते सत्त्वादित्यादौ गुणावृत्तित्वं न विशिष्टहेतुसमानाधि करणाभावप्रतियोगितावच्छेदकम्, अतः संयोगसाध्यकव्याभिचारिमात्रे यादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं सम्भवति तादृशं धर्ममाह — **द्रव्यमात्रसमवेतत्वे** ति ।

इति चक्रवर्तिलक्षणम् ।

अथ प्रगल्भलक्षणम् ।

प्रगल्भस्य लक्षणद्वयं एकदोषेण दूषयितुमुपन्यस्यति - **साध्य तावच्छेदकविशिष्टे** त्यादिना विशिष्टाभावो विशेष्यविशेषणसम्बन्धाभाव

रूपः, उभयाभावस्तु परम्परासम्बन्धेन द्वित्वाभाव इति मतेनेदं लक्षणम्, अन्यथा व्यधिकरणधर्मावच्छिन्नाभावं विनापि लक्षणसमन्वयसम्भवे **प्रतियोग्यवृत्तिश्चे** ति ग्रन्थानुत्थितिरिति बोध्यम्, [अथ वा साध्याभावपदं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावपरमिति ।] अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वम्, न तु स्वरूपसम्बन्धविशेषः, यथोक्तधर्मयोस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात्; स्वपदं हेतुतावच्छेदकावच्छिन्नपरम्, तथाच साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्तियद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्मवत्त्वं व्याप्तिरिति समुदितार्थः, सद्धेतौ साध्यासमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेत्वसमानाधिकरणत्वनियमात्तादृशसाध्याभावत्वं साध्यसामानाधिकरण्यानतिरिक्तवृत्तीति लक्षणसमन्वयः । व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरिक्तवृत्त्येव तदिति नातिव्याप्तिः । गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय **साध्यतावच्छेदकविशिष्टे** ति । साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यम्, तेन संयोगादिना धूमादेरभावस्य समवायादिना धूमादिमति स्वावयवे वृत्तावपि नातिव्याप्तिः । द्रव्यं विशिष्टसत्त्वादित्यादौ अव्याप्तिवारणाय हेतुतावच्छेदकविशिष्टत्वोपादानम्, तद्विशिष्टाधिकरणं हेतुतावच्छेदकसम्बन्धेन बोध्यम्, तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेपि न क्षतिः । साध्यहेतुसामानाधिकरण्यघटकवृत्तिद्वयं दैशिकविशेषणतासम्बन्धेन बोध्यम्, तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वावच्छिन्नद्रव्यत्वाद्यभावस्य कालिकसम्बन्धेन साध्यवन्महाकालादिवृत्तित्वेपि न क्षतिः । (सत्त्वात् द्रव्यत्वादित्यादौ सत्त्वाभावस्य

[दी] साध्याभावत्वकत्वम्, यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं,

---

यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकप्रभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्वचम्, तथापि यावन्तस्त्वसमानाधिकरणसाध्याभावाः विशिष्टसाध्यसमानाधिकरणा इत्यर्थस्य विवक्षणीयत्वान्न दोषः। **यत्समानाधिकरणे** ति। यद्रूपविशिष्टसमानाधिकरणेत्यर्थः, तेन "द्रव्यं- गुणकर्मान्यत्वे सति सत्त्वात्" इत्यादौ सत्तासमानाधिकरणद्रव्यत्वावच्छिन्नद्रव्यत्वाभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वेपि न क्षतिः। यद्धर्मावच्छिन्नसामानाधिकरण्यं शरीरे च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वं निवेशनीयम्, तत्प्रयोजनं च स्फुटमेव; अधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यम्, तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगाभावादिविषयकप्रमाया अव्याप्यवृत्तित्वज्ञानविरहकालिकायाः साध्यवत्ताज्ञानप्रतिबन्धकत्वेपि न क्षतिः। **प्रमायाम्**— प्रमासामान्ये; तेन व्यभिचारिणि नातिव्याप्तिः। समानाधिकरणधर्मावच्छिन्नाभावत्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि विरोधित्वात् सद्धेतावपि लक्षणगमनासम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनम्। प्रमापदं च यावद्भ्रमभिन्नपरम्, अत उक्तभ्रमात्मकज्ञानस्याभावत्वांशे प्रमात्वेपि न क्षतिः। साध्यवत्ताज्ञानपदमपि तत्सामान्यपरम्, अतो व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्मवत्त्वेन साध्यवत्ताज्ञानविरोधित्वेपि न क्षतिः, एवञ्च साध्यपदं साध्यतावच्छेदकविशिष्टपरम्, ज्ञानञ्च स्वसमानधर्मितावच्छेदककत्वेन स्वविषयीभूताभावप्रतियोगितावच्छेदकसम्बन्धसंसर्गकत्वेन च विशेषणीयम्, अतो धूमत्वाद्यवच्छिन्न

[दी] सर्वत्र साध्याभावपदवैयर्थ्यात् ।

संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञान सामान्यान्तर्गतं द्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्मावच्छिन्नविशेष्यक धूमत्वावच्छिन्नप्रकारकं समवायादिसम्बन्धेन धूमत्वाद्यवच्छिन्नप्रकारकं च ज्ञानं प्रत्यप्रतिबन्धकत्वात् कामिनीजिज्ञासादेरेव तादृशज्ञानसामान्ये विरोधित्वादतिव्याप्तेर्नावकाशः ।

साध्याभावपदवैयर्थ्या दिति । अत्र च साध्यतावच्छेदकविशिष्टसामा नाधिकरण्यावच्छेदकत्वं स्वव्यापकतादृशसामानाधिकरण्यकत्वम् , तथाच साध्यतावच्छेदकविशिष्टसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावत्व व्यापकतावच्छेदकं तत्त्वं व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यम् , यत्समानाधिकणनिष्ठाभावप्रतियोगितावच्छेदक· त्वाभावरूपयत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरण साध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरण साध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सा मानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात् तदघटितलक्षणसम्भवे प्र- कृतलक्षणवैयर्थ्यानवकाशात् । एवं यत्समानाधिकरणसाध्याभावप्रमात्व व्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावः तत्त्वमित्येतादृशार्थकत्वे द्वितीय लक्षणेपि न तद्वैयर्थ्यम् , यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावात् यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकताया मभावान्तरस्यैव निवेशादि त्यवेधेयम् ॥

इति प्रगल्भलक्षणम् ।

[दी] यत्तु – साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं

अथ विशारदलक्षणम् ।

साध्याभाववती ति । यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः । वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिता व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्व विषयितैव, सा च न वह्न्यनुमितिं प्रति प्रतिबन्धकतावच्छेदिका, तच्छालिज्ञानस्यानुमित्यप्रतिबन्धकत्वात् . व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी, तद्वतो ज्ञानस्य च व्यभिचारज्ञानाधिर्यानुमितिप्रतिबन्धकत्वात् तादृशविषयितायाः अनुमिति प्रतिबन्धकतावच्छेदकत्वान्नातिव्याप्तिः । यन्निष्ठत्वानुपादाने धूमावयंशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठवह्नित्वेन वह्न्यभाववद्वृत्तित्वत्वावेशिष्टनिरूपितविषयितायाः अप्यनुमितिप्रतिबन्धकतावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः, अतस्तदुपादानम्; तथाच भ्रमविषयवह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्न दोषः ।

यन्निष्ठपदार्थनिरूपितविषयितासामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्य इति वा व्युच्यते? तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव यत्र समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन भातम्, तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयितायाः अप्यनुमिति प्रतिबन्धकतावच्छेदकत्वादसम्भवः अव्याप्तिर्वेति साध्याभाववद्वृत्तित्वत्व विशिष्टनिरूपितत्वं विषयितात्रिशेषणम्, तादृशभ्रमविषयिता च न साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता, तादृशविषयितानिरूपकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात् । नच तद्विशिष्ट-

निरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वम् ? तदा समानाधिकरण धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्भ्रमविषयवृत्तावसत्त्वेपि तन्निष्ठ विषयितानिरूपकत्वे व्यधिकरणीभूयावच्छेदकत्वात् भ्रमविषयिताया स्तद्विशिष्टनिरूपितत्वमक्षतमेव; यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं तन्निरूपितत्वमेव विशिष्टनिरूपितत्वम् ? तदा व्यधिकरणधर्मावच्छिन्न साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयिताया अक्षतमिति कथं तद्व्यावृत्तिरिति वाच्यम् ; विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्य-मानस्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवत्यां व्यक्तौ विशेष्य सम्बन्धितावच्छेदकताया भानात् साध्याभाववद्वृत्तित्वरूपविशेषणविशिष्ट विषयेण निरूपकीभूय विषयिताव्यावर्तने व्यावर्तकविषयस्य आश्रयतया व्यावर्तकं यत्साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विष यिताव्यावर्तकत्वादुक्तभ्रमविषयिताव्यावृत्तिः तद्व्यावर्तक विषयाव्यावर्तकस्य त न्निष्ठसाध्याभाववद्वृत्तितात्वस्य तादृशविषयितानिरूपकतानवच्छेदकत्वादिति तादृशविषयिताया लक्षणाघटकत्वात् ; एवंचोक्तभ्रमविषयिताव्यावर्तकतयैव साध्याभाववत्पदसार्थक्यम्, तादृशविषयिताया उक्तक्रमेण हेतुनिष्ठसाध्या भाववद्वृत्तित्वत्वविशिष्टानिरूपितत्वेपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपित त्वानपायात् . साध्याभावमनुपादायाधिकरणवृत्तितात्वविशिष्टविषयितानिवेशे वृत्तौ समानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयितावारणेपि वृत्तिविशेषणे तन्निरूपके अधिकरणे समानाधिकरणधर्मावच्छिन्नाभाव भ्रमविषयितावारणसम्भवात्साध्याभावांशनिवेशस्यापि सार्थक्यात् । नच तावत्पर्यन्तनिवेशेपि वह्नित्वावच्छिन्नवह्निप्रतियोगिताकत्वेन व्यधिकरण धर्मावच्छिन्नप्रतियोगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशसाध्याभाववद्वृत्तित्वविषयतापि साध्याभाववद्वृत्तित्व त्वविशिष्टनिरूपितैव, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको य स्साध्या भाव स्तद्वद्वृत्तित्वस्यैव तद्विशेषणतया भानात् तद्विशिष्टत्वस्य च तादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वादिति तद्दोषता-दवस्थ्यमिति वाच्यम् ; अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगि-

ताकत्वसम्बन्धेन साध्यप्रकारकं व्यभिचारज्ञानमेव अनुमितिविरोधि, तथाच यत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यं प्रकारः तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वसम्बन्धेन साध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्य अप्रसिद्धया तादृशज्ञानविषयितायाः विशिष्टनिरूपितत्वासम्भवात् । साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबन्धकतावच्छेदककोट्यप्रवेशादतिव्याप्तिः, अतो विषयितापर्यन्तानुधावनम्। हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयतापर्याप्यभावविवक्षणे साध्यप्रतियोगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः, प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वावगाहिन एव ज्ञानस्यानुमिति प्रतिबन्धकतया तदघटितविषये प्रतिबन्धकतावच्छेदकविषयितायाः अपर्याप्तेः ; साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च न सम्भवतीति तदुपेक्षितम् । व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावादतिव्याप्तिः अतः **सामान्ये** इत्युक्तम् । प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरम्, अन्यथा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावविषयकसमूहालम्बनात्मकप्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वस्य हेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामपि सत्त्वात्सद्धेतावपि लक्षणगमनासम्भवात् ; **एवंच प्रकृते** त्यनुपादाने कामिनीजिज्ञासादौ प्रसिद्धा या अनुमितिसामान्यप्रतिबन्धकता तदवच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वादिविषयितायामक्षत एव, तद्विषयकज्ञानस्याप्यन्यलिङ्गकान्यसाध्यकान्यसंसर्गकानुमित्यप्रतिबन्धकत्वात् ; अतः **प्रकृते** ति तत्साध्यकतद्धेतुकतत्संसर्गकपरम् ; सद्धेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायाः अनुमितिप्रतिबन्धकस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसम्भवस्स्यात् , अतो यन्निष्ठसाध्याभाववद्वृत्तित्व-

विषयिकज्ञानसामान्यस्यानुमित्यप्रतिबन्धकत्वमुपेक्ष्य निरुक्तविषयितासामान्ये अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्यन्तानुधावनम् । अवच्छेदकत्वं च स्वरूपसम्बन्धविशेषः; नच धूमाभाववद्वृत्तित्वत्वेन घटादिविषयकज्ञानस्यानुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्य असम्भवात्तादृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वासत्त्वेनातिव्याप्तिरिति वाच्यम् , धूमाभाववद्वृत्तित्वत्वप्रकारतानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसम्भवात् तादृशविषयितात्वेन वास्तव धूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्याक्षतत्वात् । नचैवं समानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयिताया व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वात्समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम् , हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् , उक्तभ्रमे च समानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टानिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्तिवचनवकाशात् ।

अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नाभावे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभव-

दभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासत्त्वेन असम्भवेपि व्यधि करणधर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपित-त्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपित विषयिताद्वयेन अनुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वात् अव्याप्ति रिति चेन्न : तादृशभ्रमस्याऽप्रामाणिकत्वात् , प्रामाणिकत्वे च संस र्गाभावविषयिताद्वयानिरूपकतया लक्षणघटकत्वेन अभावविषयिताया विशेष णीभूततया सामञ्जस्यात् ।

अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विधयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्य सम्बन्धविधया लक्षणघटकत्व मावश्यकम् , स च सम्बन्ध स्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व रूपो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैव असिद्धिः, व्यतिरेकि साध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवः, चर मस्य निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्तिः, प्रतियोगितावच्छेदकधर्मा णांचोपलक्षणीभूतेन केनचिद्रूपेण अनुगमस्य निवेशो न सम्भवति, प्रति योगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया अभानात्; नचावच्छेदका वच्छिन्नत्वाविशेषितप्रतियोगितायाः सम्बन्धतया निवेशान्नाऽननुगमनिबन्ध नो दोष इति वाच्यम् , अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविष-यकाभावज्ञानस्य प्रतियोगिसंसर्गाज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रति योगिविशेषिताभावज्ञानस्यचानुभवविरुद्धतया अवच्छेदकावच्छिन्नत्वाविशे-षितप्रतियोगितायाः संसर्गतया अभानात् : नच स्वावच्छिन्नप्रतियोगिता कत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एव अभावो निवेश्यः, न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादि मत्पक्षस्थले लक्षणघटक इति वाच्यम् , वमेयत्वावच्छिन्नाभावस्य पक्षस्थले

तादृशाभावाप्रसिद्धेः; एवं स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नि त्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटक प्रतियोगितायां बाधितस्य वह्न्यादिनिष्ठत्वस्य भानं तादृशज्ञानीयाभाव विषयिताया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततया अनुमितिविरोधितयाचानुपपत्तेर्दुर्वारत्वात्, स्वावच्छिन्नसाध्यवृत्तित्वविशिष्ट प्रतियोगितानिवेशे च सर्वत्र सद्धेतावप्रसिद्धिः, एवं प्रतियोगिविशेष्य-तापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वातन्त्र्येण व्यधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामा णिकम्, न तु प्रतियोगिविशेष्यतानापन्ने, 'वह्निर्नास्ति' 'वह्नित्वेन घटो नास्ती' त्येव प्रतीतेः, न तु वह्नित्वेन नास्तीति; तथाच विशिष्य प्रतियोग्यविशेषितस्य उक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशो न सम्भवत्येवेति चेत्?—मैवम्; प्रति योग्यविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवेश्यते, अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्बन्धः तत्प्रतियोगि साध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन, यत्र हेतुसमा नाधिकरणघटत्वावच्छिन्नवह्न्याद्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्व सम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपका भावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकतावच्छेदकः सम्बन्ध इति तद्विषयिताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाद्यभावे तन्निष्ठवह्नित्वावच्छिन्न प्रतियोगिताकत्वमेव वह्नेस्सम्बन्धतया भासते, तत्र तत्सम्बन्धप्रति योगी न वह्निः, अपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रति योगित्वनिवेशात् तादृशज्ञानीयाभावविषयिताव्युदासः, साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्स-म्बन्धानुयोगिनि वह्नित्वावच्छिन्नप्रतियोगिताकघटाभावे प्रकारः तादृश ज्ञानीयाभावविषयितायाः तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेप्यनु-

[दी] नास्ति तत्त्वं व्याप्तिरिति; तन्न, अनुमित्यविरोधित्वज्ञानस्यानुमितिहेतुत्वे साध्याभाववद्वृत्तित्वज्ञानस्या ऽनुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात् ।

मितिविरोधित्वेन च न दोषः, यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकताकत्वं विवक्षणीयमिति दिक् ।

नच व्यभिचारज्ञानस्य अनुमितिकारणव्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्वादनुमित्यप्रतिबन्धकत्वमिति व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्, तज्जनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्यैव विवक्षितत्वात् ।

अनुमित्यविरोधित्वज्ञानस्य अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैव । **अनुमितिहेतुत्व** इति । पूर्वमेव सिद्धत्व विषयतानिष्ठतादृशावच्छेदकत्वाभावघटितस्यैव अनुमितिकारणीभूतज्ञानविषयत्वादिति भावः । **अनुमित्यविरोधितया** — अनुमितिजनकज्ञानाप्रतिबन्धकतया; साध्याभाववद्वृत्तित्वज्ञानस्यानुमितिजनकत्वाभावादिति भावः । **अतिप्रसङ्गा** दिति । हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविषयितासामान्ये अनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदकत्वाभावस्याक्षतत्वादिति भावः । नच "हेतुनिष्ठसाध्याभाववद्वृत्तित्व विषयिता अनुमितिप्रतिबन्धकतावच्छेदिका" इत्येतादृशज्ञानीयहेतुनिष्ठसा-

[दी] केचित्तु– यावन्तस्साध्याभावाः प्रत्येकं तत्तत्सजातीया ये

ध्याभाववद्वृत्तित्वविषयितायाः अपि तादृशविषयितासामान्यान्तर्गततया तत्र च प्रकृतव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वस्यापि सत्त्वेनातिव्याप्त्यनवकाश इति वाच्यम्, एवं सति सद्धेतावपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयित्वे अनुमितिप्रतिबन्धकतावच्छेदकत्वभ्रमनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायां अनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन लक्षणगमनाऽसम्भवादितराविशेषणत्वेन तादृशविषयितायाः एव लक्षणे निवेश्यतया विषयितावैशिष्ट्येन साध्याभाववद्वृत्तित्वविषयितायाः प्रतिबन्धकतावच्छेदकत्वेनातिव्याप्तिवारणासम्भवादिति ध्येयम् ॥

इति विशारदलक्षणम् ।

अथ मिश्रलक्षणम् ।

मिश्ररीत्या साजात्य घटनेन साध्याभाववद्वृत्तित्वरूपामेव व्याप्तिं परिष्कृत्योपन्यस्यति — **केचित्त्वि** ति । धूमवान् वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिः अतो **यावन्त** इति । तथाच यावदन्तर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः, तत्रैव समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय **प्रत्येकं तत्तत्सजातीया** इति । तथाच वक्ष्यमाणरूपेण व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजा-

दी] तत्तदधिकरणवृत्तित्वाभावः तद्वत्त्वं तत्त्वम् ; साजात्यं च समानासमानाधिकरण-

---

र्थीयत्वाभावान्न दोषः । यावत्साध्याभावत्वेन साध्याभावानां निरूपकतया साजात्ये अन्वये व्यतिरेकिसाध्यके वह्निमान् धूमादित्यादौ यावत्साध्याभावनिरूपितत्वस्य क्वचिदपि साजात्ये असत्त्वाद्यावत्साध्याभावसाजात्यप्रसिद्ध्या अव्याप्तिः, अतः तत्तद्व्यक्तित्वेन तेषां साजात्ये अन्वयलाभाय **तत्तदिनितत्तत्साजात्येति** इत्यनेन उपस्थितानां समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसजातीयानामेकस्मिन्नधिकरणवृत्तित्वाभावे 'एकत्र द्वय' मिति रीत्या ऽभेदान्वये पुनर्व्यतिरेकिसाध्यके अव्याप्तिः, एकत्रोभयसाजात्याभावात्, अतः एकैकाभावे एकैकाभावसजातीयाभेदान्वय उपगन्तव्यः, एतदर्थतात्पर्यग्राहकं **प्रत्येक** मिति प्रथमाबहुवचनान्तं **तत्तदधिकरणवृत्तित्वाभावा** इत्यस्य विशेषणम् . यावत्साध्याभावत्वेन साध्याभावानामधिकरणे अन्वये वह्निमान् धूमादित्यादौ तत्तद्ध्रदावृत्तित्वावच्छिन्नसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्त्वेन अव्याप्तिस्स्यात् ; अतः तत्तद्व्यक्तित्वेन भावानामधिकरणे अन्वयलाभाय चरमं चार्वादि ति । **तत्त्व** मिति । अव्यभिचरितत्वमित्यर्थः ।

ननु तत्तत्सजातीयत्वं तत्तद्वृत्तिधर्मवत्त्वम्, तथाच समानाधिकरणधर्मावच्छिन्नाभाववृत्त्यभावत्वादिधर्मवत्त्वं व्यधिकरणधर्मावच्छिन्नाभावेऽपि वर्तत इति तस्यापि तत्सजातीयत्वाद्व्यभिचारिण्यतिव्याप्तिरत आह— **साजात्यञ्चे** ति । **समानासमानाधिकरणे** ति । समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः । तृतीयार्थश्च अभेदः, तस्य च साजात्ये अन्वयः, "विवक्षणीय"

[दी] धर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण;

मिति शेषः; तथाच **तत्तत्सजातीया** इत्यस्य तत्तदभाववृत्तितादृशान्यतररूपवन्त इत्यर्थः ।

यद्यपि वह्नित्वाद्यवच्छिन्नवह्न्यभावनिष्ठस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपम्, तच्च तदधिकरणवृत्तित्वाभावे असम्भावितमेव; तथापि स्वासमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वं समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वम्, स्वसमानाधिकरणधर्मावच्छिन्ना या या प्रतियोगिता तत्तदनिरूपकत्वमेव च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षणीयम्; तच्च साध्याभावतद्वद्वृत्तित्वाभावोभयसाधारणमेव; समनियताभावैक्यमते च स्वाधिकरणावृत्तिधर्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्वरूपो **व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वे** त्यस्य यथाश्रुतार्थ एवादरणीयः; तन्मते व्यधिकरणधर्मावच्छिन्नसाध्याभावतथाविधतद्वद्वृत्तित्वाभावयोरैक्या तादृशसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तादृशप्रतियोगितानिरूपकत्वस्य तथाविधतद्वद्वृत्तित्वाभावेपि सत्त्वात्। एतेन समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नाभावस्य समवायादिसम्बन्धावच्छिन्नगगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकतया व्यधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या समानाधिकरणधर्मावच्छिन्नसमानाधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकत्वपर्यन्तनिवेशनायासो नोपादेयः; समनियताभावैक्यमते गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणं सम्भवतीति ध्येयम् ।

[दी] साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येतव्यः,

ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्तयभावादीनां अधिकरणे हेतोर्वृत्तित्वाद्वह्निमान् धूमादित्यादावव्याप्तिरत आह— **साध्याभावश्चे** ति। **द्वितीयरीत्ये** ति। **यत्समानाधिकरणाना** मित्यादिद्वितीयलक्षणरीत्येत्यर्थः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षित इति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्निघटोभयाभावमादाय तद्दोषतादवस्थ्यम्, अतः प्रथमरीत्येति नोक्तम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिसाध्यकस्थले वाच्यत्वत्वादिना घटाद्यभावमादाय लक्षणसमन्वयेपि स्वरूपसम्बन्धेन तादात्म्यसम्बन्धेन वा प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या अव्याप्तिः, अतो व्यापकतावच्छेदकपर्यन्तानुधावनम्; तथाच ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव तथेति न दोषः। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यके तार्णातार्णाभयाभावादिकमादाय दोषस्य व्यासज्यवृत्तिधर्मावच्छिन्नत्वं प्रतियोगितायां निवेश्य वारणेपि सत्तादिसाध्यकस्थले विशिष्टसत्ताद्यभावमादाय दोष इति तादृशाभावो न निवेशितः, व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता न्यूनवृत्तिधर्मावच्छिन्ना अतिरिक्तवृत्तिधर्मावच्छिन्ना वा या या प्रतियोगिता तत्तदन्यत्वेन विशेषणीया, तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटान्यतराभावमादाय न दोषः। न्यूनवृत्तित्वमतिरिक्तवृत्तित्वं च विरुद्धव्यावृत्तं निर्वाच्यम्, नाऽतो व्यधिकरणधर्मावच्छिन्नाभावासंग्रहः। व्यापकता च साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, तेन संयोगादिना वह्न्यादिसाध्यके समवायादि-

ना वह्न्याद्यभावमादायाऽसम्भववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगिताया विशेषणीयतया समवायादिना द्रव्यत्वादिसाध्यके विषयितादिसम्बन्धेन साध्यव्यापकस्य ज्ञानादे स्समवायादिना अभाव मादाय दोषस्य नावकाशः. तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्न प्रतियोगितावच्छेदकताकभेद एव लक्षण घटकः, समनियताभावैक्यमते तादृशभेदस्य व्यधिकरणधर्मावच्छिन्न प्रतियोगिताकात्यन्ताभावाभिन्नतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धिसम्भवात् ।

यत्तु– संयोगेन प्रमेयत्ववान्नेति प्रतीतिसाक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताकभेद एव लक्षण घटकः, अत्यन्ताभावस्येव येन सम्बन्धेन तदवृत्तिर्यो धर्मः तत्सम्बन्धेन तदवच्छिन्न प्रतियोगितावच्छेदकताकभेदस्याप्युक्तप्रतीतिबलात्सिद्धिरिति; तन्न, " वह्निमान् धूमात् " " गुणवान् द्रव्यत्वात् " इत्यादौ विषयितादिसम्बन्धेन वह्नित्वगुणत्वादिमतः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य व्यावर्तनाय व्यापकतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यनिवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेपि लक्षण घटकत्वासम्भवात् ।

ननु कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाद्यभावस्यापि लक्षणघटकतया तदधिकरणे हेतोर्वृत्तेरव्याप्तिः; नच साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात् तादृशाभावानां न लक्षणघटकतेति वाच्यम् ; संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वसम्पत्तये व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात् ।

(सत्ताद्यसाधारणधर्मावच्छिन्नाभावोपादाने हेतुतावच्छेदकसंबन्धेन
करणाधिकरणे वर्तमानत्वविशेषणे स्वरूपसंबन्धेन

लाद्दः—)

[दी] व्याप्यवृत्तिश्च

अन्यथा साध्यवत्युत्पत्तिकालावच्छेदेन वह्नित्वद्रव्यत्वाद्यवच्छिन्नस्य संयोग सम्बन्धेनाभावसत्त्वात् साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्व स्यैवाऽप्रसिद्धिप्रसङ्गात्; तथाच तत्तदधिकरणपदेन तत्तदभावीयव्याप्य वृत्तित्वनिरूपकाधिकरणमेव विवक्षणीयम्, व्याप्यवृत्तित्वनिरूपकत्वं निर वच्छिन्नाधेयतानिरूपकत्वम्; एवञ्च संयोगाद्यभावस्य तथाविधाधिकरणं गुणादिरेवेति न दोषः, इत्थञ्च कपिसंयोगाभाववान् (1) कपिसंयोगाधिकरण त्वाभाववान् वा मेयत्वादित्यादौ कपिसंयोगतदधिकरणत्वादिरूपाणां याव त्साध्याभावान्तःपातिनां अभावानां तथाविधाधिकरणाप्रसिध्या अव्याप्तिः, अतः साध्याभावं व्याप्यवृत्तित्वेन विशिनष्टि— व्याप्यवृत्तिश्चे ति। तथाच तादृशाभावस्य तथाविधयावदनन्तर्गततया तथाविधाधिकरणा प्रसिद्धावपि न क्षतिः। व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वम्, नत्व वच्छिन्नवृत्तिकान्यत्वम्, तथा सति संयोगेन धूमादिसाध्यकव्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाभावस्य महानसादाववच्छिन्नवृत्तिकतया अयो गोळकान्यत्वाद्यभावे साध्यातावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपा वच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव स्यैव लक्षणघटकतया अतिव्याप्तिः; एवञ्च वह्न्यभावसंयोगाभावादे रपि क्वचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयाव्याप्यवृत्तिता निरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्य वृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयम्।

ननु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्म त्वादिहेतावव्याप्तिः, व्याप्यवृत्तेः साध्याभावस्य आकाशाभावरूपस्य व्याप्य वृत्तितानिरूपकाधिकरणात्मादौ हेतोः वृत्तेः, अतस्तदभावीयप्रतियोगिता

[दी] प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा,

वच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयम्, प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशादेतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसम्बन्धघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वावच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतायां हेतुमत्यसत्त्वेपि नातिव्याप्तिः; तथाच कालिकसम्बन्धावच्छिन्नप्रतियोगताकाकाशत्वाभावाभावादिसाध्यका ऽऽत्मत्वादिहेतौ अव्याप्तिः, तत्र व्याप्यवृत्तियावत्साध्याभावान्तःपातिनः आकाशत्वाभावादेः प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धेः; कालेप्याकाशावच्छेदेन तादृशसाध्यरूपतदभावीयप्रतियोगिसत्वात् सर्वत्रैव तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वात्; अतो व्याप्यवृत्तित्वमुपेक्ष्य तादृशाभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशयति – **प्रतियोगितावच्छेदकावच्छिन्ने** ति। अत्र च समनियताभावैक्यमते विश्वेषामेव व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितया तत्तत्प्रतियोग्यनधिकरणाप्रसिद्ध्या तदसंग्रहः; विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिवैयधिकरण्येन लक्षणघटकतानिर्वाहेपि प्रतियोगिभेदेन प्रतियोगिताभेदमते जन्यज्ञानविषयत्वादिसाध्यके यत्किञ्चित्कालावच्छेदेन परमाण्वादौ प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नाभावस्य यत्किञ्चित्प्रतियोग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाऽप्रसिद्ध्या अव्याप्तिः, तत्रापि यत्किंचित्प्रतियोगितान्तर्भावेन तादृशानधिकरणत्वप्रसिद्धिसम्पादने यत्किंचित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे हेतोर्वृत्त्या अव्याप्तितादवस्थ्यम्. एवं वह्निमान् धूमादित्यादौ द्रव्यत्वाद्यवच्छिन्नस्य

संयोगेन योऽभाव स्तस्य द्रव्येप्युत्पत्तिकालावच्छेदेन वर्तमानस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणगुणादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धया अव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धेन कस्याचिदधिकरणे प्रतियोगिवैयधिकरण्यमभावे विशेषणं देयम् ; एवञ्च एतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतयातिव्याप्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम् ।

अथ केवलान्वयिस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः, नच यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव निवेशनीयम्, तथाच समनियताभावानामैक्योपगमेन व्यतिरेकितावच्छेदकधर्मस्यापि उक्ताभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिकरणत्वस्य प्रसिध्या तेषां लक्षणघटकतेति वाच्यम्, तथासति संयोगाभावादिसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किंचित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात् तद्व्यावर्तनासम्भवात्. विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणाप्रसिद्धेः दुर्वारत्वात्, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिध्या तादृशप्रतियोगिवैयधिकरण्यं दुर्घटमिति ।

अत्र केचित् ;– स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणा ये ये तदन्यत्वं व्यधिकरणान्तार्थः, न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वम् ; व्यधिकरणधर्मावच्छिन्ना

भावस्य तादृशप्रतियोग्यप्रसिध्या असङ्ग्रहात् ; नचैवं सति धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगसम्बन्धघटितव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकानां धूमाद्यभावानां उत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेः व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतया अतिव्याप्तिरिति वाच्यम्, साध्यतावच्छेदकसम्बन्धेन व्यापकतामनिवेश्य येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावं निवेश्य विषयिता सम्बन्धेन साध्यव्यापकज्ञानस्य समवायसम्बन्धावच्छिन्नाभावमादायोक्तदोषस्य वारणीयतया अयोगोळकभेदादेरभावमादायातिव्याप्तिवारणसम्भवात् ; यादृशप्रतियोगितावच्छेदको यो धर्मः तद्विशिष्टतादृशप्रतियोगितासामानाधिकरण्यं विवक्षणीयम्, तेन समनियताभावैक्यमते तादृशवाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नतया वाच्यत्वादिप्रतियोगिकत्वेन प्रतियोगितावच्छेदकवाच्यत्वत्वादिविशिष्टवाच्यत्वादिरूपप्रतियोगिसमानाधिकरणत्वेपि न क्षतिः ; नचैवमपि वाच्यत्वादिसाध्यकस्थले सर्वेषामभावानां पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यम्, स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता विशेषणीये त्यत्रैव प्रतियोगितावच्छेदकेत्यादेः तात्पर्यात् वाच्यत्वत्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्ध्या निरुक्तप्रतियोगिताभिन्नत्वेन तन्निरूपकाभावमादाय वाच्यत्वादिसाध्यके लक्षणसमन्वयसम्भवात् । नच तथापि एदतभावभिन्नं मेयत्वादित्यादौ साध्यव्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतदभावमात्रवृत्तेरभावमात्राधिकरणकतया अधिकरणस्वरूपत्वात् एतदभावभेदादिरूपप्रतियोगिसमानाधिकरणतया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्न

प्रतियोगिताको ऽभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरिति वाच्यम् , स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्तते योऽभावः तदीयप्रतियोगितामिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया विशेषणीयतया एतदभावाधिकरणे एतदभावभिन्ने एतदभावत्वेन एतदभावरूपैतदभावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभावभेदो नास्तीत्यप्रतीत्या एतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभाव त्वेन तस्यावृत्तित्वादेतदभावभेदत्वावच्छिन्नप्रतियोगितायां निरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुः;—

तच्चिन्त्यम् ; व्यापकताघटकसम्बन्धावच्छिन्नाभावानिवेशे व्यापकताशरीरे प्रतियोगिवैयधिकरण्यस्याभावाविशेषणत्वेपि संयोगादिना धूमादि साध्यकव्यभिचारिणि अयोगोळकान्यत्वाद्यभावमादायातिव्याप्तिवारणसम्भवात् , तत्र तन्निवेशे प्रयोजनाभावेन अव्याप्यवृत्तिसाध्याभावमादाया व्याप्तयनवकाशात् तदभावे व्याप्यवृत्तित्वादिविशेषणव्यावृत्त्यसङ्गतेः ; अस्तु वा साध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतया तदभावव्यावर्तनाय व्यापकताशरीरे प्रतियोगिवैयधिकरण्यप्रवेशः, तथाप्येतादृशप्रतियोग्यसामानाधिकरण्यविवक्षणे तस्याव्याप्तिवारणप्रयोजनकताभिधानासङ्गतिः, अभावे तदनिवेशे व्याप्यवृत्तिसाध्यकेपि यावत्साध्यवद्विषयकजन्यज्ञानव्यक्तिविशेषस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकताश्रयत्वात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसम्भवस्यैव प्रसङ्गात् ।

अत्र वदन्तिः;— प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमेव तदर्थः, नच व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धेः केवलान्वयिसाध्यके प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरव्याप्तिरिति वाच्यम् ,

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं हि स्व प्र ति- योगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्- वृत्तित्वम्, ज्ञेयत्वत्वादिना वाच्यत्वाद्यभावस्य तादृशभेदसमानाधिकरण तया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं सुघटमेव, व्यधि करणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकज्ञेयत्वत्वादिना वाच्यत्ववद्भेदस्यैव तथात्वात् कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभाव स्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभावादिमद्भेदसामानाधिकरण्यसत्त्वात् तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणाप्र- सिद्ध्या अव्याप्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगिता वच्छेदकतायां विशेषणम्, तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छे दकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि नि- रुक्तप्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिनिष्ठप्रतियोगितावच्छेदकताक- त्वात्तत्सामानाधिकरण्यमादाय कपिसंयोगाद्यात्मकाभावानां प्रतियोगितावच्छे दकावच्छिन्नप्रतियोगिवैयधिकरण्यवारणाय साध्यतावच्छेदकावच्छिन्नव्या पकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयम्, समवेतसामा न्याभावत्वादेः कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः, नचात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगिता वच्छेदके विशेषिते तत्तत्साध्यव्यक्तयभावादीनामीदृशप्रतियोगितावच्छे- दकावच्छिन्नप्रतियोगिवैयधिकरण्यं न घटते, साध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकाप्रसिद्धेः; तथाच **साध्या- भावश्चे**त्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकता वच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति वाच्यम्, **साध्याभावश्चे**त्यादिग्रन्थस्य व्याप्यवृत्तित्वनिवेशकल्पे अभावे साध्य तावच्छेदकावच्छिन्नेत्यादिविशेषणदानपरत्वात्; द्वितीयकल्पे च प्रतियोगि तावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छे-

दकत्वेन विशेषणा तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावो लक्षण घटक इत्यर्थकत्वात् एतत्कल्पे अभावांशे तादृशप्रतियोगिताकत्वविशेषण विरहेपि क्षतिविरहात् ; तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेद सामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेद प्रतियोगितावच्छेदकतायां विशेषणम्, संयोगसामान्याभावादेरपि संयोगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यात्मकाभावस्य प्रतियोगितावच्छेदक कपिसंयोगाभावत्वादिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय या दृ श प्र ति योगितावच्छेदको यो धर्मः तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवेशनीयम्, कपिसंयोगाभावत्वं च कपि संयोगाभावनिष्ठप्रतियोगितायामेव अवच्छेदकम्, संयोगसामान्याभावश्च न तादृशप्रतियोगिताश्रय इति तादृशभेदमादाय न दोषः । भेद प्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वमपि निवेशनीयम् , तेन कपिसंयोगाभावत्वाद्यवच्छिन्नकपिसंयोगाभावादिनिष्ठ विषयितादिसम्बन्धावच्छिन्न प्रतियोगितावच्छेदकताकभेदसामानाधिकरण्येपि न तद्दोषतादवस्थ्यम्. एवं प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्य निरूपकत्वं स्वनिष्ठं यत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठ प्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यं तन्निरूपकत्वम् , अतो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः. "कपिसंयोग्येतत्त्वा" दित्यादौ हेत्वधिकरणेपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतो भेदसत्त्वात् तस्यापि तादृशाधिकरणत्वापत्तिः, अतो ऽवच्छिन्नान्तनिष्ठान्तयोरुपादानम्. पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यम्, अतस्त-

स्प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं निवेशनीयम्; एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगितावच्छेदकं विशेषणीयम्; तेन संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य द्रव्ये सत्त्वात्तस्य न प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः; एवं सम्बन्धविशेषनिवेशनमपि पूर्ववद्बोध्यम् । तथाच स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना यावत्यः प्रतियोगिताः तत्तदवच्छेदकावच्छिन्नतत्तदाश्रयनिष्ठप्रतियोगितावच्छेदकताकभेदवदधिकरणवृत्तित्वव्यापकतास्तत्तत्सजातीयप्रतियोगिताकाभाववत्त्वमिति निष्कर्ष इति।

अव्यापकप्रतियोगिताकतत्तत्प्रतियोगितानिरूपकाभावसजातीयाभाववत्त्वमिति – पाठः ।

अभावे यथाश्रुतसाध्यप्रतियोगिकत्वं परित्यज्य स्वप्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्यावृत्तिमाह– तेने ति । तत्तत्साध्यव्यक्तेरभाववति हेतोः वृत्तावपि नाव्याप्तिरिति योजना. " एतद्रूपवानेतद्रसा " दित्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववन्निस्साध्यमेव, तत्र हेतोः अवृत्तेर्लक्षणगमनसम्भवान्नासम्भवः ।

अथ साध्यवति तद्रूपैतद्रूपोभयत्वावच्छिन्नाभावसत्त्वेन तत्रापि लक्षणगमनाभावादसम्भवः; नच नासौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः प्रतियोगितावच्छेदकीभूतोभयत्वेन रूपेणोभयवद्भेदस्य उभयवतोऽसिद्धत्वेन अप्रसिद्धेरिति वाच्यम्, उभयत्वेनान्यतरवद्भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकस्य उभयाभाववति सत्त्वात्तस्यापि तादृशभेदमादाय तत्त्वादिति चेन्न; व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापक-

[दी] तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्याभाववति वृत्ता-

---

साध्यतावच्छेदकप्रतियोगिताकस्य वा ऽभावस्य निवेशे तादृशोभयाभावादिवारणं सम्भवतीत्यभिप्रायेणाव्याप्तिलिखनात् ।

अव्याप्यवृत्ते रिति । यद्यप्येतद्ग्रन्थस्य स्वयमुक्तस्याभावे व्याप्यवृत्तित्वादिनिवेशनस्य प्रयोजनप्रदर्शनपरत्वं साध्यपदं कपिसंयोगाभावादिपरमेव वाच्यम्, न तु कपिसंयोगादिपरम्, कपिसंयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेपि स्वाधिकरणपदस्य व्याप्यवृत्तित्वादिनिरूपकाधिकरणपरतायां अभावे व्याप्यवृत्तित्वादिनिवेशेप्यावश्यकत्वात् तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोरवृत्तेरव्याप्तिवनवकाशात् कपिसंयोगाभावादे र्गुणादौ निरवच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्तनासम्भवाच्च; तथाच कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेपि तदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेवाव्याप्तिप्रयोजिका, न तु तादृशाभावीयव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति वृत्तावपि हेतोरिति न सङ्गच्छते, तथाप्यभावे व्याप्यवृत्तित्वविशेषणानुपादाने यावदन्तर्गतकपिसंयोगादीनां व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धि स्स्यादिति तादृशाधिकरणपर्यन्तं न विवक्षणीयम्; तथाच सत्यव्याप्यवृत्तिसाध्यकस्थले हेतो स्साध्याभाववद्वृत्तित्वानिबन्धनाव्याप्तिः, सा च व्याप्यवृत्तित्वाद्युपादानान्न सम्भवतीत्यभिप्रायः ।

अथ वा कपिसंयोगादिसाध्यकहेतो स्साध्याभावीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशौपयिकम्, अत स्तदधीना या कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावीय तादृशाधिकरणाप्रसिद्धिर्निबन्धना

[दी] वपि हेतोर्नाव्याप्तिः, तद्वद्वृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तित्व
त्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बोध्यः, तेन

---

sव्याप्ति स्तत्सम्पादकमपीति न तादृशग्रन्थासङ्गतिः; एतेन कपिसंयोगाभावादिसाध्यकस्थले तादृशाधिकरणाप्रसिद्धिभयेन व्याप्यवृत्तितानिरूपकाधिकरणानिवेशे व्याप्यवृत्तिसाध्यकस्थलेपि क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्याव्याप्यवृत्तेरधिकरणे हेतो वृत्त्या लक्षणगमनासम्भवात् असम्भव एव सम्भवतीति अव्याप्तिरिति लिखनं न युज्यत इत्यपि निरस्तम्।

* (एतद्रूपादिसाध्यकस्थले स्वरूपसम्बन्धेन हेतौ साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नाभावीयव्याप्यवृत्तितानिरूपकाधिकरणत्वस्यासमवायिनि प्रसिद्धेः तत्र तादृशाधिकरणाप्रसिद्धिनिबन्धनलक्षणगमनासम्भवादसम्भवाभावात्) तत्तत्साध्याभावाधिकरणवृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्मव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावं निवेश्यचेद्वार्यते? तदा व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयस्य तादृशस्य तद्वद्वृत्तित्वत्वेन घटाघभावस्य प्रसिद्धिर्गुरुधर्मस्य प्रतियोगित्वावच्छेदकत्वाङ्गीकार एव सम्भवनि, अन्यथा तादृशाभाववद्वृत्तित्वत्वस्य वृत्तित्वत्वरूपलघुधर्मसमानिय ततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेः; अन्यूनानतिप्रसक्तत्वरूपावच्छिन्नत्वनिवेशे ह्रदवृत्तित्ववद्ह्रदान्यनिर्धूमवृत्तित्वोभयाभावादेः निर्धूमवृत्तित्वत्वादिसमनियत धर्मावच्छिन्न प्र ति यो गि ता क त या तद्वति धूमादिसाध्यकवह्न्यादिहेतावतिव्याप्तेः; तत्तत्साध्याभाववद्वत्तित्वविशिष्ट त्व व्यापकतावच्छेदकरूपावच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना ह्रद वृत्तित्वघटान्यतराभावमादाय तद्दोषतादवस्थ्यमित्यन्यादृशाभावं तत्तदधिकरणवृत्तित्वाभावपदेन विवक्षयति— तद्वदि ति । व्यापकान्तमनवच्छि-

---

❀ कुण्डलितग्रन्थः क्वाचित्कः ।

[दी] तत्तत्साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नाति प्रसङ्गः ।

न्नान्तं च प्रतियोगितावशेषणम् । प्रथमविशेषणप्रयोजनमाह— **तत्तत्साध्याभाववद्व्यक्तिविशेषे** ति । यद्व्यक्तौ हेतुरपि न वर्तते तादृश हूदादिव्यक्तीत्यर्थः. व्यभिचारनिरूपकहेत्वधिकरणमात्रवृत्तिर्यो Sयंगोळकादि व्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपा वच्छिन्नाभाव स्तद्वद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसम्भवात् किंचि-द्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसङ्गं दर्शयति — **पार्थिवत्वादिविशेषितस्ये** ति अग्रिमेण **साध्यभाववद्वृत्तित्वस्ये** त्यने नान्वितम् । वह्न्यादौ पार्थिवत्वादिविशेषणाभावा त्तद्विशिष्टनिर्धूमवृत्तित्वा भावमादायेत्यर्थः ।

द्वितीयविशेषणप्रयोजनं दर्शयति— **द्वित्वाद्यवच्छिन्नस्ये** ति । घटनिर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः । **नातिप्रसङ्ग** इति। हूदादिवृत्ति त्वत्वपार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितायावह्या दिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्वृत्तित्वत्वाव्यापकत्वात् । द्वित्वाद्यवच्छिन्नाभावप्रतियोगिताया द्वित्वादिवद्व्यासज्यवृत्तिताविरहेण निर्धूम वृत्तित्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपानिर्धूमवृत्तित्वत्वादिव्यापकत्व-सत्त्वेपि व्यासज्यवृत्तिधर्मावच्छिन्नत्वा त्तादृशाभावानां लक्षणाघटकत्वादिति भावः । व्यासज्यवृत्तिधर्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगि-तानवच्छेदकत्वरूपव्यापकत्वविरहात् तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापक धर्मावच्छिन्नाभावनिवेशे द्वित्वावच्छिन्नाभावमादायातिप्रसङ्गस्य वारण-सम्भवेपि प्रतियोगितायां व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना

[दी] अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यम्, तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न क्षतिः. इत्थंच साध्वाभावोपि

ह्रदादिवृत्तित्वघटान्यतराभावमादाय अतिप्रसङ्गो न शक्यते वारयितु मिति तत्र तद्विशेषणप्रवेशनस्यावश्यकत्वे व्यासज्यवृत्तिधर्मावच्छिन्नाभाव वारणाय तादृशधर्मानवच्छिन्नत्वमेव तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापक-धर्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमिति तदेव निवेशितम्; व्यासज्यवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम् ।

साध्याभाववद्वृत्तित्व मिति । साध्याभाववत्सम्बन्धित्वमित्यर्थः; तेन तादात्म्यसम्बन्धेन वृत्तेरप्रसिद्धावपि न तत्सम्बन्धावच्छिन्नहेतुका व्याप्तिः, सम्बन्धप्रतियोगित्वरूपसम्बन्धित्वैकदेशसम्बन्धे **हेतुतावच्छेदक सम्बन्धेने** ति– तृतीयार्थाभेदान्वयः **वृत्तावपी**ति । सम्बन्धित्वेपीत्यर्थः । **न दोष** इति । हेतुतावच्छेदकसम्बन्धानिवेशे वह्निमान् धूमादित्यत्र वह्न्य-भाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यभाववत्समवेतत्वाद्य वृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वं प्रत्यव्यापकत्वेन तादृशाभा वस्य लक्षणघटकत्वानुपपत्तेः वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य तद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्समवेतत्ववति धूमे असत्त्वात् अव्याप्तिः प्रसज्यते; हेतुतावच्छेदकसम्बन्धनिवेशे च निर्वह्निसंयुक्तत्व त्वावच्छिन्नाभावस्यापि तादृशसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्या-पकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय लक्षणसमन्वय इति भावः । **इत्थंच** — हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वविव-क्षणे च; 'सती' ति शेषः । तदविवक्षणे च वक्ष्यमाणाप्रसिद्धिविर-ह्रादुपष्टम्भासङ्गतिः ।

[दी] हेतुतावच्छेदकसम्बन्धेन कस्याचिदधिकरणे वर्तमानो ग्राह्यः; तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदक सम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः

हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरण इति । अनुयोगितासम्बन्धेन हेतुतावच्छेदकसम्बन्धवद्वृत्तिरित्यर्थः । अथवा हेतुतावच्छेदकसम्बन्धेन धर्मवद्वृत्तिरित्यर्थः; विशिष्य हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसम्भवेपि बहुपदार्थघटितहेतुतावच्छेदकस्थले धर्मत्वेन निवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय **कस्यचिदि** त्यभिहितम् ।

अथ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ समानाधिकरण धर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्य सत्तादिरूपहेतुसमानाधिकरणत्वसम्भवेपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनियमात्तादृशहेतुसमानाधिकरणत्वेनाभावविशेषणे केवलव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व रूपेणैव साजात्यविवक्षणं सम्भवतीति तन्निवेशनमेवोचितमिति चेन्न; तथा सति तादृशयावत्साध्याभावसजातीयवत्त्वस्यैव लक्षणत्वं सम्भवति, व्यभिचारिणिसमानाधिकरणधर्मावच्छिन्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटकयावदभावसजातीयाप्रसिद्धयैव अतिव्याप्ति विरहात् सद्धेतौ तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावमादायैव लक्षणसमन्वयसम्भवादिति साध्याभाववद्वृत्तित्वाभावत्वविशेषणवैयर्थ्यापत्तेः । **हेतुतावच्छेदकसम्बन्धेने** ति । समवायादिसम्बन्धेनेत्यर्थः । **साध्याभाववद्वृत्तित्वस्य** — समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य । **न क्षति** रिति । तादृशसाध्या

[दी] यद्वा यावन्त स्तादृशा स्साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य

भावस्य समवायादिसम्बन्धानुयोग्यवृत्तितयाव्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् तद्वति च तादृशसम्बन्धेनापि वृत्तेः प्रसिद्धेरिति भावः। अत्र च द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादावव्याप्तिः विशेष्यविशेषणसम्बन्धस्य परम्परया हेतुत्वमभ्युपेत्य वारणीयेत्यभिप्रेत्य हेतुतावच्छेदकसम्बन्धेन किंचिद्यक्तयधिकरणवृत्तित्वमभावे विवक्षितम्; यदि च सत्तादेरेव विशिष्टसत्तात्वादिना व्याप्यत्वं हेतुतावच्छेदकविशिष्टनिरूपित हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभावसजातीय तत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावं वा निवेश्य निवार्यते? तदा जातिमान् सत्त्वादित्यादौ उपदर्शिताप्रसिद्धिनिबन्धनाव्याप्तेरुक्तविवक्षामन्तरेणैव निवारणं सम्भवतीत्यवधेयम् ।

मिश्रास्तु— साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेः "जातिमान् सत्त्वात्" "द्रव्यं विशिष्टसत्त्वा" दित्यादौ अव्याप्तिमालोच्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपामेव व्याप्तिं साजात्यादिघटनया परिष्कृतवन्तः; तत्परिष्कृते च यथाश्रुते वक्ष्यमाणदोषमुद्धर्तुं मभावप्रतियोगित्व स्थले स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगितावच्छेदकत्वरूपपारिभाषिक तत्प्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेशयन् तादृश लक्षणमाह— **यद्वे** ति । **तादृशाः**— व्याप्यवृत्तयः, **साध्याभावाः**— साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः, **प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्याभावस्य**— एकैक

[दी]प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्व मवच्छिद्यते तद्रूपवत्त्वं तत्त्वम्.

तदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृत्तेरभावस्य, **प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते**– प्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकम्, **तद्रूपवत्त्वं तत्त्वम्** – तेन रूपेण व्याप्यत्वम्, वह्निमान् धूमादित्यादौ वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नधूमाभावः, वह्नित्वाद्यवच्छिन्नघटाभावसजातीयस्तद्व्यापकीभूतः धूमत्वाद्यवच्छिन्नघटाद्यभावः, तत्प्रतियोगितावच्छेदकं धूमत्वादिकं धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकमिति लक्षणसमन्वयः । व्यभिचारिणि धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नघटाद्यभावतादृशवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयतत्तदभावव्यापकवह्नित्वाद्यवच्छिन्नघटाद्यभाववह्नित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकवह्नित्वादेः वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेपि तादृशयावत्साध्याभावान्तर्गतधूमत्वाद्यवच्छिन्नधूमाभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः । प्रथमाभावे व्याप्यवृत्तित्वविशेषणात् कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावस्य केवलान्वयिनः सजातीयस्य व्यापकीभूतव्याप्यवृत्त्यभावस्याप्रसिद्धावपि न क्षतिः । व्याप्यवृत्तित्वविशिष्ट तदभावप्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकत्वात् । साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया विवक्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तितामते संयोगेन तत्साध्यके तादृशसम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकता घटकाभावे प्रतियोगिवैयधिकरण्यस्याप्रयनिवेशनीयतया साध्यवन्निष्ठ

प्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वमक्षतमिति ध्येयम् ।

नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरणकैक व्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूताभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्तनाय साध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशनम् । व्यापकता च साध्यतावच्छेदकसम्बन्धघटिता, तेन समवायेन द्रव्यत्वादिसाध्यकगुणादि हेतौ विषयतया साध्यव्यापकज्ञानादेः साध्यतावच्छेदकसम्बन्धावच्छिन्ना भावं प्रति हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्याव्यापकत्वेपि न क्षतिः । साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन संयोगादिना वह्न्यादिसाध्यकधूमादिहेतौ समवायादिसम्बन्धावच्छिन्नवह्न्यभावं प्रति संयोगादिना धूमादेरभावस्याव्यापकत्वेपि न क्षतिः । व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावव्यापकत्वव्यधिकरणहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणाय - सजातीयत्वोपादानम् । व्यतिरेकिसाध्यकस्थले यावत्साध्याभाव सजातीयाप्रसिद्ध्या एकैकतत्सजातीयत्वनिवेशनम् । साजात्यघटकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतनिरुक्तभेदकूटरूपमेव ग्राह्यम्; अन्यथा यत्र भिन्नाभिन्नसम्बन्धेन साध्यहेतुभावः, तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगिता निरूपकत्वं तस्यैव तद्वत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपित हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः सजातीयस्यापि साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्सम्बन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासम्भवेपि व्यापकी

भूतस्ये त्यादेः वैयर्थ्यस्य दुर्वारत्वात्; तत्त्यागे च चरमलक्षण एव पर्यवसानात्। व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकावच्छिन्नहेत्वाद्यभावमादायातिप्रसङ्गस्य वारणाय व्यापकीभूतस्ये ति। व्यभिचारिणोऽभावस्य व्यभिचारनिरूपकाधिकरणे साध्याभावाव्यापकत्वान्न दोषः, व्यापकत्वं च न तत्समानाधिकरणाभावा प्रतियोगित्वम्, सर्वस्यैव तादृशद्वित्वावच्छिन्नाभावप्रतियोगितया ऽसम्भवात्। नच- तदधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन अवश्यं वाच्यम्, तथाच वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यनात्मकद्वित्वावच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसम्बन्धेनावृत्त्या न तमादाय दोषावसर इति वाच्यम्, एवमपि यत्र स्वरूपसम्बन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकतानुपपत्तेः दुर्वारत्वात्; नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वम्, अभावत्वाद्यात्मक तादृशरूपमादायाभावमात्रस्यैव व्यापकतया व्यापकत्वस्याव्यावर्तकतापत्तेः। एवं वह्न्याद्यभाववति धूमावयवादौ समवायादिना वर्तमानधूमादिरूपमभावमादाय तदभावव्यापकताभङ्गभिया हेतुतावच्छेदकसम्बन्धेन सामानाधिकरण्यस्य निवेशनीयतया सत्तावान् जातेरित्यादौ सत्त्वाद्यभाववति सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिध्या अव्याप्तिश्चेति तद्व्यक्तिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव साध्याभावव्यापकत्वम्; निर्धूमो वह्निशून्यत्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं धूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेपि अखण्डस्य निर्धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य तादृग्व्यापकतासम्भवात् तत्प्रतियोगितावच्छेदकावच्छिन्नस्य हेतुव्यापकतयैव लक्षणसमन्वयः। तद्वन्निष्ठत्वं दैशिकविशेषणतया ग्राह्यम्, अतो वह्न्याद्यभाववति धूमाद्यभाववद्भेदस्य कालिकादिसम्बन्धेन वृत्तावपि न क्षतिः; अभावाभावस्य प्रतियोगिरूपत्वेऽप्यभाववद्भेदो

ऽतिरिक्त एव, अतो धूमाद्यभाववति अयोगोळकादौ दैशिकविशेषण तया वह्न्याद्यभाववद्भेदस्य वृत्तिरव्याहतैवेति न वह्न्याद्यभावस्य धूमा द्यभावव्यापकतापत्तिः । अथवा यदीयदैशिकविशेषणतासम्बन्धसामान्ये तत्तत्साध्याभाववद्यत्किंञ्चिद्व्यक्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव तदभावव्याप कत्वम्। अभावस्येति। भावभिन्नस्येत्यर्थकम्, तेन धूमवान् जलत्वाभावा दित्यादौ जलत्वादिनिरूपितदैशिकविशेषणताया अप्रसिद्ध्या तत्र निरुक्त भेदकूटात्मकव्यापकतासत्त्वेपि नातिव्याप्तिः, अभावरूपसद्धेतौ हेतुमत्त्व प्रकारकप्रमाविषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षणसमन्वयः. धूमवान् वह्नेरित्यादौ अयोगोळकादावप्युत्पत्तिकालावच्छे देन वर्तमानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिः, अतो व्याप्यवृत्तेरिति ।

यद्यपि तादृशाभावा अपि ह्रदादौ व्याप्यवृत्तयः, तथापि व्याप्य वृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीयम्, अनवच्छिन्नविशेषणता सम्बन्धेन व्यापकतानिवेशलाभायैव तदुक्तम्, अवच्छिन्नवृत्तिकान्यत्व रूपं व्याप्यवृत्तित्वं तु न शक्यते निवेशयितुम्, संयोगेन सद्धेतौ हेतु तावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्यातथात्वात् । तत्प्रतियोगितेत्यत्र प्रतियोगिता हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अन्यथा व्यधि-करणसम्बन्धावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य सम नियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावरूपतया समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वेन तमादायातिव्याप्ति र्गिरहेपि आत्मत्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्याप कसमवायसम्बन्धावच्छिन्नज्ञानाद्यभवमादायातिव्याप्तेः ; अभावे हेतु तावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविशेषणं प्रवेश्य च नातिप्रसङ्ग वारणसम्भवः. समनियताभावैक्ये समवायसम्बन्धावच्छिन्नज्ञानाद्यभाव

[दी] साधनस्य तादृशव्यापकाभावप्रतियोगित्वं तदवच्छेदकत्वं वा, साधनतावच्छेदकस्येतितु न वाच्यम्. द्रव्यं सत्त्वादित्यादौ सत्त्वादेःतादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रति

स्यापि स्वसमवायिविषयकत्वसम्बन्धेन ज्ञानादिविशिष्टज्ञानादे र्विषयिता सम्बन्धावच्छिन्नाभावसमनियतत्वेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताक त्वात्। धूमाद्यभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नित्वादिना वह्नित्वाद्यवच्छिन्नव्यापकत्वादतिप्रसङ्ग इति प्रतियोगिनो व्यापकतामुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्यन्तानुधावनम्। द्रव्यं विशिष्ट सत्त्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादे र्हेतुतावच्छेदकोपलक्षितहेतुव्यापकत्वासम्भवात् "यं प्रती" त्यनुक्त्वा **यद्रूपावच्छिन्नम्प्रती** त्युक्तम्. व्यापकता च हेतुतावच्छेदकसम्बन्धेन ग्राह्या, अतो महाकालभिन्नः कालत्वादित्यादौ साध्याभावव्यापकाभाव प्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसम्बन्धेन हेतु व्यापकतायामवच्छेदकत्वेपि नातिप्रसङ्गः, व्यापकतावच्छेदकताघटक सम्बन्धभेदानिवेशनादिकं स्वयमूह्यम ।

नच धूमवान् वह्निमत्त्वप्रकारकप्रमाविषयत्वादावतिव्याप्तिः. धूमाद्य भावव्यापकधूमाद्यभावस्य प्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमा भावाभावत्वादे र्हेतुतावच्छेदक स्वरूपसम्बन्धघटितहेतुव्यापकतावच्छेद कत्वादिति वाच्यम्; भाववृत्तिप्रतियोगितावच्छेदकस्य व्यापकतावच्छे दकताया विवक्षणीयत्वात् ।

यथाश्रुतमिश्रलक्षणमुपन्यस्य दूषयति– **साधनस्येति। तादृशेति।** येन्ये साध्याभावाः प्रसिद्धाः तत्तत्सजातीयतत्तद्व्यापकेत्यर्थः । **तदवच्छे दकत्वम्**— तादृशप्रतियोगितावच्छेदकत्वम्। **आद्ये**- द्रव्यं सत्त्वादाविति ।

[दी] योगिताकाभावप्रतियोगित्वादतिव्याप्तेः, ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादे स्तादृशप्रतियोगितानवच्छेदकत्वात् अव्याप्तेश्च; प्रमेयत्वव्यधिकरणप्रतियोगित्वाप्रसिद्धेः ।

द्वितीये – ज्ञेयं प्रमेयादित्यादाविति । ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेपि वाच्यत्वत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमक्षतमेवेत्याशङ्क्यां निरस्यति– प्रमेयत्वव्यधिकरणे ति । प्रमेयत्वस्य केवलान्वयित्वादिति भावः. धूमाद्यभावं प्रति विषयितादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य यो ऽभाव स्तस्य व्यापकत्वात् तमादाय समवायेनात्मत्वे साध्ये समवायेन द्रव्यत्वे हेतौ आत्मत्वाभावं प्रति विषयितासम्बन्धेन द्रव्यत्वत्ववज्ज्ञानस्य य स्समवायसम्बन्धावच्छिन्नप्रतियोगिताको ऽभाव स्तस्य व्यापकत्वा त्तमादायातिप्रसङ्गस्य वारणाय च प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयतया व्यधिकरणसमवायादिसम्बन्धेन प्रमेयत्वस्य अभावप्रतियोगितायामसमानाधिकरणतया ऽवच्छेदकत्वसम्भवेपि न निस्तार इत्यवधेयम् । अन्योन्याभाव एव व्यधिकरणधर्मावच्छिन्नावच्छेदकताको नत्वत्यन्ताभाव इत्याशयेनेदम् ; अन्यथा घटत्वावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावमादाय लक्षणगमनसम्भवात् । एतदुपलक्षणम् ; गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नहेतुकाव्याप्तिरपि द्रष्टव्या । एतेन व्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकानवच्छिन्नत्वव्यधिकरणधर्मानवच्छिन्नत्वोभयाभावविवक्षणे प्रमेयहेतुकस्थले वाच्यत्वत्वादिना घटाद्यभावप्रतियोगितायां तादृशोभयाभावसत्त्वेन लक्षणसमन्वयेपि न निस्तारः. उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्या अप्रतीकारात् ।

[दी] यद्वा यावन्तस्तादृशा स्साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूप-

---

उक्तलक्षणे सजातीयादिपदपरित्यागेन लघुलक्षणमाह — **यद्वे** ति। व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादायातिव्याप्ते र्वारणाय **यावन्त** इति । वह्निमान् धूमादित्यादौ महानसीयवह्नित्वाद्यवच्छिन्नाभाव प्रतियोगितावच्छेदकस्य धूमत्वाद्यवच्छिन्नव्यापकतानवच्छेदकतया अव्याप्तिरिति **तादृशा** इति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः । अत्र व्याप्यवृत्तित्वविशेषणं प्रयोजनाभावादनुपादेयम् । साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्याप्यभावान्तरस्य प्रक्रान्तत्वा त्तादृशपदे तत्परत्वभ्रमस्य झडिति निरासाय **अभावा** इत्येतन्मात्रमनभिधाय **साध्याभावा** इत्युक्तम् । यावत्साध्याभावनिरूपिता **न** काचिदपि प्रतियोगितेति **प्रत्येक** पदम् । अत्र च व्यभिचारिणं प्रत्यपि यत्किंचित्सम्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतयाऽतिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकसम्बन्धेनैव व्यापकता निवेशनीया; इत्थंच समवायसम्बन्धावच्छिन्नवह्न्यभावप्रतियोगिता वच्छेदकसमवायादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वादसम्भव इति प्रतियोगितावच्छेदकसम्बन्धेनैव साध्यव्यापकता विवक्षणीया; तथाच केवलान्वयिसाध्यकस्थले व्यधिकरणसम्बन्धावच्छिन्नसाध्याभाव मादाय निर्वाहो न भवतीति व्यधिकरणधर्मावच्छिन्नाभावस्योपयोगिता बोध्या; धूमवान् वह्नेरित्यादौ धूमाद्यभावप्रतियोगितावच्छेदकजलादि वृत्तित्वविशिष्टधूमाद्यभावाभावत्वेन वह्न्यादिव्यापकत्वेपि नातिव्याप्तिः ; साध्यतावच्छेदकावच्छिन्ननिरूपितस्वावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं तदवच्छेदकरूपेण तद-

[दी] वत्त्वं तत्त्वमित्याहुः । परे तु वृत्तिमद्वृत्तयो यावन्तस्साध्याभाव-

---

वच्छेदकसम्बन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमित्येतादृशार्थस्यैव विवक्षणीयत्वा त्साध्यव्यापकतावच्छेदकं यद्यद्रूपं तेन व्यापकत्वविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावोपयोगिता न घटत इति साध्यव्यापकता वच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेन व्यापकत्वावच्छेदकनिवेशः । यथासन्निवेशे न वैयर्थ्यम् . प्रतियोगितायाः स्वरूपसम्बन्धरूपत्वे वह्नित्वाद्यवच्छिन्नप्रतियोगितायां वह्न्यादिव्यक्तिभेदेन भिन्नायां धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वं न सम्भवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां व्यापकतावच्छेदकत्वं न निवेशितम् ॥

इति मिश्रलक्षणम् ।

॥ अथ कूटाघटितलक्षणम् ॥

कूटघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताको न निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावः, अपि तु जगद्वृत्तित्वसामन्याभाव एव, सच व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरित्यतिव्याप्तिवारणाय कूटपदमुपात्तम् . तादृशातिव्याप्तिः समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्याप्यतावच्छेदककोटौ प्रवेशन एव प्रसज्यते, न तु विशिष्य साध्याभाव निवेशे, तथा सति निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्यापि लक्षणघटकता निर्वाहादिति कूटपदमनुपादाय विशिष्य साध्याभावं निवेश्यैव लक्षणमुचितम्, तदुपादाने बहूनां दोषाणां वक्ष्यमाणत्वादिति कूटघटित लक्षणवादिनमाक्षेप्तुं कूटाघटितं लक्षणं दर्शयति– **परेत्वि**त्यादिना । साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय व्यभिचारिमात्रे अतिव्याप्तिः, अतो **यावन्त** इति । तथा सति समानाधिकरण

[दी] वद्वृत्तित्वाभावाः तद्वत्त्वं व्याप्तिः. येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन वृत्तिमत्त्वं बोध्यम् , तेन व्यधिकरणधर्मावच्छिन्नाभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्तमानस्य

धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावस्य यावत्तादृशाभावान्तर्गतस्य व्यभिचारिण्यसत्त्वान्नातिव्याप्तिः । वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्य असंयुक्ताकाशादौ प्रसिद्धस्य हेतावसत्त्वात्संयोगादिसम्बन्धेन हेतावव्याप्तिः; यादृशसम्बन्धप्रतियोगित्वं वस्तुमात्र एव, तादात्म्यविषयतादिरूपतादृशसम्बन्धेन हेतावेव परं लक्षणसमन्वयो भवति, नादृशसम्बन्धेन जगत्संबद्धत्वस्य समानाधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्धेरिति तदुपादानम् ।

ननु वृत्तिमद्वृत्तित्वोपादानेपि जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्य जात्यादिरूपवृत्तिमति वर्तमानस्य वारणासम्भवात् वह्निमान् धूमादित्यादौ अव्याप्तिर्दुर्वारैव, निर्धूमसंयुक्तत्वाद्यभावस्य निर्धूमवृत्तित्वत्वाव्यापकप्रतियोगिताकतया वृत्तिमन्मात्रस्यैव निर्धूमकालादिवृत्तित्वेन च निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया संयोगादिना यत्र हेतुत्वं तत्र जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वाद्वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसम्बन्धेन गगनादेरवृत्तित्वमते तेन सम्बन्धेन यत्र हेतुता तत्रैव पर्यव्याप्तिवारकता, तेन सम्बन्धेन जगद्वृत्तित्वाभावस्य अवृत्तिमात्रे प्रसिद्धत्वादित्यत आह – **येन सम्बन्धेने** ति ।

[दी] धूमादावसत्त्वेपि न क्षतिः . साध्याभावश्च पूर्ववद्बोध्यः

न क्षति रिति । नाव्याप्तिरित्यर्थः । न तु नासम्भव इति, तादात्म्यकालिकादि सम्बन्धेन हेतौ लक्षणसमन्वयसम्भवादिति ।

ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्तयभाववद्वृत्तित्वाभावस्य हेतावसत्त्वादव्याप्तिः, कूटघटितलक्षण इवात्रापि साध्यतावच्छेदक समनियतप्रतियोगिताकाभावनिवेशेपि ताणार्तार्णदहनोभयत्वावच्छिन्नाभाव मादाय वह्न्यादिसाध्यके गुणादिवृत्तित्वविशिष्टसत्ताद्यभावमादाय च सत्तादिसाध्यके अव्याप्तिर्दुर्वारैव , एवमव्याप्यवृत्तिकपिसंयोगादिसाध्यके हेत्वधिकरणस्येव जगत एव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्तया तद्वद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेपि तादृशकपिसंयोगाभावादिसाध्यकद्रव्यत्वादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावासत्त्वादव्याप्तिरित्यत आह — **साध्याभावश्चे** ति । पूर्ववदि ति । मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिरभावो निवेश्यते, तथात्रापि निवेशनीय इत्यर्थः । तत्तद्व्यक्तित्वकथितोभयत्वावच्छिन्नप्रतियोगिताकाभावानां प्रथमविशेषणेन कपिसंयोगादिरूपाभावानां च द्वितीयविशेषणेन व्यावृत्तिः । ननु साध्याभाववद्वृत्तित्वप्रतियोगिकाभावमात्रनिवेशे प्रकृतहेतुसाधारणस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधिकरणधर्मावच्छिन्नाभावोपि वृत्तिमद्वृत्तिस्सम्भवतीति यावत्तादृशाभावान्तर्गततद्वत्त्वस्य हेतावभावादसम्भवः ; एवं समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदककीभूतकिंचिद्धर्मावच्छिन्नस्याभावोपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्व विरहादपि व्यतिरेकिसाध्यकहेतूनां अव्यभिचारित्वानुपपत्तिः ; तत्तत्साध्या-

[दी] तद्वद्वृत्तित्वाभावोपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः

भाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावश्च विवक्षितुमशक्यः, केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्याऽतथात्वमते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य स्वघटकैकैवलवृत्तित्वत्वसमनियतताया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेर्दुर्वारत्वात्; तत्तदभाववद्वृत्तित्वत्वघटकधर्मावच्छिन्नाभावनिवेशे च वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावव्यक्ते स्तत्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्त्वादव्याप्तिः; साध्याभाववद्वृत्तित्ववृत्तितादृशधर्मावच्छिन्नाभावनिवेशेपि घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यके तादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववान् योघटत्वाभावादिः तद्वृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूपतथाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेः हेतावसत्त्वादव्याप्तिर्दुर्वारैव; साध्याभावादिव्यावृत्तघटकतानिवेशे च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षयति—तद्वदिति। स्वं प्रतियोगिता, अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितायां व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिताकस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितया अतिव्याप्तिरिति तत्तद्व्यक्तित्वेनाभावस्य व्याप्यतावच्छेदककोटिनिवेशनलाभाय तत्तदिति।

यद्यपि यत्किंचित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणम्, यावन्तस्साध्याभावाः

प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतैकप्रतियोगितायाः नानाविपक्षके अप्रसिद्धिः, तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्वव्याप्यैकप्रतियोगित्वाप्रसिद्धेः; तथापि यावतामभावानां प्रत्येकाधिकरणवृत्तित्वत्वसमनियत्यस्य प्रत्येकं प्रतियोगितान्वयेन एतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको यो ऽभाव स्तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च योऽभावः तद्वत्त्वमित्येवं रीत्या निवेशान्नानुपपत्तिः । एतल्लक्षणे साध्याभावसमुदायो न समुदायत्वेन प्रविष्टः, अपि तु प्रातिस्विकरूपेणेति कूटघटिताद्विशेषः ।

अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगितापरम्, साध्याभाववद्वृत्तित्वातिरिक्तेपि तदभावीयप्रतियोगितान्तरसत्त्वादिति तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यम्, तथाच यत्किंचित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतया यावत्यस्तादृश्यः प्रतियोगिताः प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयम्; तथाच समानाधिकरणधर्मावच्छिन्नजगद्वृत्तिसामान्याभावप्रतियोगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्या अव्याप्तिरिति वृत्तिमद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया; तथाच तन्निरूपकाभावे वृत्तिमद्वृत्तित्वविशेषणं व्यर्थम्; यावत्त्वविशेषणमपि तथेति चेत्? नोपादीयत एव तत्र तद्विशेषणम्, वृत्तिमद्वृत्त्यभावीययावत्प्रतियोगितानिवेशलाभायैव प्रतियोगितावि[शे]ष्यीभूताभावे वृत्तिमद्वृत्तित्वयावत्त्वाभिधानात् । [अत्र च गुरुधर्मस्य अभाव प्रतियोगितानवच्छेदकत्वे स्वव्यापकतदभाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्याव्यावर्तकव्यापकतान्तर्घटितत्वेन अभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरूपव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेश स्तस्मवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुर-

[दी] तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेनं

स्कारेणैव तन्निवेशः; नच स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्वतदभाववद्वृत्तित्वत्ववन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसम्भवात् अवच्छेदकभेदकूटनिवेशन मफलमिति वाच्यम्; घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादि घटितस्य तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितघटवृत्तित्वनिष्ठान्योन्याभाव प्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासम्भवात् । अत्र कल्पे व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावस्य पर्वताद्यवृत्तिवृत्तिमद्वृत्तेर्धूमादावभावादेकमात्रवृत्तिहेतावपि तादृशप्रतियोगिताकस्य एतत्क्षणावच्छिन्नवृत्तित्वैतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वाद्यवच्छिन्नाभावस्यएतत्क्षणावृत्तौवृत्तिमतिवर्तमानस्याभावादसम्भवः; तादृशाभावव्यावर्तनायव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशेगौरवम्, पर्वतवृत्तित्वत्वादिना जगद्वृत्तित्वसामान्याभावस्य व्यावृत्त्यसम्भवश्चेत्यत कल्पान्तरमनुसरति - **तत्तत्साध्याभावेति**। अतिरिक्तान्तानिवेशे व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य संग्रहाद्व्यभिचारिमात्रे अतिव्याप्तिरितितन्निवेशितम्। यद्यपि यथाश्रुतेनानेन महानसवृत्तित्वत्वादिना व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाववारणं न सम्भवति, महानसादिनिरूपितत्वविशिष्टवृत्तित्वत्वस्य साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वान्यत्वविरहात्; तथापि साध्याभाववद्वृत्तित्वत्ववानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वशून्यत्वस्यानवच्छिन्नान्तेन विवक्षणान्न दोषः; महानसवृत्तित्वत्वादिनिरूपितावच्छेद्यत्वस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानिरूपित-

त्वात् । नचैवमपि साध्याभाववन्महानसवृत्तित्वत्वावच्छिन्नाभाववारणमशक्यम्, तादृशधर्मनिरूपितावच्छेदतायां तद्घटकसाध्याभाववद्वृत्तित्वत्व निरूपितत्वस्य "अधिकंतिवि" त्यादिन्यायेन अन्याहतत्वादिति वाच्यम्, गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया महानसवृत्तित्वत्वसमनियतोप दर्शितगुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वात् ।

अथ गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नन्यापकतावच्छेदकरूपावच्छिन्नाभावपरतया धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमत्वाद्यवच्छिन्नन्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य समनियतधूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वापेक्षया गुरुत्वेन अभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः, धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च धूमत्वाद्यवच्छिन्नन्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणानाक्रान्तत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् । यदि च साध्यतावच्छेदकावच्छिन्नन्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः, अपि तु तत्तदभावत्वेनैव, एतदेव सूचयितुं तत्तत्पदमुपात्तम् ; एवञ्च तत्तद्व्यक्तित्वेन धूमाभावघटिततदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यके अतिव्याप्तिरित्युच्यते ?, तदापि घटभिन्नं मेयत्वादित्यादावतिव्याप्तिः, तत्र तद्व्यक्तित्वेन रूपेण घटभेदाभावघटिततत्तद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघोस्तत्समनियतस्य किंचिद्विशेषणानवच्छिन्नघटत्वघटितघटवृत्तित्वत्वस्यैव अभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः, घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाः

साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वासम्भवाद्व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यैव तथात्वात् ; यदि च अभावधर्मो विशेषणविधया न निवेश्यते , अपि तु अभावप्रभृतिरेव, अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणविधया निवेश्यते , एतल्लाभायैव तत्तत्पदोपादानमपि; न तु तत्तद्व्यक्तित्वेनाभावनिवेशलाभार्थम् , उपलक्षणीभूतप्रतियोगिताविशेषणेनैवाभावान्तरव्यावृत्तिसम्भवे तत्तद्व्यक्तित्वस्योपलक्षणतया निवेशे प्रयोजनविरहात् ; एवञ्च घटवृत्तित्वत्वावच्छिन्नाभावो प्युक्तस्थले लक्षणघटकः, घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् . प्रतियोगितविशेषोपलक्षिताभाववद्वृत्तित्वत्वपर्याप्तनिरूपकताकान्यत्वपर्यन्तानिवेशा द्धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे अभावविशेषणस्य अधिकस्य निवेशेपि न क्षतिः । नचाभावप्रतियोगिकोटौ उपलक्षणतया भानस्य अनुभवविरुद्धत्वात् विशिष्टनिरूपितत्वाभावरूपस्य निरूपितत्वसम्बन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टानिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगितविशेषस्य कथमुपलक्षणविधया निवेश इति वाच्यम् ; प्रतियोगितासंसर्गकज्ञान एव तादृशभानस्य तथात्वात्, जात्यवच्छिन्नप्रतियोगिताकोऽभाव इत्याद्याकारस्य स्वरूपतो घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावभानस्य सर्वसम्मतत्वात् , प्रकृते च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रातियोगिताको यो ऽभावः तद्वद्वृत्तित्वत्वनिरूपितत्वप्रतियोगिकाभाववतः समानाधिकरणधर्मावच्छेद्यत्वस्य यो ऽभावः तद्वत्प्रतियोगिताका यावन्तो ऽभावा स्तद्वान् हेतुरित्याकारकव्याप्तिग्रहे प्रतियोगिताया विशेषणत्वेन अनुपपत्त्यभावात् ; अत एव व्यापकतावच्छेदकत्वादेरप्युपलक्षणविधया भानोपपत्तिः । नच

तादृशनिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिताकस्य वा ऽभावस्य निवेशे निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितानिष्ठावच्छेद्यतायामपि किंचिद्विशिष्टतादृशनिरूपितत्वत्वावच्छिन्नाभावसत्त्वात्तादृशाभावासङ्ग्रह इति वाच्यम्; तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्यैव निवेशनीयत्वात्; *(एवञ्च तत्तद्व्यक्तित्वेन अभावनिवेशश्चाव्येण तत्तत्पदोपादानमपि साधु सङ्गच्छते– इत्युच्यते?,) तदापि घटत्वभेदादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणमशक्यम्, निर्विशेषणकघटत्वादिवृत्तित्वत्वस्यैव तत्र घटत्वादिवृत्तित्वाभावं प्रति प्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशरीरे अनिवेशेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्। नच जातेः समवायेनैव स्वरूपतो ऽवच्छेदकत्वम्, न तु सम्बन्धान्तरेण; अत एव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेषप्रवृत्तिनिमित्तत्वगवेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्वन्ति, न तु तादात्म्यसम्बन्धेन लघोरपि गोत्वादिजातेरिति निर्विशेषणघटत्वादिघटितस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवतीति वाच्यम्, तादृशनियमे मानाभावात्; यदिचाभावांशस्यापि उपलक्षणत्वं स्वीक्रियते? तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यमेव; यदि च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वाद्यवच्छेद्यताभिन्नसमानाधिकरणधर्मावच्छेद्यत्वाभावं निवेश्या विशेषितघटत्वादिवृत्तित्वाभावः संगृह्यते?, तदा तादृशाभावमादाय जाति साधारणसङ्केतावव्याप्तिर्वज्रलेपायते। एवं साध्याभाववद्वृत्तितात्वशरीरे अभावादे र्विशेषणतया प्रवेशे वृत्तिमद्वृत्तिपदमनर्थकमापद्यते, व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभाव स्तत्प्रतियोगितायाः लाघवेन वृत्तित्वत्वेनावच्छिन्नतया तदवच्छेद्यताया अभावघटितविशिष्टपदार्थानिरूपितत्वात्।

* कुण्डलितग्रन्थो ऽनावश्यक इव।

अत्र वदन्ति; – गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितम्, व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदकत्वानिरूपकत्वमेव प्रतियोगितायां विशेषणं देयम, नचैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहफलकं समानाधिकरणपदोपादानं निषेधद्वयनिवेशनं च विफलम्, तादृशाभावस्यासंग्रहेपि केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम्, विषयितादिसम्बन्धेन यत्र हेतुता तत्र हेतुतावच्छेदकसम्बन्धेन साध्याभाववति वृत्ते स्साध्याभाववद्विषयतादिरूपाया विषयादिस्वरूपत्वेन साध्याभाववद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेः तादृशाभावघटित लक्षणानुपपत्तेः; नच साध्याभाववद्विषयतात्वादिकं येन सम्बन्धेन अवृत्ति तेन सम्बन्धेन तदवच्छिन्नाभावमादाय लक्षणसमन्वय स्सम्भवतीति वाच्यम्; कालिकसम्बन्धेन साध्याभाववद्वृत्तित्वत्वावच्छिन्नस्य योऽभाव स्तस्य ध्वंसाद्यधिकरण *हेत्वव्यापकतया स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य अवश्यं निवेशनीयतया व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य लक्षणघटकत्वासम्भवात्; विषयतायां जात्यादिरूपत्वेपि विषयतात्वविशिष्टस्य न समवायादिना वृत्तिः, तादृशस्य स्वस्मिन्नेव वृत्तेः, जात्यादौ च समवायाभावात्; किन्तु स्वरूपसम्बन्धेनैव, एवंच समवायादिसम्बन्धावच्छिन्नप्रतियोगिताक एव विषयतात्वाद्यवच्छिन्नाभावो लक्षणघटको भविष्यतीत्यपि न; कालज्ञानादिरूपहेतौ कालिकविषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्याऽसत्त्वेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैव निवेशनीयत्वात्. नचैवं साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधि

* "हेतुव्यावर्तकतया" इत्यपि पाठः।

करणधर्मानवच्छिन्नाभावस्यापि तत्राप्रसिद्धिः, घटत्वादेः साध्याभाववद्विषय तादिनिष्ठप्रतियोगितावैयधिकरण्यासम्भवादिति वाच्यम्; घटत्वादिना पटाद्य भावस्यैव तथात्वात्। अथैवमपि सामानाधिकरण्यमुपेक्ष्य साध्याभाववद्वृत्तित्व निष्ठत्वेनधर्मविशेषणकल्पेघटत्वादेर्घटादिस्वरूपसाध्याभाववद्विषयतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया साध्या भाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभावाप्रसिद्धया उक्तस्थले अव्याप्तिर्दुर्वारैव, येन रूपेण यत् साध्याभाववद्वृत्तित्ववृत्ति तद्रूपाविशिष्ट तदनवच्छिन्नप्रतियोगिताकाभाववविवक्षणेन गगनत्वविशिष्टगगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्वाहोपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्या भाववद्वृत्तित्वव्यक्तेः किंचिदविशेषिततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिता काभावस्य तथाविधस्य हेतावसत्त्वादसम्भवप्रसङ्ग इति चेन्न; येन सम्ब न्धेन यद्वर्तते तेन सम्बन्धेन तन्निष्ठावच्छेदकताकान्यत्वस्य तदनव च्छिन्नत्वस्य विवक्षणीयतया संयोगादिसम्बन्धावाच्छिन्नघटत्वादिनिष्ठाव-च्छेदकताकाभावमादायोक्तस्थले लक्षणसमन्वयसम्भवात्; उक्तार्थलाभा यैव साध्याभाववद्वृत्तित्वोपादानम्, न तु तदपि लक्षणघटकम्, तवृ प्रयोजनाभावात्; सर्वत्र दर्शिताभावमादायैव लक्षणसमन्वयसम्भवेन समवायादिसम्बन्धेन घटत्वाद्यवच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्य लक्षणाघटकत्वेपि क्षतिविरहात्। एतेन धूमत्वत्वाद्यवच्छिन्नधूमत्वाद्य-भावस्य धूमत्वप्रकारकप्रमाविषयत्वत्वाद्यवच्छिन्नाभावस्य च साध्याभाव वद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य वारणाय साध्याभाववद्वृ त्तित्वप्रतियोगिकत्वविशेषणमप्यनादेयम्; अत एव स्वसमानाधिकरण-त्वस्य प्रतियोगितावच्छेदकविशेषणत्वकल्पापेक्षया लाघवमेवैतत्कल्पानुस-रणबीजभूतं निष्प्रत्यूहमिति ।

यदि च गुरुधर्मो नाभावप्रतियोगितावच्छेदकः ? तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्व-

स्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव विवक्षणीयम्, तदर्थश्च स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपित विषयिताकत्वम्; स्वाविषयकत्वंच इतरविशेषणतानापन्नस्वविषयताशून्य त्वम्; अतो विशेषणविधया साध्याभाववद्वृत्तित्वत्वघटकसाध्याभावत्वा देरपि तदघटकत्वनिर्वाह इति पूर्वोक्तदोषानवकाशः। चरमापि विषयिता इतरविशेषणतानापन्ननिरूपितैव ग्राह्या, तेन वृत्तित्वत्वादिविशेष णकज्ञाने साध्याभाववद्वृत्तित्वत्वादेर्विशेषणतया विषयत्वेपि वृत्तित्वत्वादेर्न साध्याभाववद्वृत्तित्वत्वाघटकत्वम्; एवंच शुद्धवृत्तित्वत्वावच्छिन्नाभावोपि लक्षणघटक इति वृत्तिमद्वृत्तिपदसार्थक्यम्। नच साध्याभाववद्वृत्तित्व त्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताको ऽभावो निवेश्यताम्, घटका न्तार्थश्च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपित विषयिताकत्वम्; तेन साध्याभाववद्वृत्तित्वत्वकेवलवृत्तित्वत्वयोरेव घटकतानिर्वाहः, न तु स्वाविषयकप्रतीत्यविषयतादृशविशिष्टकत्वम्, तत्त दभाववद्वृत्तितात्वाविषयकप्रतीतौ केवलाधेयतात्वस्य विषयतया तदभाव वन्निरूपितत्वविशिष्टाधेयतात्वे तदविषयकप्रतीत्यविषयत्वस्य दुर्घटतया तदभाववद्वृत्तित्वत्वादे स्तद्घटकत्वानिर्वाहात् केवलाधेयतात्वस्य च तद्घटकतया वृत्तिमद्वृत्ति तेन रूपेण घटाद्यभावमादायातिव्याप्तया पत्तेरिति वाच्यम्; तथासत्युक्तरीत्या विषयितासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्ध्यापत्तेः, ऽघटत्वभिन्नं प्रमेयत्वादित्यादौ निर्विशेषण घटकत्वादिवृत्तितात्वस्य यथा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृ त्तितात्वघटकत्वं तथा वाच्यं ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयक प्रतीत्यवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाव वद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकतया तदभाववद्वृत्तित्वत्व घटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेन अव्याप्तयापत्तेः

[दी] समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्न प्रतियोगिताको बोध्यः; तेनालोकावृत्तित्वेन रूपेण यो वह्निसामान्या भाववद्वृत्तित्वस्य यश्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूत -

---

न्तदभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्नाभावनिवेशेनैव वारणसम्भवाच्च. तादृशधर्मे निरुक्तसाध्याभाववद्वृत्तित्वघटकत्वसत्त्वेपि स्वाविषयक प्रतीतिवृत्तिसाध्याभाववद्धर्म्यन्तरवृत्तित्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्य यथानिरुक्ताभावात्मकत्वात्। नच स्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपित विषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषण कघटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्तया तद्घटक धर्मावच्छिन्नाभावनिवेशोपि सम्भवतीति वाच्यम्, तथा सति व्यापकता घटितसामान्यपदार्थनिवेशेन तदघटकधर्मानवच्छिन्नाभावनिवेशापेक्षया गौर वात्; समानाधिकरणपदसार्थक्यं तु उक्तरीत्यैवेति ध्येयम्।

केचित्तु – व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन पर्वत वृत्तित्वघटान्यतराद्यभाववारणाय एतन्मतेपि स्वव्यापकतत्तत्साध्याभाव वद्वृत्तित्वत्वकत्वं प्रतियोगितावि शेषणमावश्यकम्, तथाच साध्याभाव वद्वृत्तित्वत्वेन घटाभावस्य लक्षणघटकता न सम्भवतीति निषेधद्वय निवेशनसमानाधिकरणपदोपादानयोः सार्थकतेत्याहुः ।

प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशनप्रयोजन माह – **आलोकाद्यवृत्तित्वेने** ति। वह्निसामान्याभाववद्वृत्तित्वस्य यो ऽभाव स्तस्य धूमादावसत्त्वेपीत्यन्वयः। वह्निसामान्याभावो वह्नित्वाव च्छिन्नवह्न्यभाव : । साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजन माह — **यश्चे** ति। इन्धनत्वाद्यवच्छिन्ने ति। साध्यतावच्छेदकावच्छिन्न

[दी] महानसवृत्तित्वादेरभावः तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्व विरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन् अवृत्तित्वेपि न क्षतिरित्याहुः ।

व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटंत्वाद्यवच्छिन्नवह्न्यभावोपेक्षणम् . **महानसवृत्तित्वादेरभाव** इत्यत्र महानसवृत्तित्वत्वादिनेति बोध्यम् ।

यत्तु तादृशाभावाधिकरणमहानसवृत्तित्वत्वाद्यवच्छिन्नस्येति षष्ठ्यन्तव्याख्यानम् , तदसत् ; गुरुधर्मस्य अभावप्रतियोगितावच्छेदकत्वेपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वाद्यवच्छिन्नाभवमादाय दोषप्रसक्ते स्तद्विशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावपर्यन्तानुसरणे सन्दर्भविरोधात् , अधिकरणान्तस्य उपलक्षणतया शेषांशस्य विशेषणतया भानस्य व्युत्पत्तिविरुद्धतया तथा विवक्षयितुमशक्यत्वात् । अधिकरणविशेषानुपरक्तवृत्तेरभावमादायापि दोषं दर्शयति — **स्वनिष्ठे** ति । धूमादिनिष्ठ साध्याभाववद्वृत्तित्वव्यक्ते स्तव्यक्तित्वावच्छिन्नाभावस्येत्यर्थः । **हेत्वन्तर वृत्तेः** — आलोकादिवृत्तेः । एतेन वृत्तिमद्वृत्तित्वमर्स्तीति सूचितम् । **स्वस्मिन्** — धूमादौ ।

अत्र च लक्षणे सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तावत्समवेतत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेपि द्रव्यावृत्तित्वाद्यवच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकता वच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वाभावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादेः तद्वत्त्वाभावान्नातिव्याप्तिः . एवमवृत्तिसाध्यकस्थलेपि साध्यतावच्छेदकावच्छिन्नव्यापकत्वाप्रसिद्धया नातिव्याप्तिः. कूटघटितलक्षणे च तत्र तत्रातिव्याप्तिवारणाय साध्यसमानाधिकरणत्वे सतीति विशेषणं

[दी] अन्ये तु वृत्तिमद्वृत्तयो यावन्तस्साध्याभावसमुदायाधिकरण वृत्तित्वाभावास्तद्वत्त्वं तत्त्वम्; तादृशवृत्तित्वाभावस्त्वव्यापकतादृश वृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः; प्रयोजनंच

देयम् । एतल्लक्षणेचावृत्तिहेतुके अतिव्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपा देयम् । कूटघटितलक्षणवदत्रापि महाकालान्यो घटादित्यादावतिव्याप्ति र्द्रष्टव्या, किन्तु तदन्यदोषाणामेव अत्र अनवकाश इत्यवधेयम् ॥

इति कूटाघटितलक्षणम् ।

॥ अथ कूटघटितलक्षणम् ॥

अन्ये त्विति । घटत्वादिना निर्धूमवृत्तित्वाभावमादाय व्यभि-चारिण्यतिव्याप्तिवारणाय यावत्त्वोपादानम्; एवंच केवलान्वयिनः साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव अभावस्य प्रसिद्ध्या तत्समुदायाधिकरणजगद्वृत्तित्वस्याऽवृत्तौ प्रसिद्धस्समानाधिकरणधर्मावच्छिन्नाभावोपि यावदभावान्तर्गत इति तद्वत्त्वविरहात्तादृशसाध्यके विषयिताद्यतिरिक्तसम्बन्धेन हेतावव्याप्तिः; साधनसमानाधिकरणत्वेन साध्याभावविशेषणपक्षे च व्यतिरेकिणोपि साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्कूटाधिकरणतया व्यतिरेकिसाध्यकेपि विषयितातिरिक्तसम्बन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वमभावविशेषणम् । **तादृशवृत्तित्वे** ति । साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थः । **प्रयोजनंचे** ति । पूर्वदळप्रयोजनं आलोकाद्यवृत्तित्वेन निर्वह्निवृत्तित्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्ति वारणरूपं पूर्वलक्षणे उक्तमेव; चरमदळप्रयोजनं तु साधनसमानाधिकरणत्वस्य साध्याभावाविशेषणत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादि-

[दी] उक्तप्रायम्; साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यति-व्याप्तिः, अतस्समुदाये ति.

वृत्तित्वाभावमादायाव्याप्तिवारणमेव, न तु वह्निमान् धूमादित्यादौ महानसवृत्तित्वाद्यभावव्यावर्तनम्, तत्र महानसादेर्वह्नित्वाद्यवच्छिन्नवह्न्यभावानधिकरणत्वेन साध्याभावकूटानधिकरणत्वात्। एतस्य प्रागनुक्तत्वात् **उक्तप्राय** मिति। समुदायपदप्रयोजनमाह - **साध्याभावाधिकरणे** ति। **व्यधिकरणधर्मावच्छिन्नाभावस्यैवे** ति। निर्धूमवृत्तित्वत्वाद्यवच्छिन्न निर्धूमवृत्तित्वाभावस्य प्रतियोगिताया व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृत्तित्वावृत्तितया साध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया जगद्वृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताकतया तस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याऽवृत्तावेव प्रसिद्धत्वादिति भावः। **व्यभिचारिण्यतिव्याप्ति** रिति। तादृशस्य जगद्वृत्तित्वाभावस्य सर्वत्र सत्त्वादिति भावः।

अत्र च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वं प्रतियोगिताविशेषणम्, तत्र च शेषदळे समुदायानिवेशेपि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्य लक्षणाघटकत्वेपि नातिव्याप्तिस्सम्भवति, व्यतिरेकिसाध्यके तादृशप्रतियोगिताया एवाप्रसिद्धेः; जगद्वृत्तित्वसामान्याभावप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेपि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपपूर्वदळविरहात् धूमाद्यभावसमुदायाधिकरणवृत्तित्वत्वशून्ये महानसादिवृत्तित्वेपि तादृशप्रतियोगितासत्त्वादिति पूर्वपक्षयित्वा शेषदळे समुदायाप्रवेशे पूर्वदळमेव नोपादेयम्, तदनुपादानेपि वह्निमान् धूमा-

दित्यादावालोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वस्य आलोकादिनिष्ठपर्व तादिवृत्तित्वसाधारणसाध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया तादृशाभाव मादाय दोषाप्रसक्तेः, तदुपादाने व्यतिरेकिसाध्यकमात्र एव उक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिप्रसङ्गाच्च; तथाच धूमवान् वह्ने रित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादाय अतिव्याप्तिरित्याशयेन दीधिति कृतेदमभिहितम्, अतिव्याप्तिवारणाय शेषदळे समुदायप्रवेशने च निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्य आलोकावृत्तित्वावच्छिन्नाभावस्य वह्निमान् धूमादित्यत्र शेषदळाक्रान्ततया पूर्वदळोपादानमावश्यकम्, तत्र च समुदायाप्रवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वत्व व्याप्यप्रतियोगिताकस्यालोकावृत्तिवृत्तित्वत्वावच्छिन्नाभावस्य धूमे असत्त्वा दव्याप्तिरिति तत्रापि तत्प्रवेशनमिति केचित्समादधते ।

परे तु—प्रतियोगित्वव्यापकताविशेष्यतापन्नमेव साध्याभावसमु दायाधिकरणवृत्तित्वत्वं व्यापकत्वविशेषणविधया निवेश्यते, न तु तद्दळ स्योक्तरीत्या द्विधा निवेशः, एवंच पूर्वपक्ष एवायं नावतरति; न च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे प्रतियोगित्वे प्रतियोगित्वव्याप कत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभाव - प्रतियोगितावच्छेदकत्वत्वं नाभावप्रतियोगितावच्छेदकमिति तादृशावच्छे दकत्वत्वावच्छिन्नाभावरूपव्यापकतानिवेशासम्भवात्तद्दळस्य द्विधा निवे- शनमावश्यकमिति वाच्यम्, व्यापकतान्तस्य उपलक्षणविधया साध्या भावसमुदायाधिकरणवृत्तित्वत्वरूपव्याप्यांशे निवेशनसम्भवात्; व्यापकता वच्छेदकावच्छिन्नाभाववानित्यादिज्ञाने व्यापकतावच्छेदकत्वांशस्येव उक्ता वच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभाववुद्धौ व्यापकताया उपलक्षणतया भाने अविरोधात्; वस्तुतस्तु गुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगिताव-

[दी] साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः, तेन समवायेन वह्नेस्साध्यत्वे धूमे संयोगेन च, तथात्वे वह्न्यवयवत्वे पर्वत वह्न्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयाव च्छिन्नवह्न्यभावद्वयानधिकरणत्वेपि नातिव्याप्तिः,

---

च्छेदकत्वत्वमपि नाभावप्रतियोगितावच्छेदकम्, वह्नित्वावच्छिन्नवह्न्य भाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वादिरूपसमनियत - धर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभावेनाधिकेन घटितस्य तस्य गुरुत्वादिति तादृशधर्मावच्छिन्नाभावो निवेशयितुमशक्यः, किन्तु तादृ शान्योन्याभावप्रतियोगितावच्छेदकं यद्यत् तत्तद्भेदकूटमेव निवेशनीयम्, एवंच प्रतियोगिताव्यापकत्वघटितोक्तधर्मस्य प्रतियोगितानवच्छेदकत्व मकिंचित्करमेवेत्याहुः ।

तेने ति । समवायेन वह्नेस्साध्यत्वे पर्वतस्य सम्बन्धद्वयावच्छिन्न वह्न्यभावद्वयानधिकरणत्वेपि धूमे नातिव्याप्तिः, संयोगेन वह्नेस्तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेपि वह्न्यवयवत्वे नातिव्याप्तिः, समवायेन वह्ने स्साध्यत्वे संयोगेन तस्य तथात्वे च पर्वतस्य वह्न्य वयवस्यच तादृशाभावद्वयानधिकरणत्वेपि पर्वतवह्न्यवयवसंयोगे नातिव्याप्ति रिति योजना । सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयम् —संयोगसम्बन्धा वच्छिन्नवह्न्यभावसमवायसम्बन्धावच्छिन्नवह्न्यभावद्वयम् । साध्यतावच्छे दकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशने तादृशाभावद्वयानधिकरणस्य पर्वतादेः साध्याभावकूटानधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्त स्तद्वत्त्वं धूमादावव्याहतमेवेत्यतिव्याप्तिस्स्यादिति भावः । न च साध्य तावच्छेदकसम्बन्धावच्छिन्नाभावानिवेशनेपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे नातिव्याप्तिर्वारयितुं शक्यते, समवायसम्बन्धाव-

च्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव संयुक्तवृत्तित्वात् वह्न्यवयवमात्रसंयुक्तपदार्थाप्रसिद्धेः संयुक्तमात्रस्यैव तादृशाभावकूटाधिकरणगगनसंयुक्तत्वादिति कथमत्र व्यावृत्तिप्रदर्शनम् ?, समवायेन धूमहेतुकस्थलपरता च न युज्यते, समवायेन धूमवतः साध्याभावकूटाधिकरणत्वानिराकरणादिति वाच्यम्, संयुक्तमात्रस्य गगनादिसंयुक्तत्वेपि तादृशस्य संयोगस्य वृत्त्वनियामकतया * संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्य संयोगेन वृत्तिमद्वृत्तेः सुलभतया वृत्तिपदस्य यथाश्रुतपरतामते तादृशव्यावृत्तिज्ञानसङ्गतेः, वृत्त्यनियामकतादात्म्यादिसम्बन्धेन व्याप्तिस्वीकारे वृत्तिपदस्य सम्बद्धार्थकत्वमावश्यकम्, तथाच इदं महाकालान्यो घटादित्येतत्समशीलमित्यभिप्रायेण एतदुपेक्ष्य द्वितीयस्थलानुसरणम् । साधनसामानाधिकरण्यस्य साध्याभावविशेषणत्वपक्षे समवायादिसम्बन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयववत्त्वरूपसाधनसामानाधिकरण्याभावेन न तत्रातिव्याप्तिसम्भवः; एवं सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणमवश्यावश्यकतया संयोगादिना वह्निमत्यवर्तमाने वह्न्यवयवत्वादौ तेनाप्यतिव्याप्तिं वारयितुं शक्यत इत्यतः पर्वतवह्न्यवयवसंयोगेत्युक्तानुसरणम् । संयोगेन द्रव्यस्याव्याप्यवृत्तितापक्षे पर्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावाधिकरणत्वेपि न तस्य व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वम्, विशेषणीयाव्यवृत्तितादृशसाध्याभावकूटाधिकरणत्वम्; अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि जगत एव साध्याभावकूटाधिकरणत्वेन अतिव्याप्तिरिति व्यभिचारितावच्छेदकोक्तेः पर्वतवृत्तित्वेपि तादृशाभावकूटाधिकरणवृत्तित्वाभावो ऽक्षतएवेत्यतिव्याप्तिभङ्गः ।

* अत्र "यस्य द्रव्यस्य वह्न्यवयव एवाधिकरणत्वप्रत्ययः प्रामाणिको नान्यत्र, तत्र संयोगेन गगनादिवृत्तित्वप्रसिद्ध्या" इत्यपि पाठः ।

[दी] तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोपि,

पूर्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिः, साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने गौरवमिति साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः, तार्णातार्णदहनवृत्तित्वावच्छिन्नप्रतियोगिताकानां तथाविधसाध्याभावानामधिकरणे धूमादेः वृत्तावपि वह्नित्वावच्छिन्नवह्न्यभावघटिततादृशाभावकूटवत्यवृत्तेरव्याप्त्यनवकाशादित्याशयेन तथाविधमेवाभावं निवेशयति – तथे ति । स्वम् – प्रतियोगिता । समनियताभावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेपि साध्यतावच्छेदकेन व्यधिकरणेन वा धर्मेणावच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमक्षतमेव ।

अथ घटत्वाद्यवच्छिन्ना या वाच्यत्वनिष्ठप्रतियोगिता सा घटादिभिन्नयावद्वस्तुवृत्तिरेकैव स्वीक्रियते, न तु वाच्यत्वादिमात्रवृत्तिः, तथा सति घटत्वेन प्रमेयत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगितान्तरकल्पने गौरवादिति तादृशप्रतियोगिताया न वाच्यत्वत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमितिचेत्?, का क्षतिः?, वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयमभावमादायैव तत्र लक्षणसमन्वयसम्भवात्, स्वव्यधिकरणवाच्यत्वभिन्नत्वावच्छिन्नायाः प्रतियोगितायाः वाच्यत्वभिन्नवृत्तित्वस्य सम्भावितत्वात् ।

वस्तुतस्तु; घटत्वावच्छिन्नवाच्यत्वाभावप्रतियोगितायां व्यधिकरणघटत्वादेरिव समानाधिकरणवाच्यत्वत्वादेरपि अवच्छेदकत्वमावश्यकम्, घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तादृशप्रतीतेर्वाच्यत्वत्वादिविशिष्टवैशिष्ट्यानवगाहि

त्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्तेः; एवंच घटत्वेन प्रमेयत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगितायां अतिरिक्तत्वमावश्यकम्, अवच्छेदकभेदात्, इति घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगिता वाच्यत्वादावेव वर्तते, नत्वन्यत्रापि, मानाभावात्, अतो घटत्वादिना वाच्यत्वाभावोपि लक्षणघटकः। अथैवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वाद्यवच्छिन्नसाध्यकस्थले वह्नित्वादिना घटाद्यभावो लक्षणघटको न स्यात्, व्यापकतावच्छेदकवह्नित्वादिपर्याप्तप्रतियोगितावच्छेदकताकत्वविरहात्, महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणायावच्छेदकतापर्याप्तिविवक्षणस्यावश्यकत्वादिति चेन्न;— व्यापकतावच्छेदकपर्याप्तत्वं हि व्यापकतानवच्छेदकावृत्तित्वम्, तच्च इन्धनत्वाद्यवच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकतायामक्षतमिति तादृशाभावमादायैव तल्लक्षणसमन्वयसम्भव इति। अत एव यश्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेर-भाव इति दीधितिग्रन्थस्संगच्छते; अन्यथा इन्धनत्वादिना घटाद्यभावोपेक्षाया निर्बीजता ऽऽपद्येत; एवंच सार्वभौमाणामेतल्लक्षणाभिप्रायकतया समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध इति मूलग्रन्थोपवर्णनमपि संगच्छते।

अथ पर्याप्तिसम्बन्धेन यत्रोभयत्वादिकं साध्यतावच्छेदकं तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकव्यक्तौ पर्याप्तिसम्बन्धेन उभयत्वादेरत्यन्ताभावस्य तदवच्छिन्नभेदस्य च सत्त्वात् तस्य प्रतियोगिताव्यापकत्वं न सम्भवति; नचाव्याप्यवृत्तिसंयोगादेर्यत्र साध्यतावच्छेदकता तत्र प्रतियोगिताव्यापकत्वनिर्वाहाय प्रतियोग्यसामानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयम्, तावता उभयत्वस्यापि व्यापकत्वं निर्वहति, पर्याप्तिसम्बन्धेन उभयत्वपर्याप्त्यधिकर-

णस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्, पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्यता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियोगितासमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधिकरणावृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय तदवच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैव अभावे निवेशनीयतया उभयत्वाभावव्यावर्तनासम्भवात्, तदभाववतः प्रत्येकं तदनधिकरणत्वात् तस्येव तदधिकरणताया अपि व्यासज्यवृत्तित्वादिति चेन्न;— सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षे प्रतियोगिसामानाधिकरण्याभावविशिष्टाभाववत्ताघटितव्यापकतायाः एव निवेशसम्भवात्, पृथिवीत्वादावुक्तोभयत्ववति पृथिवीत्ववच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वेपि जलत्वादेः तत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेन अतिप्रसङ्गाभावात् उभयत्वाद्यभावस्य तदभाववत्येकस्मिन्नपि तत्सामानाधिकरण्याभावानभ्युपगमात् तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येकानतिरिक्तत्वात् ।

अथ वा यन्निरूपितसाध्यतावच्छेदकताघटकसम्बन्धसामान्ये प्रतियोगित्वाधिकरणयत्किञ्चिद्वृत्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव प्रतियोगिताव्यापकत्वम्, उभयत्वनिरूपितपर्याप्तौ च न प्रत्येकानुयोगिकत्वाभावः, तदनुयोगिनः प्रत्येकानतिरिक्तत्वादिति ।

यत्तु— प्राचीनमते रूपादिसामान्याभावस्य रूपतद्ध्वंसतत्प्रागभावत्रयप्रतियोगिकतया रूपध्वंसादिसाध्यकरूपादिहेतावतिव्याप्तिः, रूपादिसामान्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वेन तद्घटिताभावकूटाधिकरणे वायौ रूपादेरवृत्तेः; नच रूपस्यापि रूपध्वंसाभावरूपतया तद्घटितस्य रूपसामान्याभावाघटितकूट

स्यापि यावतामैकाधिकरण्यमिति विवक्षया लक्षणघटकत्वात् तद्वृत्ति हेतो र्वृत्त्या नोक्तातिव्याप्तिरिति वाच्यम्, रूपादीनां प्रत्येकं स्वस्वध्वंसा भावरूपत्वेपि स्वान्यरूपादिध्वंसाद्यभावानात्मकतया साध्यतावच्छेदकसम नियतप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वादिति; तन्न, जलपरमाण्वादौ रूपध्वंसत्वावच्छिन्नाभाववुद्धिनिर्वाहाय जन्यरूपत्वावच्छिन्नाभावे रूपध्वंस त्वावच्छिन्नप्रतियोगिताकत्वकल्पनस्यावश्यकतया तत एव रूपादिसामा न्याभाववत्यपि तत्प्रतीतिनिर्वाहात् रूपादिसामान्याभावस्य रूपध्वंसादि प्रतियोगिकत्वानभ्युपगमात् साधनसमानाधिकरणत्वस्य साध्याभावविशेष-णतापक्षे तेनाप्युक्तस्थले रूपादिसामान्याभावव्यावर्तनात् स्वनिरूपका भाववत्त्वसम्बन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्व मेव निवेश्य लक्षणस्य परिष्करणीयतया रूपादिसामान्याभावानधिकर-णस्यापि जलपरमाण्वादेरुक्तस्थले तत्कूटाधिकरणत्वेन अतिव्याप्तेरनव काशाच्च । प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्य कस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकं प्रतियोगितायामसत्त्वेपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यविवक्षणान्न दोषः । तत्तद्वह्नितत्तद्धूमादिस्वरूपप्रतियोगितानामपि स्वावच्छेदकवह्नि त्वधूमत्वाद्यवच्छिन्नतदभावप्रतियोगितात्वेन वह्नित्वधूमत्वादिसमनैयत्यात् वह्नित्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीय वह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रति योगिताया घटादावपि सत्त्वात् न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रति योगितात्वेन वह्नित्वादिसमनैयत्यमिति तदभावीयत्वविशेषणम्; तथा सति वह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताया घटादावसत्त्वान्नानुपपत्तिः ।

यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिर्दुर्वारैव, व्यधिकरणधर्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्व-

[दी] तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धम्, तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिः, अति-

---

भिन्नत्वाद्यवच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां पटादावपि सत्त्वात्; यत्किंचिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यघटकव्याप्यत्वविवक्षणे च पृथिवीत्वाद्यभावादिसाध्यकस्थले घटावृत्तित्वाद्यवच्छिन्नाभाववारणमशक्यम्, तदभावीयपृथिवीत्वाभावादिरूपप्रतियोगितानां पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयप्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनैयत्यसत्त्वात्; तथापि यद्धर्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेनैव व्याप्यत्वनिवेशान्न दोषः; पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वम्, न तु घटावृत्तित्वावच्छिन्नाभावनिरूपितत्वमिति ।

यद्यपि पूर्वदळाप्रवेशे वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताकतद्भ्रदावृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य गुणादौ प्रसिद्धत्वेपि तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धया अव्याप्तिसम्भवः, तथापि साध्याभाववति तादृशवृत्तेरप्रसिद्धया अव्याप्तिः। तद्दळनिवेशेपि सत्ताद्यान्तरित्यादौ वक्ष्यत इति स्थलान्तरे कूटाधिकरणा[illegible]ख्या अव्याप्तिवारणरूपं तत्प्रयोजनमाह – यत्र पृथिवीत्वाभा[illegible]दौ इति । तादृशपक्षे इति । घटपटादिरूपेत्यर्थः । तत्र सद्धेतौ इति । तत्र – [illegible] य सद्धेतुर्जन्यत्वादिस्तत्रेत्यर्थः । नाव्याप्ति रित्यनेनान्वयः

[दी] व्याप्तिर्वा:; नाप्यभावत्वादिना ऽभावादौ साध्ये तत्तत्साध्याभाव कूटाधिकरणाप्रसिद्धाऽव्याप्तिरित्याहु:; तन्न; — द्रव्यत्वपृथिवीत्वो-

---

यावतामैकाधिकरण्यं सम्भवति तावदभावसमुदायाधिकरणविवक्षायां तद्दोषासम्भवेन स्थलान्तरे व्यावृत्तिमाह—**पृथिवीत्वादा** विति । द्रव्यत्वादेः समवायेन हेतुत्वे जातित्वाद्यवच्छिन्नाभावघटितकूटाधिकरणे समवायेन वृत्तेरप्रसिद्ध्यातिव्याप्तेरनवकाशात् स्वरूपसम्बन्धेन हेतुत्वानुसरणम् । साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे जातित्वाद्यवच्छिन्नाभावस्य साधनासमानाधिकरणतया वारणसम्भवेपि प्रत्येकं साधनसमानाधिकरणजलावृत्तित्वतेजोवृत्तित्वाद्यवच्छिन्नसमवायावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणतायाः सामान्यादावेव सत्त्वादतिव्याप्तिर्दुर्वारेवेति ध्येयम् ।

द्वितीयदलप्रयोजनमाह— **नापी** ति । घटत्वाभावत्वादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिः, अत उक्त **मभावत्वादिने** ति । आदिपदात्प्रमेयत्वादिपरिग्रहः । **तत्तत्साध्ये** ति । घटत्वाभावपटत्वाभावरूपसाध्यस्य य स्साध्यतावच्छेदकव्याप्यप्रतियोगिताको घटत्वपटत्वादिरूपाभावः तत्समुदायाधिकरणाप्रसिद्ध्येत्यर्थः । यावतामैकाधिकरण्यं सम्भवतीति विवक्षायामपि तादृशाभावसमुदायवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव । नच यावतामैकाधिकरण्यसम्भवः तादृशतादृशाभावकूटाधिकरणं यद्यत् तावदन्यतमवृत्तित्वत्वसमानियतप्रतियोगिताको ऽभावो विवक्षणीयः, घटवृत्तित्वत्वाद्यवच्छिन्नाभावश्च उपदर्शितस्थले न तथा, जगत एव तावदन्यतमान्तर्गतत्वात्; अपि तु घटत्वादिना जगद्वृत्तित्वसामान्याभाव एव वृत्तिमद्वृत्तिस्तथाविधोऽभावः, तत्तदधिकरणान्यतमत्वं च तत्तदधिकरणावृत्तिशून्यत्वम्, न तु तत्तदधिकरणान्यान्यत्वम्, अतो नाप्रसिद्धिरिति वाच्यम्, एवमपि जातिप्रतियोगि-

काभाववान् मेयत्वादित्यादौ जातिमतामेव प्रत्येकं घटत्वपटत्वघटित तादृशकूटाधिकरणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृशतया अव्याप्तिर्दुर्वारत्वादिति ।

अत्र साध्याभाववत्तायां सम्बन्धविशेषानिवेशे कालपरिमाणवान् मेयत्वादित्यादवतिव्याप्तिः, कालस्यापि कालिकसम्बन्धेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभावकूटवत्त्वात् ; दैशिकविशेषणता सम्बन्धनिवेशे च घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः, घटत्वादेः तेन सम्बन्धेनावृत्तेः, तेन सम्बन्धेन तद्घटितकूटाधिकरणाप्रसिद्धेः; तेन सम्बन्धेन वृत्तिमत्त्वस्य अभावविशेषणत्वे तु घटत्वाभावादिसाध्यके व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः, कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च; घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतया साध्याभावकूटवत्त्वात् । साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशेप्ययमेव दोषः, किञ्चिद्विशिष्टस्य तादृशसाध्यस्य योऽभावस्तस्य दैशिकविशेषणतासम्बन्धावच्छिन्नाभावस्तद्रूप इति दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात् ; स्वनिष्ठतादृशप्रतियोगितावच्छेदकसम्बन्धेन स्वाधिकरणत्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य साध्याप्रतियोगितया तदसङ्ग्रहप्रसङ्ग इति साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं प्रति यत्सम्बन्धावगाहियदभाववत्ताज्ञानं प्रतिबन्धकं तेन सम्बन्धेन तदभावाधिकरणत्वं विवक्षणीयम् , व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धिरपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं प्रतिबध्नातीति तादृशाभावस्य लक्षणघटकतानिर्वाहः; यदिचाभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकज्ञानं प्रतिबन्धकम्, अभावाभावस्यातिरिक्ततामते तादृशज्ञानप्रति-

बन्धकताया आवश्यकत्वात्, तस्य प्रतियोगिस्वरूपतामतेपि फलसाम्यानुरोधेन तदावश्यकत्वात्, अभावाभावस्यातिरिक्तत्वग्रहदशायां तत्प्रतिबन्धकताया दुरपह्नवत्वाच्च; एवञ्च कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावजातित्वादेरभावे साध्ये आत्मत्वजातित्वादावव्याप्तिर्दुर्वारैव, दैशिकविशेषणतासम्बन्धस्यापि निरुक्तरूपाक्रान्तत्वात् । नचैवं तादृशसाध्यवत्यपि पक्षे तादृशसाध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसम्भवात् तद्विषयस्य हेत्वाभासतापत्तिरिति वाच्यम्, तत्र पक्षे साध्यं नास्तीति ज्ञानस्य भ्रमत्वं निर्विवादमिति तदुपपादनाय तादृशसाध्यप्रतियोगिनस्तादृशसाध्याभावत्वेन दैशिकविशेषणतया वृत्त्यनभ्युपगमादित्युच्यते, तदा निरुक्तसम्बन्धेन साध्याभावत्वावच्छिन्नाधिकरणताकूटवत्त्वमेव विवक्षणीयम्, हेतुमति तादृशाधिकरणताविरहान्नोक्तव्याप्तिः ।

परे तु– घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः, अन्यथा घटे न घटत्वाभाव इत्यादिनञुल्लेख्यप्रतीतिव्यवहारयोरनुपपत्तिः, काले न द्रव्यत्वमित्यादिप्रयोगाभावेन दैशिकविशेषणतासम्बन्धावच्छिन्नाधेयत्वान्वितस्वार्थावगाहिबोधजनकत्वस्यैव नञ्पदे व्युत्पन्नत्वात्; नच भावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा दैशिकविशेषणता, अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रतियोगिभूताभावप्रतियोगितावच्छेदकसम्बन्धः प्रत्याय्यत इति व्युत्पत्तिरिति वाच्यम्, प्रतियोगितावच्छेदकसम्बन्धत्वेन सम्बन्धताविरहाद्विशिष्य समवायकालिकादिसम्बन्धभानस्यैव उपगन्तव्यतया प्रतियोगिन्यभावे सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वाबोधकात् अत्रायमभावो नास्तीत्यादितः सम्बन्धविशेषावच्छिन्नाधेयतायाः प्रतीतौ नियामकाभावात्; समभिव्याहारविशेषनिरपेक्षस्य तात्पर्यस्य नियामकत्वे कालिकादिसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावाभावस्य समवायादिसंसर्गतात्पर्येण आत्मन्ययमभावो नास्तीति

[दी] भयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति

प्रयोगप्रसङ्गात् वास्तवतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगि चाचकपदसभिव्याहारस्य तत्सम्बन्धाभावनियामकत्वे वस्तुतः कालिकसम्बन्धावच्छिन्नप्रतियोगिताके अस्मिन्नभावे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसंशयदशायां अत्रायमभावो नास्तीति वाक्यादधिकरणे एतदभावाभावप्रतीतावपि अधिकरणे कालिकसम्बन्धेन एतदभावाभाववत्त्वादिसंशयस्य सर्वानुभवसिद्धस्य उच्छेदापत्तेः . अथैवं कालादावपि कालिकसम्बन्धावच्छिन्नघटत्वाभावो नास्तीति प्रतीत्यनुरोधेन घटत्वादेर्दैशिकविशेषणतास्वीकारावश्यकतया तत्र समवायावच्छिन्नघटत्वाभावो नास्तीति व्यवहारापत्तिरिति चेन्न; प्रतियोगिमति तदभाववत्त्वेन वृत्तेरनभ्युपगमात्; इत्थंच दैशिकविशेषणतासम्बन्धेन साध्याभावत्वावच्छिन्नवत्त्वं लक्षणे निवेशनीयम्, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वादित्यादौ घटत्वाभावस्य तादृशसाध्याभावत्वेन आत्मन्यवृत्तेर्नाव्याप्तिः; एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य च न भ्रमः सिद्धः, तत्र प्रतिबध्यप्रतिबन्धकभावकल्पनाया असम्भवेन प्रतिबन्धकताघटितलक्षणाव्याप्तिरिति निरस्तमिति वदन्ति ।

तदुभये ति । द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगितायाअपि तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वादिति भावः ।

प्रतियोगिवैयधिकरण्याघटितस्य व्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्य तदुभयत्ववति प्रत्येकमुभयत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तद्रूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिर्द्रष्टव्या।

[दी] द्रव्यत्वादेरवृत्तेरतिव्याप्तेः । अपि च इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः, द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् । किञ्च रूपाभावसाध्यकसद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः. यावतामैकाधिकरण्यं सम्भवति तावतां समुदाये विवक्षितेपि " इदं पृथिवीवृत्तिगुणशून्यम्, सत्तान्य

व्याप्यवृत्तित्वाव्याप्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयो यो धर्मः तदवच्छिन्नत्वस्य प्रतियोगितावच्छेदकत्वोपगमे नैतादृशाति व्याप्तयवकाश इत्यतः स्थलान्तरे अतिव्याप्तिमाह – **अपिचे** ति । **द्रव्यत्वत्वाद्यवच्छिन्ने** ति । शुद्धद्रव्यत्वत्वाद्यवच्छिन्नेत्यर्थः । **पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वा** दिति । विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः । तदवच्छिन्नाभाववतो गुणादेरेव यथोक्तसाध्याभावकूटाधिकरणत्वादिति भावः ।

विशिष्टस्यातिरिक्तत्वेन, साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्व स्थले प्रतियोगितावच्छिन्नव्यापकतावच्छेदकत्वनिवेशेन वा विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाभावस्य वारणसम्भवात् दूषणान्तरमाह— **किञ्चे** ति । **रूपाभावे** ति । रूपत्वाद्यवच्छिन्नाभाव इत्यर्थः । **सद्धेतावित्यव्याप्तिसूचनाय** । **सकलरूपव्यक्त्यधिकरणाप्रसिद्धि** रिति । तथाच तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्धया अव्याप्तिरिति भावः । **यावता** मिति । तथाच प्रकृते सकलरूपघटितसमुदायस्य न लक्षण घटकता, सकलरूपाणामैकाधिकरण्यविरहात्, किन्तु एकैकरूपव्यधिकरण धर्मावच्छिन्नाभावघटितकूटानामेव, प्रत्येकं तदधिकरणता च रूपवत्त्वेव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः । **इद** मिति । वायौ पृथिवीवृत्ति-

[दी] पृथिवीवृत्तिरशून्यं वा वायुत्वाद्रूपवदन्यत्वाद्वे " त्यादौ अति व्याप्तिः, तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन

द्वित्वसंयोगादिसत्त्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारिता, गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादिरपि साध्याभावः, तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावान्नातिव्याप्तिसम्भव इति **पृथिवीवृत्ती** ति । घटतद्वायुद्वित्वपटतद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतां वाय्वावैकाधिकरण्यसम्भवेन तद्घटितकूटस्याषि लक्षण घटकतया तद्वति वायौ हेतोर्वृत्त्या नातिव्याप्तिसम्भवः । नच द्वित्वादि रूपसाध्याभावस्य उत्पत्तिकाले असत्त्वेन कालिकाव्याप्यवृत्तितया व्याप्य वृत्तित्वविशेषणेन तद्व्यावृत्तिः, पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटक इत्यतिव्याप्तिर्दुर्वारैवेति वाच्यम् ; प्राचीनमते द्वित्वादिमति तत्प्राग भावादिकालावच्छेदेन तदत्यन्ताभावासत्त्वात् द्वित्वादेरपि व्याप्यवृत्तित्वादिति पृथिवीपदमेतत्पृथिवीपरम् , इदम्पदपृथिवीपदयोः कर्मधारयो वा ऽभिमतः; नच स्वसमानाधिकरणाभावाप्रतियोगित्वमनवच्छिन्नवृत्तिकत्वं वा व्याप्यवृत्तित्वम् , न तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् , तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्यपरत्वेषि न क्षतिरिति वाच्यम् ; एतदतिव्याप्तिवारणानुरोधेन अत्यन्ताभावघटित व्याप्यवृत्तित्वस्यैव निवेशयितुमुचितत्वात् , एतद्रूपात्यन्ताभाववान् मेयत्वादित्यादावेतद्रूपात्मकाभावस्य लक्षणघटकत्वे अतिव्याप्त्यापत्त्या प्राचीन मते अत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्यावश्यकत्वाच्च ; अत एव चाग्रेतनं **रूपादिघटितत्वेने** त्यपि साधु सङ्गच्छते; पार्थिवरूपमात्रस्यैव अनित्यतया ऽत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशे तदसङ्गत्यापत्तेः । **पृथिवीवृत्ती** त्यत्र वृत्तिस्समवायेन बोध्या, तेन स्पर्शादेः कालिक सम्बन्धेन पृथिवीवृत्तित्वेपि न क्षतिः; पृथिवीसमवेतत्वाद्यवच्छिन्नाभावो

गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे अप्रसिद्धः, पृथिवीसमवेतत्वाद्यव च्छिन्नत्वेनाभिमतायां प्रतियोगितायां केवलसमवेतत्वस्यैवावच्छेदकत्व सम्भवेन पृथिवीसमवेतत्वस्य अभावप्रतियोगितानवच्छेदकत्वात् । नच पृथिवीसमवेतत्वावच्छिन्नाया जलत्वादिव्यावृत्तप्रतियोगितायाः अतिप्रसक्त समवेतत्वेनावच्छेदकत्वसम्भव इति वाच्यम् ; समवेतत्वावच्छिन्नप्रति योगितातोऽतिरिक्ताया जलत्वादिव्यावृत्तप्रतियोगिताया एवाऽप्रसिद्धेः; गुरु धर्मस्याभावप्रतियोगितावच्छेदकत्वेपि पृथिवीसमवेतत्वावच्छिन्नाभावसा धने नातिव्याप्तिसम्भवः, तादृशाभावस्य समवेतत्वावच्छिन्नाभावसम निषतत्वया तदधिकरणेन समवेतमात्रस्यैव तदभावतया वायुत्वादेरपि तथात्वात् । नच पृथिवीसमवेतत्वविशिष्टाभावस्यति जलादौ समवेतत्वा वच्छिन्नाभावविरहान्न तथो स्तमनैयत्यम्, एवंच गुरुधर्मस्याभाव प्रतियोगितानवच्छेदकत्वमतेपि पृथिवीसमवेतत्वस्य तादृशविशिष्टाभाव प्रतियोगितावच्छेदकत्वमावश्यकम्, समवेतत्वविशिष्टस्यति जलादौ तत्स त्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवादिति वाच्यम्; विशिष्टा भावस्य साध्यत्वे तस्य वायुसाधारणतया सद्धेतुत्वप्रसङ्गेन पृथिवीसम वेतत्वोपलक्षिताभावस्यैवात्र साध्यतयोपगन्तव्यत्वादिति गुणपदोपादानम् । पृथिवीसमवेतगुणत्वावच्छिन्नाभावो गुणादिसाधारणत्वान्न समवेतत्वा वच्छिन्नाभावसमनियत इति नोक्तदोषावसरः ।

ध्वंसप्रागभावावच्छिन्ने सामान्याभावमुपगच्छतां वाय्वादेरप्युत्पत्ति कालावच्छेदेन पृथिवीवृत्तिगुणसामान्याभावसत्त्वात्तत्साध्यको वायुत्वादिः सद्धेतुरेवेत्यतो नातिव्याप्तिसम्भव इत्यत स्साध्यान्तरमाह — सत्तान्ये ति । सत्तान्यत्वनिवेशनप्रयोजनं पूर्ववत् । वायुत्वादेरपि सम वेताभावाभावत्वात् पृथिवी ति । अत्र पृथिवीपदं पृथिवीसामान्यपरमेव, घटवायुद्वित्वादेः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्व-

१८

[दी] तद्वति हेतोरवृत्तेः । वस्तुतो निखिलानामेव रूपाणां

विशेषणव्यावर्त्यत्वात् । रूपादिघटितत्वेने त्यत्र रूपपदोपादानं प्राचीन मताभिप्रायेण पूर्वसाध्यमभिप्रेत्य । हेतौ साध्यसामानाधिकरण्यविशेषणेन वायुत्वे अतिव्याप्तिः, अतो द्वितीयद्वैत्वनुसरणम् ।

ननु समनियताभावैक्यमते सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतया विभ्वसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावस्य च विभ्वसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावाभिन्नतया वायुत्वादेरपि तदभाव इति न तादृशाभावसाध्यके अतिव्याप्तिस्सम्भवतीति पूर्वोक्तायाः रूपाभाववान् वायुत्वादित्यत्राव्याप्तेरेवोक्तविवक्षायां दुर्वारतामाह — वस्तुत इति । अत्रायमाशयः; — यावतामैकाधिकरण्यं तावत्समुदायाधिकरणमित्यस्य यत्किंचिदधिकरणवृत्ति सकलसाध्याभावाधिकरणत्वं यत्किञ्चिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयताकत्वपर्यवसितमर्थः, साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वं साध्याभावसमानाधिकरणसाध्याभावत्वव्यापकाधेयत्वकत्वपर्यवसितं वा; आद्ये - व्यभिचारिमात्रेतिव्याप्तिः; जगत एव साध्यत्वात्किञ्चिदधिकरणवृत्तिसकलसाध्याभाववत्त्वादिति समुदायोपादानस्या ऽकिंचित्करतया तद्विवक्षणासम्भवः; द्वितीये च — साध्याभावसमानाधिकरणसाध्याभावत्वमुक्तस्थले निखिलरूपाणामेव अक्षतमिति तादृशसाध्याभावत्वव्यापिका न केनाप्यधिकरणेन निरूपिताधेयतेति तादृशाधिकरणाऽप्रसिद्धिस्तदवस्थैवेति ।

ननु स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणमेवाधिकरणान्तार्थः, धूमवान् वह्नेरित्यादौ महानसादिकं न तथा; अयोगोळकवृत्तिताया स्तद्वृत्ति-

[दी] तादृशाभावसहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिक-

साध्याभावत्वव्यापकत्वादयोगोळकवृत्तिसाध्याभावत्वस्य च समानाधिकरण धर्मावच्छिन्नसाध्याभावसाधारणतया तद्वृत्तित्वाव्याप्यत्वादित्ययोगोळका द्येव तादृशं स्वमिति नातिव्याप्तिः । तादृशयत्किंचिदधिकरणह्रदादि वृत्तित्वाभावस्य वह्न्यादौ सत्त्वेपि न क्षतिः, तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशात् । अन्यतमत्वं च तत्तदवृत्तिशून्यत्वम् , न तु तत्तदन्यान्यत्वम् ; अतो न केवलान्वयिसाध्यके अप्रसिद्धिः । तादृशं स्वं यथतत्तदधिकरणवृत्तित्वाभावकूटवत्त्व निवेशेपि केवलान्वयिसाध्यके अव्याप्तिः, हेतुमतोपि तथात्वात् इति तदुपेक्षितम् । रूपसामान्याभाववान् वायुत्वादित्यादौ च सकलरूपवतामेव तथात्वं स्ववृत्तिताया एव तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वात् , अतो नाव्याप्तिः ।

अथ वा स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावच्छेदेन यदधिकरणवृत्तित्वं तादृशयत्किंचिदधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव यावता मित्यादेरर्थः; धूमवान् वह्नेरित्यादौ तादृशयत्किंचिदधिकरणं न साध्यवत् , तद्वृत्तिसकलसाध्याभाव समानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तद्वृत्तित्वाभावात् ; किन्तु अयोगोळकाद्येवेति तद्वृत्तिसकलसाध्याभाववत्त्वं साध्यशून्यस्यैवेति जगतः अतथात्वान्नातिव्याप्तिः । रूपाभाववान् वायुत्वादित्यादौ च तादृशाधिकरणं तत्तद्घटादिरेव, व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकल साध्याभावसमानाधिकरणत्वात्तस्य च तद्वृत्तित्वनियमादिति नाव्याप्तिरवकाशः । शेषं पूर्ववत् ।

[दी] रणप्रसिद्धिर्दुर्वारेति । किंच हेतुतावच्छेदकसम्बन्धेन साध्याभाव
वति या वृत्तिः तदभावो वक्तव्यः ; अन्यथा धूमादावव्याप्तेः ।

अथ वा व्यासज्यवृत्तिसाध्याभावसमानवृत्तिधर्मावच्छिन्नाधिकरणत्व मेव साध्याभावकूटाधिकरणत्वम्, जगत एव साध्याभावत्वावच्छिन्नाधि करणतया व्यभिचारिण्यतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं धर्मविशेष णम्; तथा सत्यपि च जगत एव व्यधिकरणधर्मावच्छिन्नसाध्याभावसमान वृत्तितथाविधधर्मावच्छिन्नाधिकरणत्वात् स एव दोष इति आधेयतावच्छे दकतादृशधर्मन्यूनवृत्तितद्व्याप्यं यत्रतदन्यतेन धर्मो निवेशनीयः; न्यून वृत्तित्वं च तत्समानाधिकरणानादप्रतियोगित्वमात्रम्; उक्तरूपे तादृ व्यधिकरणधर्मावच्छिन्नसाध्याभावीयत्वादिरेव तादृशो धर्मः, तस्य रूपान्तरसाधारणत्वादिन्यूनवृत्तित्वेपि तादृशधर्मत्वावच्छिन्नस्य तथा दप्यवृत्तेः तस्याधेयतानवच्छेदकतयाधेयतावच्छेदकीभूतनादृशधर्मेण वृत्तितावि रहात् । नच समनियतताभावैक्ये व्यधिकरणधर्मावच्छिन्नाभाव मात्रवृत्तिव्यासज्यवृत्तिधर्मप्रसिद्ध्या केवलान्वयिसाध्यके अव्याप्तिरिति वाच्यम्, तथा सति व्यासज्यवृत्तित्वरूपले अव्यासज्यवृत्त्यनेकवृत्ति धर्मभिन्नत्वस्य निवेशनीयत्वात् केवलान्वयिसाध्यके साध्याभावत्वस्यैव तथात्वादित्यतो दोषान्तरदानाय वृत्तौ हेतुतावच्छेदकसम्बन्धं निवेशयति- किंचे ति । धूमादावव्याप्तिरिति । वह्निमन्मात्रसमवेतघटादौ वृत्तिमा नस्य निर्वह्निसमवेतत्वाभावस्य तत्रासत्त्वादिति भावः । एतच्च यत्किंचित्सम्बन्धावच्छिन्नतादृशवृत्तित्वतत्समनियतप्रतियोगिताकाभावनिवे शाभिप्रायेण; अन्यथा निर्वह्निसंयुक्तत्वादिसाधारणतादृशवृत्तित्वस्य प्रति तथाविधाभावप्रतियोगितायाः अव्यापकत्वात्तस्य लक्षणाघटकतया वृत्तिमन्मा त्रस्यैव साध्याभावाधिकरणकालादौ वृत्तेः निर्वह्निवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वादव्याप्यसङ्गतेः

[ख] साध्यतावच्छेदकसम्बन्धेन साध्याभाववति कालादौ वृत्तिमन्नास्त्येव वृत्तेर्व्यभिचारिण्यतिव्याप्तिप्रसङ्गो वा, तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः; साध्याभाववति तेन सम्बन्धेन

अत एव सम्बन्धनिवेशस्य तादृशाधिकरणवृत्तित्वसमभिव्याहृतप्रतियोगि ताकानानिवेशपक्षे दूषणान्तरमाह – साध्यतावच्छेदकसम्बन्धेने ति । एतच्च कालिकसम्बन्धावच्छिन्नसाध्याभावस्य कालादावसत्त्वेपि तस्य यत्कालावच्छिन्नसाध्याभावसमुदायवत्त्वमक्षतमेवेति सूचनाय । कालादा वित्यादि पदाद्विशेषितासम्बन्धेन वस्तुमात्रसम्बन्धिन ईश्वरज्ञानादेः परिग्रहः । व्यभिचारिणी ति । यत्साध्यके वृत्तिमन्नास्त्याधिकरण्य का-लादेर्विशेषितसाध्याभावकूटत्वं तादृशव्यभिचारिहेतावित्यर्थः । द्रव्यत्वता वच्छेदके द्रव्यत्वपृथिवीत्वान्यतराभावशुद्धद्रव्यत्वाभावयोर्वा सत्त्वादिहेतुके रूपाद्यात्मकसाध्याभावस्य सत्त्वादिसाध्यके संयोगेन समवायेन वा यत्र हेतुः तत्र सत्तात्वावच्छिन्नाभावस्य च साधनवद्वृत्तित्वात्, साधनसमा नाधिकरणत्वेन अभावे विशेषिते न तानभानादाद्योक्तस्थलेष्वतिव्याप्तेश्च व्याप्तिप्रसंजनसम्भव इत्याशंकते – साधने ति । सङ्केतौ व्यधिकरण धर्मावच्छिन्नाभानानामेव साधनसमानाधिकरणतया तादृशाभावकूटाधि करणं जगदेव, व्यभिचारिणि च साध्यतावच्छेदकावच्छिन्नसाध्याभाव स्यापि तथात्वात् तादृशाभावकूटाधिकरणं निस्साध्यमेव साधनसामा नाधिकरण्योपलक्षितामावाधिकरणत्वमेव निवेश्यम्; न तु तद्विशिष्टाधि करणत्वम्; तेन व्यतिरेकिणि हेतौ तद्विशिष्टाधिकरणवृत्तित्वाभावस्य वृत्ति मद्वृत्तित्वसम्भवेपि नाव्याप्तिः । साधनसमानाधिकरणत्वं साधनतावच्छे दकसम्बन्धेन साधनतावच्छेदकविशिष्टवद्वृत्तित्वम्; तेन द्रव्यत्वादेः कालि कसम्बन्धेन अधिकरणे स्पन्दादौ सत्ताधिकरणे गुणादौ च द्रव्यत्वपृथिवीत्वा न्यतरत्वावच्छिन्नाभावस्यसत्त्वेपि द्रव्यत्वपृथिवीत्वोभयादिसाध्यकेद्रव्यत्वद्रव्य

वृत्तित्वविशिष्टसत्त्वादौ नातिव्याप्तिः। नच सत्तायां साध्याभावकूटवद् गुणादिवृत्तित्वसत्त्वाद्विशिष्टसत्त्वे तदभावस्य दुर्लभतया नोपदर्शितसाध्यके विशिष्टसत्त्वे अतिव्याप्तिप्रसक्तिरिति वाच्यम्, साधनतावच्छेदकावच्छिन्नत्वानिवेशे द्रव्यत्वादिसाध्यकविशिष्टसत्त्वे अव्याप्तिवारणाय विशिष्टानुयोगिकाभावाभ्युपगमस्यावश्यकतया उक्तस्थले अतिव्याप्तिप्रसक्तेः। संयोगे साध्ये संयोगेन घटादिहेतौ संयोगत्वावच्छिन्नसंयोगाभावस्य उत्पत्तिकालावच्छेदेन साधनवति वृत्तेर्व्याप्यवृत्तित्वविशिष्टस्याधिकरणे गुणादौ संयोगेन वृत्तेरप्रसिद्ध्या अव्याप्तिः. संयोगी सत्त्वादित्यादौ जगत एव संयोगाभाववत्त्वेन अतिव्याप्तेर्वारणाय व्याप्यवृत्तित्वविशिष्टाभाववत्ता निवेशनस्यावश्यकत्वादित्यतः अनवच्छिन्नैव वृत्तिरत्र प्रवेश्या।

अथ साधनसमानाधिकरणत्वेन साध्याभावे विशेषितेपि सत्तावान् जातेरित्यादावव्याप्तिवारणमशक्यमेव, प्रत्येकं साधनसमानाधिकरणाभ्यां द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटिताभावसमुदायस्य सामान्यादावेव सत्त्वात् तत्र च हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः। यत्तु– द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वं न निवेश्यते, द्रव्यत्वादिवैशिष्ट्यमात्रस्यैव तत्प्रतियोगितावच्छेदकत्वसम्भवादिति द्रव्यत्वादिसाधारणद्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावप्रतियोगितायाः सत्तात्वसमनैयत्यविरहान्न तादृशाभावस्य लक्षणघटकतेति समाधानम्, तदतितुच्छम्; द्रव्यत्वविशिष्टसत्तावान् जातेरित्यादावपीदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्य अभावप्रतियोगितानवच्छेदकत्वात् द्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावस्य च साध्यतावच्छेदकसमानियतप्रतियोगिताकत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेर्दुर्वारतया एतल्लक्षणवादिना गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतस्यावलम्बनीयत्वात्, द्रव्यत्वविशिष्टसत्तात्वादेः प्रतियोगितानव

च्छेदकत्वेपि समवेतत्वात् जातेरित्यादौ समवायेन एतद्रूपान्यत्वविशिष्टाभावतद्रूपान्यत्वविशिष्टाभावादीनां समवेतत्वसमनियतप्रतियोगिताकतया प्रत्येकं साधनसमानाधिकरणतया च तद्घटितकूटाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिवारणासम्भवात् । एवं विशिष्टस्यातिरिक्ततामतावलम्बनाद्दर्शितविशिष्टाभावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि हेयम् ; उक्तस्थल एव द्रव्यत्वतदन्यसमवेतोभयगुणत्वतदन्यसमवेतोभयकर्मत्वतदन्यसमवेतोभयाभावानां साध्यतावच्छेदकसमवेतत्वसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवति सामान्यादौ समवायेन वृत्तेरप्रसिद्ध्या अव्याप्तेः तादवस्थ्यापि वारणासम्भवात् । नच यादृशसाध्याभावस्तोमाधिकरणं साधनाधिकरणं तादृशस्तोमाधिकरणवृत्तित्वाभावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः साधनवत्यसम्भवात् न तत्समुदायस्य लक्षणघटकतेति नाप्रसिद्धिरिति वाच्यम् , एवं सत्यपि तादृशविशिष्टाभावाद्येकतरव्यधिकरणधर्मावच्छिन्नसाध्याभावस्तोमस्य तादृशस्याधिकरणे केषांचिद्वृत्तिमत्तासम्भवात् साधनस्य च वृत्तेरव्याप्तिरवस्थ्यात् । एतादृशविवक्षानुसरणे भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवद्भिन्नत्वादित्यत्र भूतत्वमूर्तत्वोभयघटितसाध्याभावकूटवति हेतोरवृत्तितया उदयनाचार्यव्याप्तेरसङ्गतिप्रसङ्गाच्च; साधनवतो निस्स्पर्शस्य कस्यचिदपि तादृशोभयघटितस्तोमाधिकरणत्वविरहेण तादृशस्तोमस्य लक्षणाघटकत्वात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणवैयर्थ्यापत्तेश्च पृथिवी द्रव्यत्वप्रकारक प्रमाविषयत्वादित्यादौ जलावृत्तित्वतेजोवृत्तित्वावच्छिन्नाभावघटितकूटवत्त्वस्य कस्यचिदपि साधनवत्यसत्त्वेन तादृशकूटस्य लक्षणाघटकत्वात् यादृश कूटवत्त्वं साधनवतस्तद्वद्वृत्तित्वाभावस्य साधने असम्भावितत्वादति व्याप्त्यनवकाशादिति चेत् ?—

[दी] वृत्तेरभिदे:; साधनसमानाधिकरणत्वेन साध्याभावा विशेषणीया इति चेद्विशेष्यन्ताम् ;

अत्राहुः— साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावनिरूपितत्वेन साध्याभावविशेषणादुपदर्शितविशिष्टाभावनिरासः, गुणकर्मान्यत्वविशिष्टसत्ताभावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नसाध्याभावस्य सङ्ग्रहायावच्छिन्नान्तम् ; वृत्तिर्नियतच्छिन्ना ग्राह्या, अन्यथा संयोगी स्मरणादित्यादौ संयोगत्वावच्छिन्नसंयोगाभावस्य साध्यवद्वृत्ति तया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वेन अतिव्याप्त्यापत्तेः, सद्धेतौ साधनसमानाधिकरणस्य साध्यवद्वृत्त्यन्यस्याप्रसिद्धेः सत्तासमानाधिकरणधर्मावच्छिन्ने ति । तथा च व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव विशिष्टभेदप्रसिद्धिः । नचैवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगिता विशेषणं व्यर्थम् ; अभाववान् मेयत्वादित्यादौ घटत्वादिरूपाभावस्य उक्तविशेषणेनैव व्यावर्तनादिति वाच्यम् ; प्रमेयसाध्यकस्थले घटत्वघटत्वो भयावच्छिन्नप्रमेयसामान्याभावस्य गगनत्वावच्छिन्नगगनाभावाभिन्नस्य संग्रहाय साध्यतावच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्यावश्यं निवेशनीयतया घटत्वादिरूपाभावप्रतियोगितावच्छेदकघटत्वाभावत्वादेश्च अभावत्वा व्यापकत्वेन घटत्वादौ विशिष्टभेदस्य अजुषत्वादेतद्विशेषणेन तदव्यावृत्तेः । नन्वाद्यत्वादिसाध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य संयोगादि व्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमक्षतमिति तत्संग्रहाय समानाधिकरणसम्बन्धावच्छिन्नत्वस्यापि समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वविशेषणतायां आवश्यकत्वात् प्रमेयसाध्यकस्थलीयोक्ताभावस्य व्यधिकरणसम्बन्धावच्छिन्नगगनाद्यभावाभिन्नत्वेपि प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणमन्तरेणैव विशिष्ट-

भिन्नत्वमव्याहतमेवेति वाच्यम् ; एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिकरणधर्मतादृशसम्बन्धावच्छिन्नप्रतियोगिताकतया उक्ताभावस्य तदभिन्नत्वेन तत्र विशिष्टभेदनिर्वाहाय तादृशविशेषणस्यावश्यकत्वात् समानाधिकरणसम्बन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छेदकविशेषणसार्थकत्वस्य चोपपादनसम्भवाच्च साध्यवद्वृत्तिस्तादृशाभावश्च उभयत्वादिना साध्याभाव एव प्रसिद्ध इति न काचिदनुपपत्तिरिति। एतेन नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ साधनसमानाधिकरणं पटीयनीलरूपं घटत्वं च न घट इति तादृशनीलरूपघटत्वात्मकसाध्याभावघटितकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्यपि निरस्तम् ; तादृशाभावे उक्तभेदासत्त्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् । एवं घटवृत्तित्वविशिष्टाकाशाभावादेरभावे साध्ये मेयत्वादिहेतौ साध्याभावस्य विशिष्टाकाशाभावादेराकाशाभावानतिरिक्ततया जगत एव साध्याभावकूटाधिकरणतापत्त्या अतिव्याप्तिरिति साध्याभावत्वविशिष्टाधिकरणत्वमेव विवक्षणीयम् , तथाच पटे घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्तीत्यादिप्रत्ययाभावात् पटादेर्न तादृशविशिष्टाभावाधिकरणत्वमिति न दोषः; एवंच साधनाधिकरणेपि साध्याभावत्वेन वृत्तिर्विवक्षणीया, अन्यथा जातिमदन्यत्वविशिष्टाकाशाभावस्य अभावे साध्ये समवायेन हेतौ साधनसमानाधिकरणाकाशाभावस्य साध्याभावत्वविशिष्टस्याधिकरणे सामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वादव्याप्त्यापत्तेः तादृशविवक्षयाप्युक्तोभयाभावसाध्यकस्थले अव्याप्तिवारणं सम्भवति, प्रत्येकाधिकरणं उभयाभावाभावत्वेनावृत्तेः ।

वस्तुतो घटवृत्तित्वविशिष्टाकाशाभावाभावो घटत्वाद्यभावसमनियततया तदभिन्न इति घटत्वादिरपि तदभावः, इत्थंच तद्घटितकूटाधिकरणता न जगत इति दर्शितातिव्याप्त्यनवकाशात् साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमफलम् , साध्याभावत्वेन साधनवद्वृ-

[दी] तथापि भूतत्वमूर्तत्वयोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वा दावतिव्याप्तिः तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः।

त्तित्वं तु साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेऽपि घटान्यत्वविशिष्ट द्रव्यत्वाभाववान् घटत्वादित्यत्र साध्याभावस्य द्रव्यत्वस्य द्रव्यत्ववत्वा दिना साधनसमानाधिकरणतया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेन अव्याप्तेर्वारणाय निवेश्यमेव; नचैवमपि पृथिव्यन्यत्वविशिष्टद्रव्यत्व वत् द्रव्यत्वादित्यादौ साध्यतावच्छेदकविशिष्टवदवृत्त्योः प्रत्येकं साधन समानाधिकरणयोर्घटान्यत्वविशिष्टद्रव्यत्वाभाव घटेतरपृथिव्यन्यत्वविशिष्ट द्रव्यत्वाभावयोरधिकरणं गुणादावेवेत्यतिव्याप्तिर्दुर्वारैवेति वाच्यम्; विशिष्टस्यातिरिक्तपक्षमवलम्ब्यैव तादृशातिप्रसङ्गस्य समाधातुं शक्यत्वा दिति ।

भूतत्वमूर्तत्वाद्यो रिति । उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतोर्व्यभिचारित्वाभावादन्यतरत्वावच्छिन्नाभावस्य साध्यतानुसरणम् । **पृथिव्यादा** वितिं । आकाशे भूतत्वस्य मनसि च मूर्तत्वस्य साधन समानाधिकरणतया आकाशस्य मनसः प्रत्येकं तदुभयानधिकरणत्वेन साध्याभावसमुदायानधिकरणत्वादिति भावः । **आदि** शब्दाद्भूतभेदमूर्त भेदान्यतराभाववान् भूतमूर्तान्यतरत्वादित्यादौ भूतभेदमूर्तभेदात्मकसाध्या भावघटितसमुदायवति कालादिगादौ हेतोरवृत्त्या अतिव्याप्तेः परिग्रहः ।

ननु साधनाधिकरणे येषां परस्परमैक्याधिकरण्यं तत्समुदायस्य विवक्षितत्वान्नायं दोषः, भूतत्वमूर्तत्वाद्योः प्रत्येकं साधनसमानाधिकर णत्वेपि साधनवति परस्परमैक्याधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतोः वृत्तेः प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं त्याज्यमेव, एवञ्च

विशिष्टस्यानतिरिक्तत्वेपि पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ नोक्तरीत्या ऽतिव्याप्ति सम्भवः, उक्तविशिष्टाभावानां साधनवति द्रव्यादावैकाधिकरण्याभावात् . एवं तादृशकूटाधिकरणपृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वत्वादिना योऽभावः, तस्यापि तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गततया तद्घटत्वविरहादप्युक्तहेतौ नातिव्याप्तिसम्भवः । नच द्रव्यवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया आकाशादि वृत्तित्वसाधारणतया तादृशवृत्तित्वत्वाव्याप्यत्वान्न तादृशाभावो लक्षणघटक इति वाच्यम् , साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे प्रतियोगितायां तादृश वृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृशविशेषणस्य परित्याज्यत्वात् वह्निमान् धूमादित्यत्र आलोकाद्यवृत्तित्वरूपेण निर्वह्निवृत्तित्वाभावस्य प्रतियोगिताया आलोकादिनिष्ठपर्वतादिवृत्तित्वसाधारणं साधन समानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्वं प्रत्यव्यापकत्वमेव तादृशाभावव्यावर्तनात् साधनाधिकरणे साध्याभावत्वेन वृत्तेर्विवक्षितत्वादेव भूतत्व मूर्तत्वयोरुभयत्वेनाभावे साध्ये स्पर्शवदन्यत्वादौ द्रव्यवृत्तित्वाभावमादाय न दोषः. व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणात्पर्वतसंयुक्तत्वपर्वतान्यसंयुक्तत्वोभयत्वाद्यवच्छिन्नाभावस्य पर्वतासंयुक्तघटादौ वर्तमानस्य धूमादावसत्त्वेपि न क्षतिः । प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणेपि तादृशाभावमादायाऽव्याप्तेरावश्यकतया एतद्विशेषणस्य तद्विशेषणसत्त्वेप्यावश्यकत्वात् चरमाभावप्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणत्यागे यत्किञ्चित्साधनाधिकरणवृत्तिसाध्याभावसमुदायाविवक्षणेपि प्रथमाभावप्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमेव; पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलाद्यसमवेतत्वावच्छिन्नाभावकूटवत्त्वस्य साधनवत्त्वसत्त्वेपि तादृशाभावकूटवत्सामान्यादिवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानां पृथिव्यन्य-

[दी] किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषण-

वृत्तित्वत्वावच्छिन्नाभावानामेव वृत्तिमद्वृत्तीनां हेतावसत्त्वेन अतिव्याप्त्यनवकाशात् । एवं सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धिनिबन्धना ऽव्याप्तिवारणायोपात्त-साध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्न-त्वरूपसाध्याभावविशेषणस्थले साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीय समानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्य व्यधिकरणधर्मावच्छिन्नाभावीयगगनादिनिष्ठप्रतियोगिताभिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगिताभादायैव व्यधिकरणधर्मावच्छिन्नसाध्याभावसंग्रहे समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वस्यानिवेशनीयतया अभावसाध्यकस्थले साध्यतावच्छेदकन्यूनवृत्तिघटत्वाभावत्वाद्यवच्छिन्नप्रतियोगितायां साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्तनात् साध्याभावप्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्यजनीयम्; उक्तरीत्यापि पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावकूटस्य हेतुमत्यसत्त्वेपि घटान्यवृत्तित्वत्वादिना गुणादिवृत्तित्वाद्यभावमादाय अतिव्याप्तिर्वारणीयेत्यतो दोषान्तरमाह– किंचे ति । केचित्तु — ननु स्ववृत्तिसाधनसमानाधिकरणसाध्याभावसमुदायाधिकरणं यद्यत्साधनाधिकरणं तद्वृत्तिसाध्याभावसमुदायाधिकरणं यद्यत्त्वं तदेव **साध्याभावसमुदायाधिकरणे** त्यनेन विवक्षितम्; सद्धेतौ तादृशं त्वं जगदेव, वह्न्यधिकरणमहानसादिनिष्ठानां निर्वह्निह्रदादिनिष्ठानां च धूमादिसमानाधिकरणसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगितानां समुदायवद्यद्यत्साधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वस्य महानसादौ साध्यवति साध्यशून्ये च ह्रदादौ सत्त्वात्, अतो लक्षणसमन्वयः ।

भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ तादृशं स्वं गगनं मनश्च; गगनवृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनरूपसाधनाधिकरण एव मनोवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनस्येव सत्त्वेन निरुक्तसाधनाधिकरणवृत्तिसाध्याभावसमुदायाधिकरणत्वस्य तत्र तत्र सत्त्वात्; स्ववृत्तिसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने वह्न्यादिशून्यह्रदादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरणत्वस्य साधनाधिकरणे असत्त्वात् साध्यवदेव तादृशं स्वम्, तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेर्हेतावसत्त्वात् अव्याप्तिः, अतः तत्र तद्विशेषणप्रवेशः । प्रथमसमुदायपदाऽदाने भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनं मनश्च न तादृशं स्वम्, तद्वृत्तित्वाधिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगननिष्ठभूतत्वमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनमनसोः प्रत्येकमसत्त्वात्; किन्तु पृथिव्यादिचतुष्कमेव तथाविधं स्वम्, तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिः, अतः तदुपादानम् । धूमवान् वह्नेरित्यादावपि पर्वतादेः स्ववृत्तिसाध्याभावकूटाधिकरणमहानसादिरूपसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणतया जगदेव तादृशं स्वं स्यात्; अतो यद्य दिति; तथाच पर्वतादिवृत्तिसाध्याभावाधिकरणं यद्यत्साधनवदयोगोळकादेरपि तदन्तर्गततया तद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावघटितसाध्याभावकूटस्य पर्वतादावसत्त्वात्तादृशं स्वं धूमादिशून्यमेवेति नातिव्याप्तिः । "यद्यत्साधनाधिकरण" मित्यनुक्त्वा "यद्यदधिकरण" मित्येतावदुक्तौ भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत्पृथिव्यादेरपि तदन्तर्गततया तद्वृत्तिमूर्तत्वादिघटितकूटस्य गगनादावसत्त्वात् तादृशं स्वं न गगनादिकं भवेत्; अपि तु पृथिव्यादिकमेवेत्यतिव्याप्तिः, अतः साधनाधिकरणत्वनिवेशः; पृथिव्यादेस्तत्र साधनानधि-

[दी] तावविशेषेण हेतावतिव्याप्तिः, तादृशसाध्याभावसमुदायवति महाकाले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः,

---

करणत्वान्न दोषः । धूमवान् वह्नेरित्यादौ अयोगोळकादिनिष्ठव्यधिकरण धर्मावच्छिन्नसाध्याभावाधिकरणत्वस्य पर्वतादौ सत्त्वाज्जगदेव तादृशं स्वं स्यादिति चरमसमुदायपदोपादानम् । पूर्ववत्तादृशं यद्यत्स्वं तावदन्य तमवृत्तित्वव्यापकप्रतियोगिताकाभावो विवक्षणीयः, अतो नातिव्याप्ति रसम्भवो वा इत्यतो दोषान्तरमाह – किंचे तीत्याहुः ।

महाकाले ति । कालान्यत्वसाध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामानाधिकरण्यविशेषणेन अतिव्याप्तिवारणसम्भवात् महा कालभेदसाध्यकानुसरणम् । यद्यपि महाकालत्वसाध्यके अतिव्याप्ति स्सम्भवति , वृत्तिमन्मात्र एव महाकालातिरिक्तकालवृत्तित्वस्यापि सत्त्वात् ; तथापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छि न्नाभावघटितवक्ष्यमाणलक्षणे तत्तत्कालमात्रवृत्तितत्तत्कालावृत्तित्वावच्छिन्ना भावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्तिः । साधनाधिकरणे सम्भवदैका धिकरण्यकसाध्याभावसमुदायाधिकरणत्वस्य प्रयोजनान्तरानुरोधेन निवेशे तादृशाप्रसिद्धिनिरहेपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषावृत्तित्वाव च्छिन्नाभावघटिततादृशकूटाधिकरणतत्कालवृत्तित्वाभावस्य तत्कालावृत्तौ वृत्ति मति वर्तमानस्य साधने अभावान्नातिव्याप्तिरित्यग्रिमस्यैतेनेत्यादेरसङ्गति रिति एकमात्रविपक्षकानुसरणम् । **आदि**पदान्महाकालत्वाभावादिपरि ग्रहः । अवृत्तिहेतौ साध्यसामानाधिकरण्यविशेषणेन अतिव्याप्तिवारण सम्भवात् **व्यभिचारिणी** ति । वृत्तिमत्त्वमात्रमत्र विवक्षितम् , तन्मा त्रस्यैव व्यावर्तकत्वात् । समवायादिना द्रव्यत्वहेतुके तादृशसम्बन्धेन महाकालवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमति घटत्वादौ वृत्तेर्हेतावृत्तेर्ने नातिव्याप्तिसम्भव इति कालिकसम्बन्धावच्छिन्नहेतुताकानुसरणम् । इद-

मुपलक्षणम् ; ईश्वरज्ञानान्यत्वादिसाध्यके विषयितासम्बन्धेन हेतुमात्रे साध्याभावसमुदायपतीश्वरज्ञानादौ तेन सम्बन्धेन वस्तुमात्रस्यैव वृत्तेरति व्याप्तिर्द्रष्टव्या. एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमद्वृत्तित्ववृत्तित्वत्व व्यापकप्रतियोगिताकत्वोभयाभावस्य वृत्तिमद्वृत्तित्वसाध्यवद्वृत्तित्वप्रति योगिकत्वोभयाभावस्य वा निवेशे महाकालवृत्तित्वस्य समानाधिकरण धर्मावच्छिन्नाभावे चरमदळाभावेन उभयाभावसत्त्वेपि न निस्तारः । एवं यथाश्रुते घटत्वादिसाध्यके व्यभिचारिणि संयोगेन हेतौ साध्या भाववति संयुक्तमात्रस्यैव संयुक्तत्वादेतद्भूपत्वादिसाध्यके व्यभिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्भूपाद्यतिरिक्तसमवेतत्वादतिव्याप्ति रित्यपि द्रष्टव्यम् ॥

॥इति कूटघटितलक्षणम्॥

अथ पुच्छलक्षणम् ।

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटा धिकरणत्वस्य नानाविपक्षकस्थले अप्रसिद्धावपि साधनसमानाधिकरण तादृशाभावकूटाधिकरणत्वस्य नाप्रसिद्धिरिति साधनसमानाधिकरणस्य विशेषणपक्षे तादृशाभावकूटाधिकरणतागर्भमेव लक्षणं सम्यक्; साध्यतावच्छे दकव्यापकतापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वस्य गुरु त्वेपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणे सत्तावान् जाते रित्यादौ विशिष्टसत्ताभावादिवारकोक्तविशेषणनिवेशे महागौरवात् ; विशि ष्टस्यानतिरिक्तत्वे पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्य त्वाभावादेरपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रति योगिताकतया उक्तदिशाऽतिव्याप्तिवारणाय तादृशाभावघटितलक्षणेपि साधन वति सम्भवदेकाधिकरण्यकतादृशाभावसमुदायस्यावश्यं विवक्षणीयतया पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ समवायसम्बन्धावच्छिन्नजलासमवेतत्वा द्यवच्छिन्नाभावघटितकूटाधिकरण सामान्यादिवृत्तित्वाभाववत्त्वेप्यतिव्याप्तेर नवकाशात् साधनवति सम्भवदेकाधिकरण्यविवक्षामन्तरेणैव पृथिव्यन्यद्रव्य

[दी] एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्न

त्ववत् द्रव्यत्वादित्यादौ घटान्यवृत्तित्वत्वावच्छिन्नाभावमादायातिव्याप्ति वारणे उक्तस्थलेपि तादृशाभावमादायातिव्याप्तिवारणसम्भवात् प्रतियोगि तावां साध्यतावच्छेदकव्याप्यत्वविशेषणं नोपादेयम् । यद्यपि साधन वति सम्भवदैकाधिकरण्यकूटनिवेशे द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्व विशिष्टसत्ताभावघटितकूटस्य सत्तावान् जातेरित्यादौ न लक्षणघटकता प्रसक्तिः, तथापि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे तादृ शाभावैकतरव्यधिकरणधर्मावच्छिन्नाभाघटितकूटस्य तथात्वादव्याप्तिरिति तदुपेक्षेतिरीत्या सार्वभौमलक्षणपरिष्कारमपि हेतुतावच्छेदकसम्बन्धेन वृत्ति मद्यावदधिकरणमहाकालादिमात्रविपक्षकव्यभिचारिण्यतिव्याप्त्यापत्त्या निरा कुरुते– **एतेने** ति । अत्र प्रतियोगितायामवच्छिन्नान्तविशेषणव्यावृत्ति रभाववान् मेयत्वादित्यत्रेव वह्निमान् धूमादित्यत्रापि बोध्या; यादृशसाध्या भावकूटाधिकरणं साधनवत्तार्णातार्णदहनोभयाभावादिघटितकूटस्यापि तथा विधकूटतया तथाविधोभयादिगदवृत्तिपदार्थे वर्तमानस्य तादृशकूटाधि करणवृत्तित्वाभावस्य हेतावसत्त्वात् । अत्र साध्यतावच्छेदकसम्बन्धावच्छि न्नत्वेनापि प्रतियोगिता विशेषणीया ; अन्यथा वह्निमान् पर्वतवह्नि वयवसंयोगादित्यत्र संयोगसम्बन्धावच्छिन्नवह्न्यभावसमवायसम्बन्धावच्छि न्नवह्न्यभावयोः सम्भवदैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणा घटकत्वात् अतिव्याप्तिविरहेपि वह्निमान् धूमादित्यादौ साध्यतावच्छेद कसम्बन्धातिरिक्तसम्बन्धावच्छिन्नाभावकूटस्य उक्तक्रमेण लक्षणघटकतया त द्धति वह्न्यवयवाद्यतिरिक्ते हेतोर्वृत्तेरसम्भवापत्तेः । व्यापकतापि साध्य तावच्छेदकसम्बन्धेन; अन्यथा समवायेन वह्निसंयोगे साध्ये संयोगेन साध्यव्यापकस्य वह्नेस्समवायसम्बन्धावच्छिन्नाभावादिघटितकूटाधिकरण व-

[दी] प्रतियोगिताकव्याप्यवृत्तित्वसमानाधिकरणसावदभावाधिकरण वृत्तित्वाभावा यावन्तः वृत्तिमदवृत्तयस्तद्वत्वं व्याप्तिः. केवलान्वयिन स्संयोगाद्यभावस्याभावास्संयोगादयः न व्याप्यवृत्तयः । एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे

न्यवयवातिरिक्तवृत्तौ सद्धेतावव्याप्त्यापत्तेः; इत्थंच संयोगेन सम्बन्धेन व्यापकताप्रसिध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणस्य आवश्यकतया व्याप्यवृत्तिपदसार्थक्यमिति केचित् ।

वस्तुतस्तु- येन सम्बन्धेन व्यापकता तेनैवाभावो ग्राह्यः; साध्यतावच्छेदकसम्बन्धस्य विशिष्य निवेशे अवच्छिन्नवृत्तिकान्यत्वरूप व्याप्यवृत्तित्वनिवेशे संयोगेन धूमादिसाध्यके तत्सम्बन्धावच्छिन्नधूमत्वा वच्छिन्नाभावस्य धूमवत्यवच्छिन्नवृत्तिकतया व्यधिकरणधर्मावच्छिन्ना भावमात्रस्य व्याप्यवृत्तित्वेन अतिव्याप्तिवारणाय अनवच्छिन्नवृत्तिकत्व रूपव्याप्यवृत्तित्वस्यैव निवेशनीयतया "एव" मित्यादिपङ्क्तिरयसङ्गते र्वक्ष्यमाणत्वात् , अन्योन्याभावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपद सार्थक्यम् ।

संयोगाभावसाध्यकस्थले संयोगघटितकूटाधिकरणताया द्रव्यमात्रे सत्त्वात् तद्वृत्तिहेतावव्याप्तिवारणरूपं तत्त्वयोजनमाह — केवलान्वयिन इति । एतेन तत्साध्यके द्रव्यवृत्तेस्सद्धेतुत्वमक्षतमिति सूचितम् ।

गुणवान् द्रव्यत्वादित्यादौ गुणादावनवच्छिन्नवृत्तिकगुणाद्यभाव वति नित्यद्रव्यातिरिक्ते हेतोर्वृत्त्या अव्याप्तिवारणरूपमनवच्छिन्नवृत्तिकत्व रूपव्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशनफलमाह — एव मिति । साध्याभावे उत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वकथनं द्रव्यत्वे तद्वद्वृत्तित्वाभावासत्त्वेनाव्याप्तिप्रसङ्गसूचनाय; व्याप्यवृत्ति रित्यत्र द्रव्य त्वाधिकरण इत्यनुपज्यते, इति व्याख्यानमसत् ; अनवच्छिन्नवृत्तिकत्व-

[दी] उत्पत्तिकालावच्छेदेन वर्तमानोपि न व्याप्यवृत्तिः, उक्तरूपावच्छिन्नप्रतियोगिताकाः कचिदप्रसिध्यादिसम्पादकाः पुनरभावाः न हेतुत्वाभिमतसमानाधिकरणाः

रूपव्याप्यवृत्तित्वनिवेशे संयोगी घटादित्यत्रोक्तरीत्या ऽव्याप्तेर्वारणाय साधनवति व्याप्यवृत्तित्वस्यावश्यनिवेशनीयतया तत एवान्याप्तयप्रसक्तेः। साधनवति व्याप्यवृत्तित्वपर्यन्तनिवेशनप्रयोजनपरतया एतत्पङ्क्तिव्याख्या। न साधीयसी; व्याप्यवृत्तित्वविशिष्टाधिकरणत्वाप्रवेशे संयोगी सत्त्वादित्यत्र गुणादौ व्याप्यवृत्तेः संयागाभावस्येव द्रव्यत्वाद्यभावस्यापि लक्षणघटकतया जगतः साध्याभावकूटानधिकरणतयाऽतिव्याप्तयनवकाशेपि धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकसंबोगसम्बन्धावच्छिन्नप्रतियोगिताक व्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणताया विश्वस्मिन् सत्त्वादतिव्याप्तेर्दुर्वारतया तत्प्रवेशनस्यावश्यकतया तावताप्युक्ताव्याप्तिवारणसम्भवात्; तस्माद्व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वमत्राभिमतम्; अतोपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावोपेक्षा, तन्निवेशे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यैव निवेशनीयतया संयोगेन साध्यतायां व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगेन द्रव्याभावस्यावच्छिन्नवृत्तिकान्यतया अतिव्याप्तेः, तन्निवेशनस्यैव दैशिककालिकाव्याप्यवृत्तिसाध्यभेदेन स्थलद्वये व्यावृत्तिरभिहितेति सारम्।

स्वसमानाधिकरणत्वनिवेशनप्रयोजनमाह – उक्तरूपे ति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपेत्यर्थः। अप्रसिद्ध्यादी ति। सत्तावान् जातेरित्यादौ सत्तात्वाद्यवच्छिन्नाभावकूटाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिद्धेस्सम्पादका रूपाभावादिसाध्यके रूपाद्यात्मकाभावकूटाधिकरणाप्रसिद्धिसम्पादकाः, सम्भवदैक्याधिकरण्यापन्नसाध्याभावस्तोमाधिकरणत्वाविवक्षणे सत्तान्मपृथिवीसमवेतशून्यं वायुत्वादित्यादौ

[दी] उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमद्वृत्तित्वानि पूर्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तम् ।

आदिपदग्राह्याया अतिव्याप्तेः सम्पादका बोध्याः । पूर्वोक्तरीत्ये ति । समुदायाधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन, तदभाव स्तादृश वृत्तित्वत्वव्यापकप्रतियोगिताकः; हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्त्वं लक्षण षटकं बोध्यमित्यर्थः । अपास्त मिति । नच सार्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्तितया साध्याभावकूटवन्महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावोपि सामानाधिकरण्यानिरूपकखण्डकालाद्यवच्छेदेन घटादिरूपवृत्तिमति वर्तत एवेति महाकालान्यत्वसाध्यके नातिव्याप्ति सम्भव इति वाच्यम् ; तथा सति वह्न्यादावपि स्वावयवाद्यवच्छेदेन निर्धूमसंयुक्तत्वाद्यभावसत्त्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेरुक्तस्थले अतिव्याप्तिवारणस्य सुदूरपराहतत्वात् ।

यत्तु- हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणसामान्यावच्छेदेन तद्वत्त्वस्य विवक्षितत्वान्नातिव्याप्तिः, व्यभिचारनिरूपकाधिकरणावच्छेदेन हेतौ तद्वत्त्वविरहादिति ; तन्न; एवं सति स्वावयवावच्छेदेन घटादिवृत्तेः समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य पर्वताद्यवच्छेदेन धूमादावसत्त्वादसम्भवापत्तेः; वृत्तिमद्वृत्तिपदेन हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तद्वृत्तित्वविवक्षायामपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावकूटाधिकरणवृत्तित्वाभावस्याधिकरणानवच्छिन्नतया असम्भवस्य दुर्वारत्वात्, यदि च वृत्तिमत्यनवच्छिन्नवृत्तयो यावन्त स्तादृशाभावाकूटाधिकरणवृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युच्यते?; तदा सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षेपि न दर्शितदोषनिरासस्सम्भवति, समानाधिकरण

धर्मावच्छिन्नमहाकालवृत्तित्वाभावस्य वृत्तिमत्त्वनवच्छिन्नवृत्तिकत्वविरहेण लक्षणघटकत्वात् . हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तदवृत्तित्वकिंचिदवच्छिन्नत्वोभयाभाववन्तो यावन्तस्तादृशाभावकूटवदवृत्तित्वाभावो भवनवच्छिन्नतद्वृत्त्वं व्याप्तिरित्युक्तौ न कश्चिद्दोषः; समानाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावे किंचिदवच्छिन्नत्वसत्त्वेपि कालिकसम्बन्धेन घटाधिकरणखण्डकालावच्छेदेन घटाद्यवृत्तित्वासत्त्वेन उभयाभाववत्ताया अक्षततया महाकालान्यत्वसाध्यके व्यभिचारिणि तादृशाभावस्य लक्षणघटकत्वेनातिव्याप्तिविरहात् । समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य घटादौ कापालाद्यवच्छेदेन वृत्तेः संयोगादिना यद्घटाद्यधिकरणं तदवच्छेदेन घटादावृत्तेर्निरुक्तोभयाभाववत्त्वविरहाद्वह्निमान् धूमादित्यादौ न लक्षणघटकता, अभिनवनवच्छिन्नत्वविरहेण उभयाभाववतोऽप्यधिकरणधर्मावच्छिन्नतदभावस्यैवेत्यव्याप्तिवज्रकाशादितिध्येयम् ।

सामानाधिकरण्यस्य व्याप्यवृत्तित्वे हेतुतावच्छेदकसम्बन्धेन किञ्चित्पदार्थाधिकरणवृत्तयो यावन्त स्तादृशाभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावा यदधिकरणत्वावच्छेदेन वर्तन्ते तत्त्वमिति वक्तव्यम् ; महाकालवृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नाभावः खण्डकालवृत्तिः साधनाधिकरणमहाकाले नास्तीति नोक्तातिव्याप्तिवज्रावकाशः । सद्धेतौ तादृशाभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य व्यधिकरणधर्मावच्छिन्नाभाव एव हेतुतावच्छेदकसम्बन्धेन किंचिदधिकरणवृत्तिः, स हेत्वधिकरणसामान्य एव वर्तत इति लक्षणसमन्वय इति कृतं पल्लवितेन ॥

॥ इति पुच्छलक्षणम् ॥

॥ अथ व्यधिकरणधर्मावच्छिन्नाभावखण्डनम् ॥

मूले—* प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुः प्रतिज्ञावाक्यम् ; तत्र धर्मत्व मनुपादेयम्, अवृत्तेरपि प्रतियोगितावच्छेदकत्वस्य निराकर्तव्यत्वात् तत्त्वे साध्यकाभावादिति हेतुरूह्यः । पक्षतावच्छेदके साध्यतावच्छेदके च सामान्यतः प्रतियोगिप्रतियोगित्वयोर्न प्रवेशः, सर्वेषामेव किंचिद्-भावप्रतियोगिनि सम्बद्धतया किंचिदभावप्रतियोगितावच्छेदकतया च विशिष्टपक्षाद्यप्रसिद्धेः ; किन्तु विशिष्य वाच्यत्वत्वादिना; तथाच वाच्य त्वाद्यवृत्तित्वावच्छिन्ने वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयम्, समूहालम्बनानुमितिरुद्देश्या तत्तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्ने तत्तदभावप्रतियोगितानवच्छेदकत्वसाधनं न सम्यक् ; समनियताभावैक्य मते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वाद्यवच्छिन्नपटाद्यभावा भिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेर्वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तिताया दुर्घटत्वात् प्रति योगिताः विशिष्योपादाय तत्तत्प्रतियोगितावदवृत्तित्वावच्छिन्ने तत्तत्प्रति योगितावच्छेदकत्वाभावसाधनमपि हेयम् ; वाच्यत्वादिनिष्ठायाः प्रसिद्ध समानाधिकरणद्वित्वाद्यवच्छिन्नाभावप्रतियोगिताया उपादाने सिद्धसाधनात्, सौन्दलोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्मस्य समानाधिकरणधर्मा वच्छिन्नप्रतियोगितावच्छेदकत्वानङ्गीकारात् व्यधिकरणधर्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानासम्भवात् ।

केचित्तु— विशिष्य समवायित्वत्वादिकं पक्षतावच्छेदकीकृत्य वाच्य त्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयम्, तादृशप्रतियोगितावदवृत्ति त्वमेव हेतुः, यो यदवृत्तिः स तन्निष्ठप्रतियोगितानवच्छेदक इति सामा-

न्यतो व्याप्तिप्रदर्शकः प्रतियोग्यवृत्तिश्चे ति ग्रन्थः ; वीप्साया भावेपि प्राचुर्येण व्याप्तेर्लाभसम्भवात् ; वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादिनिष्ठप्रतियोगितायां तन्मते अवच्छेदकतया सद्यप्यत्रान्वयदृष्टान्तदुर्भिक्षम् , तथापि व्यतिरेकेण वाच्यत्वादिनिष्ठाभावत्वादिकमेव दृष्टान्तस्सम्भवतीत्यदोषः । अथवा – यो यद्वदवृत्तिः, स तदनवच्छेदक इति सामान्यव्याप्तौ कारणत्वादिव्यधिकरणः कारणत्वाद्यनवच्छेदक एवान्वयेन दृष्टान्तः, प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभयसाधारणावच्छेदकतात्वस्यैक्ये भ्रमविषयता, व्यधिकरणतदवच्छेदकरजतत्वादौ उक्तसामान्यव्याप्तेर्भङ्गवारणाय विषयतान्यत्वेन यत्पदार्थो विशेषणीय इत्याहुः । अथ कालिकादिसम्बन्धेन पटादिवृत्तिघटत्वादेः समवायादिना पटादिनिष्ठप्रतियोगितावच्छेदकत्वखण्डनाय तत्तत्सम्बन्धेन प्रतियोग्यवृत्तित्वम् ; तत्तत्सम्बन्धेन प्रतियोगितावच्छेदकत्वाभावसाधने पक्षतावच्छेदकतया हेतुतया वा विवक्षणीयम् , तथाच समवायादिसम्बन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्ध्योक्तरीत्या समवायादिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावखण्डनानुपपत्तिः. " प्रतियोग्यवृत्तित्व " मित्यनेन प्रतियोगिनिष्ठावच्छेदकताघटकसम्बन्धावच्छिन्नाभावप्रतियोगित्वमेव विवक्षणीयम् , तथाच घटत्वादेरेव वाच्यत्वादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया नाप्रसिद्धिरिति वाच्यम् , अव्याप्यवृत्तेः संयोग्यभावप्रतियोगितावच्छेदकस्य प्रतियोगिनिष्ठाभावप्रतियोगितयोक्तधर्मस्य पक्षतावच्छेदकत्वे बाधस्य, हेतुत्वे च व्यभिचारस्य दुर्वारत्वात् . प्रतियोगिनिष्ठभेदप्रतियोगितायामवच्छेदकताघटकसम्बन्धेनावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिः; नेन सम्बन्धेन घटत्वादेः भेदप्रतियोगितावच्छेदकत्वस्य वादिनोरनुमतत्वात् . एवं घटत्वादौ समवायादिसम्बन्धेन वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वस्याभाव प्रतियोग्यप्रसिद्धिः साधयित-

तद्विशिष्टज्ञानस्याभावधीहेतुत्वात्. अन्यथा तान्निर्विकल्पकादपि घटोनास्तीति बुध्यापत्तेः ।

[दी] तद्विशिष्टे ति । विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्यक्षहेतुत्वात् ।

मशक्यः, मैवम् ; स्वप्रतियोगिकत्व मदनुयोगिकत्वोभयाभाववद्यादृशसम्बन्धसामान्यको यः स स्वनिष्ठत्ववत्तत्सम्बन्धावच्छिन्नत्वोभयाभाववत्तन्निष्ठप्रतियोगितावच्छेदकतासामान्यक इत्यर्थविवक्षायामेव सामञ्जस्यात्, संयोगादिसम्बन्धसामान्ये घटत्वादिप्रतियोगिकत्ववाच्यत्वाद्यनुयोगिकत्वोभयाभावसत्त्वात् प्रथमस्वपदेन घटत्वाद्युपादानस्य मतद्वय एव सम्भवात् तत्र स्वनिष्ठत्वसंयोगादिसम्बन्धावच्छिन्नत्वोभयाभाववद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधनेनोद्देश्यसिद्धिः ।

ननु समवायितया वाच्यत्वं नास्तीत्याकारकः समवायित्वादेर्वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाही प्रत्यय एव मानमित्युक्त हेतोरसिद्ध्याशङ्क्यायामाह — तद्विशिष्टज्ञानस्ये ति । अत्र च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावलौकिकप्रत्यक्षत्वावच्छिन्न हेतुत्वादित्यर्थः । यद्यपि **अन्यथा घटादिनिर्विकल्पकानन्तरं घटाभावप्रत्यक्षापत्ते** रिति मूलदर्शितयुक्त्या वाच्यत्वं न समवायीति विशेषदर्शनप्रतिबध्यवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानपर्यन्तापेक्षा समवायित्वावच्छिन्नवाच्यत्वाभावप्रत्यक्षे नास्ति, तथापि स्वतन्त्र महानसीयत्ववह्नित्वप्रकारकज्ञानान्महानसीयवह्निर्नास्तीति · · बुद्ध्यनुदयात् महानसीयवह्निर्नास्तीत्याद्यभावबुद्धौ महानसीयत्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितावगाहिन्यां यथा महानसीयत्वप्रकारेण वह्नित्वाद्यव-

च्छिन्नविषयकं ज्ञानं हेतुः तथा समवायितया वाच्यत्वं नास्तीत्यादि बुद्धेर्वाच्यत्वादिनिष्ठप्रतियोगितायां समवायित्वाद्यवच्छिन्नत्वाद्यवगाहित्वे समवायित्वादिना वाच्यत्वत्वाद्यवच्छिन्नधर्मिकज्ञानं हेतुतयाऽपेक्ष्यते., तथाच वाच्यत्वं न समवायीति विशेषदर्शनदशायामप्यनुभूयमाना तदाकारा प्रतीतिः कथमुपपद्यताम् ? , तत्र तस्या वाच्यत्वाद्यनुयोगिकसमवायित्वाभावावलम्बनत्वोपगमे सर्वत्रैव तथात्वमुपेयतामिति गतं व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वेनेत्यभिप्राय इति मिश्राद्यनुसारिव्याख्यानम् , तत्रेयमनुपपत्तिरवतरति; तद्धर्मावच्छिन्नतन्निष्ठप्रतियोगिताकाभाव बुद्धौ तद्धर्मप्रकारकतज्ज्ञानत्वेन हेतुत्वासम्भवः, घटत्वेन यत्किंचिद्घट ज्ञानादपि यावद्घटप्रतियोगिकसामान्याभावबुद्ध्युत्पत्त्या व्यभिचारात् , सम्भवेपि वा दर्शितविशेषदर्शनकाले निर्धर्मितावच्छेदककवाच्यत्वादिधर्मिकसमवायित्वादिभ्रमसम्भवेन व्यधिकरणधर्मावच्छिन्नाभावप्रतीतिनिर्वाहात् तादृशकारणताया अकिंचित्करत्वम् ; नच वह्नित्वधर्मितावच्छेदककमहानसीयत्वप्रकारकबुद्धिं विना विशृंखलमहानसीयत्वप्रकारकज्ञान सत्त्वेपि महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रत्यक्षानुत्पत्त्या तद्धर्मसमानाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्धर्मावच्छिन्नधर्मिक तद्धर्मप्रकारकज्ञानत्वेन हेतुता वाच्येति वाच्यत्वत्वावच्छिन्नधर्मिक समवायित्वप्रकारकज्ञानं विना न समवायित्वावच्छिन्नवाच्यत्वत्वसमानाधिकरणप्रतियोगिताकाभावभानसम्भव इति वाच्यम् ; महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगितायां द्रव्यत्वादेरपि सामानाधिकरण्यादुक्तकार्यकारणभावोपगमे द्रव्यत्वाद्यवच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानस्यापि तादृशप्रतियोगिताकाभावबुद्धावपेक्षणीयत्वापत्तेः ।

अथ तद्धर्मवद्वृत्तित्वेन भासमानप्रतियोगित्वे तद्धर्मावच्छिन्नत्वावगाहिन्यामभावबुद्धौ तद्धर्मावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुता, महानसीयवह्निर्नास्तीत्यत्र च वह्नित्वावच्छिन्ननिष्ठत्वेन संसर्गघटकतया

भासमानप्रतियोगित्वे महानसीयत्वावच्छिन्नत्वं भासते, स्वावच्छिन्नवह्नि वृत्तिप्रतियोगिताकत्वस्य अभावांशे प्रतियोगिविशेषणतापन्नमहानसीयत्वस्य सम्बन्धघटकत्वादिति तत्र वह्नित्वावच्छिन्नधर्मिकमहानसीयत्व प्रकारकज्ञानस्यापेक्षा, न तु धर्मान्तरावच्छिन्नधर्मिकस्य, धर्मान्तरविशेषित वह्निवृत्तित्वेन तत्र प्रतियोगिताया अभानादितिचेत् ? ; तर्हि प्रतियोगितावच्छेदकप्रकारकज्ञानमन्तरेणाप्यभावप्रत्यक्षंसामान्यापत्तिः, प्रत्यक्षविशेष एव तद्धेतुतायाः स्वीकृतत्वात् . एवमप्यनतिप्रसङ्गेन प्रतियोगिविशेषिता भाववुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया प्रतियोगितावच्छेदक प्रकारकज्ञानस्य हेतुत्वादेव निर्वाहे स्वतन्त्रतद्धेतुतायां निर्बीजत्वापाताच्च. अस्तुवैतादृशरीत्यैव हेतुहेतुमद्भावः, तथापि समवायितया वाच्यत्वं नास्तीत्यत्र वाच्यत्वत्वसामानाधिकरण्याविशेषितस्वावच्छिन्नप्रतियोगितायां एव समवायित्वसंसर्गघटकतया भानोपगमसम्भवेन वाच्यत्व त्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्य तत्रानपेक्षणीयत्वमुपपद्यत इति ।

अत्रेदं समाधानमवधेयम् ; तदुभयधर्मावच्छिन्नप्रतियोगिताका भाववुद्धौ तदुभयैकतरधर्मावच्छिन्नधर्मिकतादितरप्रकारकज्ञानत्वेन हेतुता , समवायितया वाच्यत्वाभावस्य व्यधिकरणसमानाधिकरणयोः समवायित्ववाच्यत्वत्वयोरुभयोरेव प्रतियोगितावच्छेदकत्वपर्याप्तिरवश्यमङ्गीकार्या, समवायित्वमात्रस्य प्रतियोगितावच्छेदकत्वे वाच्यत्वत्वप्रकारकज्ञानमन्तरेणापि तादृशाभावप्रतीत्यापत्तेः, अत्र समवायितया वाच्यत्वं नास्तीति प्रतीत्या समवायित्ववाच्यत्वत्वोभयपर्याप्तप्रतियोगितावच्छेदकत्वानवगाहने तस्याः समवायित्ववाच्यत्ववदिदमिति भ्रमविरोधित्वानुपपत्तेश्च, तं प्रति समवायितया प्रमेयत्ववाच्यत्वोभयं नास्तीत्यादिनिश्चयव्यावृत्तेन तदुभयांशे प्रतियोगितावच्छेदकतापर्याप्तावगाहिनिश्चयत्वेनैव प्रतिबन्धकत्वात् ।

नच विलक्षणवाच्यत्वप्रकारतानिवेशेनैव दर्शितनिश्चयव्यावृत्तिसम्भवे तदुभयांशे अवच्छेदकत्वपर्याप्तत्वावगाहित्वमप्रयोजकमिति वाच्यम्, यतस्तद्धर्मे अभावप्रतियोगितावच्छेदकत्वपर्याप्तिस्तदवच्छिन्नस्य अभावविरोधित्वप्रयोजिका तदवगाहित्वमेव अभावबुद्धेस्तदवच्छिन्नविशिष्टज्ञानप्रतिबन्धकतायां तन्त्रम्, समवायितया वाच्यत्वप्रमेयत्वोभयं नास्तीति बुद्धेः समवायित्ववाच्यत्वत्वोभयविशिष्टवत्तावुद्धयप्रतिबन्धकत्वे उभयांशे तत्रावच्छेदकतापर्याप्तत्वनवगाहित्वमेव बीजम्, तस्य च समवायितया वाच्यत्वं नास्तीति धीसाधारण्ये तस्यास्तादृशधीप्रतिबन्धकत्वम्, न तु उक्तोभयाभावबुद्धेरिति विशेष एव नोपपद्यते; यदिचैतस्याः प्रतीतेः प्रतिबन्धकत्वम्, नान्यस्या इत्यत्र विषयतावैचित्र्यमात्रं बीजमास्थीयते?, तदा समानाधिकरणधर्मावच्छिन्नाभावविषयिण्या घटो नास्तीत्यादिबुद्धेरपि प्रतियोगितावच्छेदकत्वावगाहित्वं विलीयताम्, न हि तत्र घटत्वादिविशिष्टधीप्रतिबन्धकत्वानुरोधमन्तरेण युक्त्यन्तरं परिस्फुरति, स च भवतामकिञ्चित्कर एव, 'कपालसमवेतद्रव्यं नास्ति' 'नील घटो नास्ती' त्यादिप्रतीतिव्यावृत्तप्रकारताविशेषस्यैव तादृशधीप्रतिबन्धकताबीजत्वसम्भवात्; तथाच तत्रैव समवायितया वाच्यत्वं नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धावपि वाच्यत्वत्वांशे प्रतियोगितावच्छेदकत्वावगाहनमशक्यापह्नवमेवेति वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानमन्तरेण न तत्सम्भवः ।

अथ यत्त्वतत्त्वाननुगमेन प्रतियोगितावच्छेदकभेदेन तत्प्रकारकज्ञानहेतुताभेदस्यावश्यकतया महानसीयत्ववह्नित्वादिरूपसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षं प्रति एकधर्मावच्छिन्नविशेष्यकापरधर्मप्रकारकज्ञानत्वेन हेतुता वाच्या, न तु व्यधिकरणसमवायित्वसमानाधिकरणवाच्यत्वत्वाद्युभयधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे; समवायित्वाद्यवच्छिन्नप्रतियोगि

ताकाभावप्रत्यक्षत्वावच्छिन्नं प्रति समवायित्वादिप्रकारकज्ञानस्वेन कल्पनाकारणतयैव तन्निर्वाहान्न तत्र वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानापेक्षेति चेन्न; प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रतीत्याऽवगाह्यते, न तु स्वातन्त्र्येणेति नियमेन समवायि वाच्यत्वं नास्तीत्याद्याकारिक्रायाा एव व्यधिकरणधर्मावच्छिन्नाभावप्रतीतेरुपगन्तव्यतया समवायित्वविशिष्टवाच्यत्वत्वावच्छिन्नवैशिष्ट्यावगाहिन्यां तादृशबुद्धौ च वाच्यत्वं समवायीति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्यापेक्षितत्वेन विशकलितसमवायित्वादिप्रकारकज्ञानदशायां तादृशाभावप्रत्यक्षस्य अनुत्पत्त्या तदानीं तदापत्तिवारणाय तादृशाभावप्रत्यक्षेपि वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानस्य हेतुतायाा आवश्यकत्वादिति । अत्र च विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकधी हेतुत्वमनङ्गीकुर्वतां घटत्वादिनिर्विकल्पकात् घटो नास्तीत्यादिप्रत्ययस्येव निर्धर्मितावच्छेदककसमवायित्वादिप्रकारकज्ञानादपि समवायित्वावच्छिन्नवाच्यत्वाद्यभावविषयकस्य समवायि वाच्यत्वं नास्तीत्यादिप्रत्ययस्योपगमसम्भवात् वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन प्रतियोगिज्ञानस्य अभावप्रत्यक्षहेतुता न सिध्यतीति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुतामतमाश्रित्यैव उक्तरीत्या अभावलौकिकत्वावच्छिन्नहेतुभूतप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूप कारणबाधपरतया मूलं व्याख्येयम्,— तच्चानुचितम् ; उक्तविशेषकारणताकल्पनोपजीव्य विशिष्टवैशिष्ट्यबोधसामान्यहेतुताश्रयविशेषणतावच्छेदकविशिष्टज्ञानाभावस्यैव दर्शयितुमुचितत्वात्. अतो मूले हेतुत्वादित्यस्यापेक्षणीयत्वादित्यर्थ इत्याशयेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधिया अपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानहेतुत्वमेव हेतुत्वेनाभिमतम् ; तथा च जन्यताया अभावविषयकत्वावच्छिन्नत्वमविवक्षितम्, विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगिभूतस्याभावेन समवायितया वाच्यत्वं ना-

[दी] अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमव गाहमानो विशेषणस्यापि घटत्वादेः तदवच्छेदकत्वमवगाहते;

स्तीत्यादिप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहित्वासम्भव इत्यर्थपरतया तद्व्याख्यानमेवोचितम्, न तु विशिष्टवैशिष्ट्यबोधहेतुतामुपजीव्य कल्प्य हेतुत्वान्तरपरतयेत्याशयेनाह – (दीधितौ) **विशेषणतावच्छेदके** ति । अयं भावः – वाच्यत्वं समवायीति ज्ञानमन्तरेण समवायिवाच्यत्ववानय मिति विशिष्टवैशिष्ट्यबोधानुत्पत्त्या वाच्यत्वत्वावच्छिन्ननिरूपितत्वेन भासमानवैशिष्ट्ये समवायित्वावच्छिन्ननिरूपितत्वावगाहिनि ज्ञाने वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन हेतुता कल्पनमावश्यकम्; समवायिवाच्यत्वं नास्तीति व्यधिकरणधर्मावच्छिन्ना भावबुद्धेरपि वाच्यत्वत्वावच्छिन्नीयत्वेन भासमान अनुयोगितारूपवैशिष्ट्ये समवायित्वावच्छिन्नीयत्वावगाहितया तत्र तादृशज्ञानमवश्यापेक्षणीयमिति ।

ननु वैशिष्ट्यांशे वाच्यत्वत्वनिष्ठधर्मितावच्छेदकतानिरूपकविशेष णतापन्नसमवायित्वावच्छिन्नप्रतियोगिताकत्वावगाहिबुद्धावेव तदवच्छिन्न धर्मिकसमवायित्वप्रकारकज्ञानं हेतुः, व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ च वाच्यत्वत्वावच्छिन्ने समवायित्वस्य विशेषणत्वं नोपेयते, अपि तु तद्वि शेषणतानापन्नस्यैव तस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽभावांशे विशेषणत्वमुपेयते, वाच्यत्वसंसर्गतावच्छेदकतयैव वा तथाविधतदव च्छिन्नत्वस्य प्रतियोगितांशे भानमुपेयते, तथाच तत्र नोपदर्शितज्ञाना पेक्षेत्याशङ्कां परिजिहीर्षुर्भावं व्याचष्टे — **अभावप्रत्ययो हि** ति । **विशेषणस्य** — प्रतियोगिघटादिनिरूपितविशेषणतापन्नस्य घटत्वादेः । **प्रतियोगितावच्छेदकत्वमवगाहते** – प्रतियोगितया भासमानघटादिनि रूपितविशेषणतावच्छिन्ना या स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छि-

[दी] न स्वातन्त्र्येण, घटोनास्तीत्येव प्रतीतेः, तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेणावच्छिन्नं प्रतियोगिनं नावगाहते?, नावगाहतएव तदा तस्यापि प्रतियोगितावच्छेदकत्वम् ।

न्ना घटत्वादिनिष्ठप्रकारता तच्छाली भवतीति यावत् । **न तु स्वातन्त्र्येण** — प्रतियोग्यविशेषणत्वेन घटत्वादेः प्रतियोगितावच्छेदकत्वं भवगाहते इत्यनुषङ्गेणान्वयः । तादृशसम्बन्धावच्छिन्नघटत्वादिनिष्ठ प्रकारता प्रतियोगिनिरूपितप्रकारतानवच्छिन्ना न भवतीत्यर्थः । **घटो नास्तीत्येवे** ति । अभावांशे स्वातन्त्र्येण घटत्वादिवैशिष्ट्योल्लेखरहिताया एवेत्यर्थः । **प्रतीतेः** — 'अनुभवा' दिति शेषः । एतावता किमायातमित्यत आह — **तदिहे** ति । **अवच्छिन्नम्** — विशेषितम् । **तस्यापि प्रतियोगिता-च्छेदकत्वम्** — तस्य प्रतियोगितावच्छेदकत्वं मपि, तथाच मानाभावेन व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वा सिद्धिरिति भावः ।

अथ व्यधिकरणधर्मस्य प्रतियोगिविशेषणतयैव व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ भानमुपेयते, नचैवं तादृशबुद्धेः समवायित्वादिरूप विशेषणतावच्छेदकप्रकारकवाच्यत्वादिज्ञानजन्यतावच्छेदकाक्रान्ततया तादृशज्ञानं विना व्यधिकरणधर्मावच्छिन्नाभावबुद्धयनुपपत्तिरिति वाच्यम्, भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्ध्युपगमात् । विशेषदर्शनदशाया मपि आहार्यतत्प्रकारकज्ञानादेव तद्बुद्धिसम्भवात् । अनाहार्यस्यैव विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वे विशेषदर्शनकालीनायाः समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेरगत्या वाच्यत्वाद्यधिकरणकसमवायित्वादिभावाधगाहित्वमुपेयते, वाच्यत्वं समवायीत्यादिभ्रमानन्तरं समवायिवाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्मस्य

गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धेः ।

अथावगाहते? तर्हि भ्रम एव ; नच ततोर्थसिद्धिरिति भावः ।

प्रतियोगितावच्छेदकत्वे मानमास्ताम्, तत्र तदवगाहितायाः सर्वानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् ! तादृशप्रतीतेर्वाच्यत्वे समवायित्वाभावावगाहित्वोपगमे तत्पूर्वं वाच्यत्वं समवायीति भ्रमापेक्षानुपपत्तेरित्याशयेना शङ्कते- **अथावगाहत** इति । समाधत्ते- **तर्हि भ्रम एवे** ति । व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वांशेपि भ्रम एवेत्यर्थः । वैशिष्ट्यभान एव अवच्छेदकताया भानादवच्छेदकताया वैशिष्ट्यनियततया तद्बाधे तस्या अपि बाधादिति भावः । नचैवं **गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धे** रिति मूलासङ्गतिः, तादृशप्रतीतेः शृङ्गांशे शशीयत्वावगाहित्वानभ्युपगमे शशीयत्वे शृङ्गनिष्ठप्रतियोगितावच्छेदकत्वावगाहनासम्भवः, तदवगाहित्वे भ्रमत्वमित्युभयथापि व्यधिकरणधर्मावच्छिन्नाभावासाधकत्वात् तादृशप्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यम. अभ्रान्तानामपि गवि शशशृङ्गं नास्तीति व्यवहारमूलप्रतीतिसत्त्वेनोक्तनियमस्यैव असिद्ध्या व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्लिप्रन्थोक्ता तादृशप्रतीते र्गोशृङ्गाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्या गवाधिकरणकाभावावगाहितानुभवविरोध इत्याशङ्क्याभ्युत्थाप्याभ्रान्तपुरुषीय गवाधिकरणकाभावावगाहितादृशाभावप्रतीतिनिराकरणपरतया तद्ग्रन्थस्यावतारणीयत्वात् । नन्वभ्रान्तानां गवि शशशृङ्गं नास्तीति प्रतीतिर्भवतु, शशशृङ्गं नास्तीति प्रतीतिर्नापह्नोतुं शक्येत्यत एव तथाविध व्यवहारदर्शनादित्याशङ्कायां शशशृङ्गं नास्तीत्यादिव्यवहारो बोध्यः ।

शशशृंगं नास्तीति च शशे शृंगाभाव इत्यर्थः॥

॥ इति तत्त्वचिन्तामणौ व्यधिकरणधर्मावच्छिन्नाभाव विचारः ॥

यद्यपि शशशृङ्गं नास्ती' ति शब्देन शशे शृङ्गाभाव इत्याकारकः शाब्द-बोधो न शक्यते जनयितुम्, अनुयोगिवाचकपदोत्तरं सप्तमीविरहेण निराकांक्षत्वात्; तथापि पदार्थोपस्थित्यादिमूलकतादृशमानसबोधजननेच्छया व्युत्पन्नानां तथा प्रयोग इत्याशयः ।

ननु घटत्वेन घटो नास्तीत्याकारकस्याभावप्रत्ययस्यानुभविकतया प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रत्ययोऽवगाहत इति न नियमः, तादृशप्रतीत्या स्वातन्त्र्येण भासमाने घटत्वादौ प्रतियोगितावच्छेदकत्वावगाहनात्; अन्यथा घटत्वेनेत्याकारकतानुपपत्तेः, तथाच घटत्वेन पटो नास्तीत्यादावपि घटत्वादौ पटादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहनं निराबाधमेवेति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव; नच तत्र व्यधिकरणधर्मस्यावच्छेदकत्वावगाहनसम्भवेपि अतिरिक्ताभावकल्पनागौरवभयेन तादृशप्रतीतेः पटाद्यधिकरणकघटत्वाद्यभावावगाहित्वमेवं स्वीक्रियत इति वाच्यम्; असति बाधके तच्छब्दोल्लेखिप्रतीतेः तच्छब्दप्रतिपाद्यार्थविषयकत्वापरित्यागात् पटाद्यधिकरणकघटत्वाद्यभावस्य च घटत्वेन पटो नास्तीत्यादिशब्दात्कथमप्यप्रतीतेः प्रतीतिबलात्पदार्थान्तरसिद्धौ तत्पदार्थकल्पनागौरवस्य फलमुखत्वेनाबाधितत्वात् । नच प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणभेदेन तादृशप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहिता न सम्भवतीति युक्तम

पटत्वावच्छिन्नधर्मिकघटत्वादिप्रकारकज्ञानत्वेन प्रतियोगिज्ञानहेतुतायां ग भावात्, तादृशज्ञानं विनैव घटत्वेन पटो नास्तीत्याकारकस्य घटत्वा० विशिष्टपटादिवैशिष्ट्यानवगाहिनो ऽभावप्रत्यक्षस्य स्वीकारात् ।

वस्तुतस्तु– कुत्राप्यभावबुद्धौ स्वातन्त्र्येण प्रतियोगितावच्छेदक विशिष्टप्रतियोगिज्ञानस्य न हेतुतास्ति, नच तदकल्पने प्रतियोगिज्ञान शून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य घटत्वादिनिर्वि कल्पकानन्तरं "विशेष्ये विशेषण" मिति रीत्या घटाभावप्रत्यक्षस्यंचापत्ति रिति वाच्यम्; प्रतियोगिज्ञानहेतुतामतेपि घटाभावे प्रतियोगितया घटादिरूपप्रतियोगिज्ञानविरोधिबाधादिग्रहसत्त्वे प्रतियोग्यविषयकाभावग्रह पत्तेर्दुर्वारत्वात्; यदि च निर्धर्मितावच्छेदकप्रतियोगिभाने बाधकाभावात् प्रतियोग्यविषयकाभावप्रत्ययो नापादयितुं शक्यते?, तदापि तादृशबाध दशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण० प्रतियोगिविषयकस्य "नास्ति, घटीयश्चे"त्याद्याकारकसमूहालम्बनप्रत्यक्षस्य पत्तिः. एवं घटत्वावच्छिन्नप्रतियोगिताकाभावस्य यदा भानं तदा निर्वि कल्पकोपस्थितद्रव्यत्वादेः विशेष्ये विशेषणमिति रीत्या घटाद्यंशे भाना पत्तिः कारणबाधेन न शक्यते वारयितुम्, तादृशाभावस्य द्रव्यत्वा वच्छिन्नप्रतियोगिताकत्वविरहेण तद्भाने द्रव्यत्वादिप्रकारकज्ञानस्यानपेक्ष णात्. यदि च यादृशप्रकारतावच्छिन्नधर्मे स्वावच्छिन्नप्रतियोगिताकत्वं सम्बन्धावच्छिन्नधर्म्यन्तरनिरूपितप्रकारता तदन्यप्रकारतानिरूपितविशेष्य तापन्नविशेषणविषयतानिरूपितसंसर्गतासम्बन्धेन भानं प्रत्यभावीयानुयोगिता विशेषभेदस्य कारणतां कल्पयित्वा ईदृशापत्तिः, प्रतियोगिप्रका तानिरू- पितधर्मितावच्छेदकतापन्नावृत्तिप्रकारतावैशेषसम्बन्धेन लौकिकप्रत्यक्षं प्रत्य भावत्वभेदस्य कारणतां कल्पयित्वा च पूर्वापत्तिश्च वार्यते? तदा नैव सकलापत्तिर्न दलं प्रतियोगिज्ञानहेतुतया ।

नचैवमपि प्रतियोग्यविषयकस्य अभावत्वाप्रकारकप्रत्ययस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुमिति वाच्यम्, प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्य इदंत्वादिना ऽभावप्रत्यक्षस्य इदंत्वादिरूप तादृशविशेषणज्ञानासत्त्वे च तादृशाभावनिर्विकल्पकस्येष्टत्वात्, अभाव निर्विकल्पकानभ्युपगमे प्रतियोगिज्ञानहेतुतयापि तद्वारणासम्भवात् इदं त्वादिना ऽभावप्रत्यक्षे व्यभिचारवारणायाऽभावत्वप्रकारकाभावप्रत्यक्षं प्रत्येव प्रतियोगिज्ञानस्य हेतुताया वाच्यत्वात् विशेषणानवच्छिन्नविषयतासम्बन्धेन प्रत्यक्षं प्रत्यभावभेदस्य हेतुतां स्वीकृत्य तद्वारणे च मयापि तस्य तथैव वारणीयत्वात् ।

वस्तुतस्तु – आपाद्याप्रसिद्धयैव तादृशफलापत्त्यनवकाशः, प्रसिद्धावा घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगितावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविषया हेतुतायाः क्लृप्तत्वात् तादृशकारणविरहादेव न तच्छून्यकाले तदापत्तिः ।

यस्तु अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रकारकोपलम्भविरहो विशेष्यीभूतधर्मिप्रत्यासन्नो ऽभावभ्रहे हेतुः, तथाच यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारकोऽनाहार्यभ्रमोऽप्रसिद्धः तदीयः समवायितया वाच्यत्वं नास्तीत्याकारकप्रत्ययो न व्यधिकरणधर्मावच्छिन्नाभावमवगाहितुमीष्टे, तदीयतादृशप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाद्यभावविषयकत्वावश्यकत्वे सर्वत्रैव तद्विषयकत्वमुचितम्, एकाकारप्रतीतेः पुरुषभेदेन विषयतावैचित्र्यविरहादिति मिश्रोक्तो व्यधिकरणधर्मावच्छिन्नाभावनिराकरणस्य पन्थाः, सोपि न साधीयान्; अभाव बुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टस्वप्रतियोग्युपलम्भाभावत्वेन एक

[दी] यदि पुनरानुभाविको लोकानां स्वरसवाही घटत्वेन पटोनास्तीत्यादि प्रत्ययः? तदा तादृशाभाववारणं गीर्वाणगुरूणामप्यशक्यमिति मन्तव्यम्॥

श्रीमद्रघुनाथभट्टाचार्यशिरोमणि विरचितायां तत्त्वचिन्तामणिव्याख्यायां दीधित्यपराख्यायां व्यधिकरणधर्मावच्छिन्नाभावविचारस्समाप्तः ॥

कारणतायाः स्वत्वाननुगमेन दुर्वचतया विशिष्य कारणताकल्पनस्यावश्यकत्वे यत्र तादृशोपलम्भः प्रसिद्धः तत्रैव तादृशोपलम्भानन्तरमभाव प्रत्ययवारणाय तदभावहेतुत्वोपगमात् व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ कांचिदप्रसिद्धया तदभावहेतुत्वासम्भवेपि सन्निकर्षादिघटितसामग्रीतः तदुत्पत्तौ बाधकाभाव इत्यत आह — **यदि पुन** रिति । **स्वरसवाही**– विवादशून्यः । "घटत्वेन घटो नास्ती" ति पाठः; "घटत्वेन पटो नास्ती" ति पाठो न साधुः; तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहिताया एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं भासत इति नियमस्य तदाकारप्रतीतिबलेन अशक्यवारणत्वात् । **आनुभाविक** इत्यस्य व्यधिकरणधर्मस्यावच्छेदकत्वावगाहितया अनुभवसिद्ध इत्यर्थकतया वा कथं चित्सङ्गमनीयः । **गीर्वाणगुरूणामपि न शक्य** मित्यनेन प्रतीतिकारणबाधेन तादृशाभावनिराकरणनिर्भरा मिश्रादय आक्षिप्ताः । **यदि तदे**त्यनेन तादृशप्रतीतेरानुभाविकत्वे विवादं प्रदर्श्य तादृशाभावस्यःऽपारमार्थिकत्वं सूचितम् ॥

इति महामहोपाध्याय गदाधरभट्टाचार्यचक्रवर्ति
विरचिते तत्त्वचिन्तमणि दीधितिव्याख्याने
व्यधिकरणधर्मावच्छिन्नाभावखण्डनम् ।
॥ चतुर्दशलक्षणी समाप्ता ॥

9495
MAHARAJENDRA SANSKRIT COLLEGE
वाणी मंजुल मैत्रीमी
LIBRARY
J413

